लोकप्रियसाहित्यग्रन्थमाला - 32

# जगन्नाथसुभाषितम्

( जगन्नाथपाठकविरचितम् )

सम्पादकः
**बनमाली बिश्वालः**

राष्ट्रियसंस्कृतसंस्थानम्
**मानितविश्वविद्यालयः**
नवदेहली

प्रकाशक:
कुलसचिव
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानित विश्वविद्यालय)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नई दिल्ली-110058
ईपीएबीएक्स : 28524993, 28521994, 28524995

ई मेल : rsks@nda.vsnl.net.in
वेबसाईट : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-74-6

प्रथमसंस्करणम् : 2011

मूल्य : ₹ 410/-

मुद्रक :
सेठ पैकेजिंग
८८०२४५१२०८, ७५०३६८८९२९

# Jagannātha-subhāṣitam

**(Anthology of Jagannath Pathak)**

**Edited by**

**Banamali Biswal**

**Rashtriya Sanskrit Sansthan**

**(Deemed University)**

**New Delhi**

Published by :
Registrar
**Rashtriya Sanskrit Sansthan**
56-57, Institutional Area
Janakpuri, New Delhi - 110058
Ph. : 28524993, 28521994, 28524995

E-mail : rsks@nda.vsnl.net.in
webside : www.sanskrit.nic.in

© Rashtriya Sanskrit Sansthan

First Edition : 2011

ISBN : 978-93-86111-74-6

Price : ₹ 410/-

Printed at :
Seth Packaging
Ph. 8802451208, 7503688929

# पुरोवाक्

जगन्नाथसुभाषितमुन्मीलितमिति प्रमोदनिर्भरं परितोषमनुभवामः। अस्मिन् काव्यकोशे कवेः परिणता प्रज्ञा परां काष्ठामधिरूढा, संवेदनाऽधिकं गहनं गाढा, दृष्टिर्विशदा जाता कल्पनाश्च प्रत्यग्रतां प्रयाताः।

समकालिक-संस्कृत-साहित्यजगति जगन्नाथ-पाठकवर्याणामवदानं महनीयमिति न संशीतिः। विगतेभ्यः पञ्चदशकेभ्यः निरन्तरं साहित्य-साधनायां संलग्ना महाकवयः इमे संस्कृत-साहित्याय पिपासा-कापिशायनी-मृद्वीका-विच्छित्तिवातायनी-आर्यासहस्राराम-सदृशीः नैकाः कृतीः प्रदाय आवर्जयन् सहृदयानां हृदयानि।

राष्ट्रिय-संस्कृत-संस्थाने प्राध्यापक-प्रवाचकादिपदेषु सेवारताः शोधाध्यापनादिकार्येषु च व्यापृताः एते 1994 तमे वर्षे प्रयागस्थात् गङ्गानाथ-झा-परिसरात् प्राचार्यरूपेण सेवानिवृत्ताः सन्तः तीर्थराजे प्रयागे एव वासं कल्पयन्तः इदानीमपि स्वकीये परिणतवयसि सततं रचनाकर्मणि व्यापृता वर्तन्ते इति सौभाग्यं संस्कृत-साहित्यानुरागिणाम्। डा. पाठकस्य नैकाः साहित्यिक-कृतयः राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथ-झा-परिसरात् प्रकाशिताः सन्ति। 1980 तमे वर्षे प्रकाशितस्य 'कापिशायिन्या'ख्यस्य मुक्तक-काव्यसंग्रहस्य कृते एते साहित्य-अकादमी- पुरस्कारमपि लब्धवन्तः। कापिशायिन्याः वर्ण्यविषयः मधु मधुशाला च वर्तेते। पाण्डित्य-परंपरया पारंपरिक-संस्कारैश्च युक्तः कविः अनेन काव्यमाध्यमेन संस्कृतसाहित्ये काञ्चिद् भिन्नां प्रतिच्छविं प्रस्तुतवान्। उमर-खय्याम-ग़ालिबयोः उर्दु-कविताः अस्य काव्यस्य प्रेरणास्रोतो वर्तते। एतत् काव्यं कवेः संघर्षपूर्ण-जीवनस्य चित्रम् अपि प्रस्तौति।

कवेः व्यथा कापिशायिन्यां यत्र तत्र द्रष्टुं शक्यते। 1983 तमे वर्षे 'मृद्वीका'ख्यः काव्य-संग्रहः प्रकाशितोऽभवत् यत्कृते डा. पाठक-महोदयैः 'के.के. बिडला फाउन्डेशन' इत्यस्य प्रथमः 'वाचस्पति' -पुरस्कारः अर्जितः।

1987 तमे वर्षे एतेषां संस्कृत-गजल-संग्रहरूपा कृतिः 'पिपासा' प्रकाशिताऽभवत्। 1992 तमे वर्षे च प्रकाशितः 'विच्छित्तिवातायनी' नामा काव्यसंग्रहः डा. पाठक-महोदयस्य अभिव्यक्तेः नवीन-भावभूमेश्च आधारशिलां प्रतिष्ठापितवान्। आर्या-छन्दसा प्रणीतोऽयमपि संग्रहः राजस्थान-संस्कृत-अकादमी-द्वारा अखिलभारतीय-काव्य-पुरस्कारेण सम्मानितः अभवत्। आर्याछन्दसैव प्रणीतं डा.पाठकस्य अपरं मुक्तक-काव्यम् 'आर्यासहस्रारामम्' 1995 तमे वर्षे प्रकाशितमभवत् यत् कवेः आर्या-छन्दसि सिद्धहस्ततां सुष्ठु प्रमाणयति तथा च प्रस्तुत-कवेः कवि-कर्मणः दिशमपि सम्यक् सङ्केतयति। एवम् अनेकैरखिल-भारतीय-सम्मानैः सम्मानितानां डा. पाठक-महोदयानां कृतयः अनवरतं संस्कृतसाहित्यं संवर्धयन्त्यः सन्ति।

'पत्रलेखा के पत्र' तथा 'थेरीगीतगाथा'- सदृशीभिः कृतिभिः डा. पाठकमहोदयैः हिन्दी-साहित्यक्षेत्रेऽपि महद् योगदानं समाचरितम्। थेरीगीतगाथायां षोडश-भिक्षुणीनां जीवनगाथानां महत्त्वपूर्णं संकलनं वर्तते यत्र प्रसिद्धानां बौद्धभिक्षुणीनाम् उत्पलवर्णा-क्षेमकेशा-गौतमी-अम्बपाली-प्रभृतीनां जीवन-गाथाः पाठकवर्येण निबद्धाः। पत्रलेखायाः पत्रं तु नारी-हृदयव्यथायाः कश्चन जीवन् इतिहासोऽस्ति। सुकविभिरेभिः संपूर्णस्य 'दीवाने गालिब' काव्यस्य संस्कृतानुवादं विधाय समकालिक संस्कृत-रचना-जगति एकमान्दोलनमानीतम्।

डा. पाठक-महोदयानां भाषा, शैली च सत्यमेव अपूर्वा। डा. पाठक-महोदयानां रचनासु विशिष्य तस्य आर्यासु नवीना शैली, नवीना भाव-व्यंजना, नूतनः बिम्बः, नवः शिल्पः तथा सर्वोपरि नवं कथ्यम् अनायासं दृग्गोचरीभवति। डा. पाठकमहोदयानां कविताः हृदयङ्गमं विधाय रसिकः स्वजीवनानुभूतिभ्य एव मूर्तरूपं ददाति।

संस्कृत-कवीनां गर्वोक्तयः प्रसिद्धाः सन्ति। पण्डितराज-जगन्नाथस्य गर्वोक्तिभिस्तु सर्वे संस्कृतज्ञाः परिचिताः सन्ति। एवमेव अस्य अभिनव-जगन्नाथस्य कवितास्वपि यत्र-तत्र काश्चन गर्वोक्तयः द्रष्टुं शक्यन्ते। परन्तु तयोः अयमेव भेदः परिलक्षितो भवति यत् पण्डितराजस्य जगन्नाथस्य गर्वोक्तिषु औदात्त्यं तरङ्गायितं भवति। यत्र प्रत्यक्षरूपेण अथवा वाच्यरूपेण

तस्य अहङ्कारः प्रकटीभूतः तत्र तस्य प्रौढकवेः व्यक्तित्वमपि समाहितं भवति। अत्र अधोदत्तम् उदाहरणद्वयं मद्वक्तव्यं सम्पोषयितुमर्हति। तद् यथा-

**दृष्टः स जगन्नाथो मध्ये विदुषां प्रवाहपतितानाम्।**
**स्यात् स्वयमेव गतोऽपि स्यादथवा केनचिन्नीतः।**

अथवा

**न जगन्नाथस्यास्य स्थानमविदुषः कुतश्चिदिह गोष्ठ्याम्।**
**तेन घुणाक्षररीत्या लब्धमपि स्यादितः स्थानम्।**

इदानीं तेषां भूयसीः नूतनाः आर्या **जगन्नाथ-सुभाषित**मिति शीर्षकेण सबहुमानं प्रकाश्य संस्थानं हर्षं गौरवं च अनुभवति। बनमाली-बिश्वालेन सम्पादितः पाठक-महोदयानां जगन्नाथसुभाषिताख्यः काव्य-संग्रहोऽयं संस्कृत-साहित्य-सुधापानाभिलाषिणां पाठकानां चित्तं रञ्जयिष्यतीति विश्वसिमि। अत्रत्यं प्रत्येकं पद्यं महाकाव्यायते। सम्पादकेन डा. बिश्वालेन एतस्य काव्यस्य जगन्नाथसुभाषितमिति नामकरणं सुष्ठु विहितम्। आशासे यदस्य काव्य-संग्रहस्य संस्कृतजगपि सर्वङ्कषः समादरः स्यात्।

राष्ट्रियसंस्कृतस्य मुख्यालये शास्त्रचूडामणिविदुषा आचार्य-रमाकान्तशुक्लेन अस्य ग्रन्थस्य पाण्डुलिपेः परिशीलनसंशोधनपुरस्सरं सम्पूर्णग्रन्थः सूक्ष्मेक्षिकया संशोधित इत्यस्य महानुभावस्य वयमधमर्णाः स्मः। एतस्य ग्रन्थस्य सम्यक् सम्पादनाय स्वयमेव कृती कविः कथाकारश्च बनमाली बिश्वालोऽपि सर्वथा साधुवादमर्हति।

**राधावल्लभः त्रिपाठी**
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

# Introduction

The 2nd half of 20th century and the first decade of 21st century is being rightly considered as the golden age for the modern Sanskrit Literature. During this period we have plenty of poetical compositions in the form of महाकाव्य-s, खण्डकाव्य-s and lyrical poems etc. written by the poets from all regions of our country. Similarly, in prose compositions we have stories, short stories, novels, travelogue and fine essays etc., whereas in dramatical compositions we have plays, short plays (or rather one-act-plays), Radio-plays and street-plays etc. Out of these literary genres of creative writings along with their sub-genres mentioned above, some are continuing from ancient times and few are the contributions of this modern age.

**The poet and his works : At a glance**

Dr. Jagannath Pathak, the poet of this Anthology i.e. जगन्नाथसुभाशितम् is a well known name in the field of contemporary creative writings in Sanskrit. He was born in Sasaram, Bihar in the year 1933 and he retired as a principal from Rashtriya Sanskrit Samsthan, Ganganath Jha Campus, Allahabad in 1994. He now leads the literary galaxy of Prayag where he is well-settled at present and by his precious presence he adorns *Pratisthanapuri* (Jhusi), Allahabad (a historical place related to mythological characters such as Pururavas and Urvashi etc.) .

A number of creative literary works have been published so far to his credit. He is the author of many मुक्तककाव्य-s like कापिशायनी (1980), मृद्वीका (1983), पिपासा (1987), विच्छित्तिवातायनी (1992) and आर्यासहस्रारामम् (1995). He has also translated कामायनी as well as अश्रु of Jayashankar Prasad into Sanskrit in poetry-form and सौन्दर्यदर्शनविमर्शः of Prof. G. C. Panday into Hindi. He has edited many important works like समुद्रसङ्गमः (original Mazm Ul Bahrain by Dara Shikoh), काव्यप्रकाश, सुभाषितहारावली, रतिमन्मथनाटकम् etc.

In addition to that, पत्रलेखा के पत्र (1981) and थेरीगीतगाथा (1998) are his original writings in Hindi.

थेरीगीतगाथा is an important collection of life history of sixteen Buddhist Nuns including famous उत्पलवर्णा, क्षेमकेशा, गौतमी and आम्रपाली. He has edited the 7th volume of History of Sanskrit literature published from Uttar pradesh Sanskrit Sansthan, Lucknow. This particular volume is dedicated to Modern Sanskrit literature. Besides the works mentioned above, thousands of his आर्या still wait to see the light of the day. For details of his works one may go through the 10th issue of Drik (a leading criticism of contemporary Sanskrit literature) published by Drig-Bharati, Allahabad in 2002.

For his marvelous creations stated above, he has been awarded with several prestigious National awards. To name a few, he has been awarded with president award in 2005. He is also a recipient of many other important awards like Sahitya-akademi (1981) for कापिशायिनी, Vachaspati-sammana of K. K. Birla Foundation (1992) for मृद्वीका. Besides these, he received several awards from Uttar pradesh Sanskrit Sansthan and Rajasthan Sanskrit Academy also.

**The Poet vis-à-vis आर्या metre**

Dr. Pathak has unique mastery over writing traditional metre in general and आर्या-s in particular. Therefore, he is rightly called as आर्यासम्राट् by many contemporary critics. Though he mostly writes in traditional metres like many other traditional contemporary poets, still unlike them, he is not against the use of free verses (*muktachhandas*) in contemporary Sanskrit writings, which is widely adopted in other contemporary Indian literature. He is never of the opinion that it is only writer's weakness to write free verses.

आर्या is a musical metre which seems to be most conducive towards the nature of the उत्तर्दू-शेर. He well-deserves the credit of making उर्दू and Persian literature immortal, for first of all, digesting them and then for transforming them into Sanskrit metre in its traditional form. Through his चषक-s of कापिशायनी he lives in the hearts and the brains of the lovers of

Sanskrit literature who are in favour of extending Sanskrit literature a greater platform. By translating "दीवाने गालिब" into आर्या-s, he has undoubtedly shouldered a new responsibility. His आर्यासहस्रारामम् (1995) contains one thousand आर्या-s. Interestingly, the title refers to the Sanskritised name of his native place Sasaram (Bihar). His विच्छित्तिवातायनी also contains around two thousand आर्या-s.

The lyrical Sanskrit metre आर्या is one of the few small metres in Sanskrit. Besides the 'आर्या', the अनुष्टुभ् is also a small metre. However, there is a fundamental difference between these two metres. The अनुष्टुभ् suits as a medium for the continuous narration as it is mostly used in पुराण-s, while the आर्या is fittest for the lyrical expression of romantic feelings. May be, therefore, कालिदास has adopted the आर्या-s for songs in his plays and the same tradition has also been followed by most of his successors. However, by adopting the आर्या-s for the purpose of *Muktakas* in general, Dr. Pathak has given a new direction to the Classical Sanskrit tradition.

**A Brief survey of poet's Poetic Creation**

The great merit of Dr. Pathak's poem is that it is marked by a rare lucidity. Though he has no specific style as such still the nature of his poems, is extra-ordinarily simple. Mostly he uses the simplest possible words and expressions. His works are considered as the massive contributions to the contemporary writings in Sanskrit for its quality and not for quantity. He has accomplished his own marvelous skill due to his mastery over the language and the metre he uses. What I feel, the qualities and the significance of Dr Pathak's poems can only be realized by going through them originally. Before writing any thing about the present volume, let me analyze some examples of the already published works of Dr. Pathak.

Like many other writers of present era, the poet Dr. Pathak is also very much worried about the present complicated awesome social set up. For example, at present, he finds रावणs all around him just waiting for their opportunities to steal the chastity of सीता. In this situation he asks a question to himself and others that how much the poor लक्ष्मणरेखा will be able to protect her :

**परितो दशाननेषु स्वस्वावसरं प्रतीक्षमाणेषु।**

**सीतां रक्षितुमेका लक्ष्मणरेखा कियत्प्रभवेत्।।**

In another verse he compares himself with such a lamp which is exstinguished right now by the saree's boarder which was supposed to protect him from the great threats of storms.

**येनाञ्चलेन रक्षित आसं प्रबलासु हन्त वात्यासु।**

**तेनाञ्चलेन सम्प्रति निर्वापित एष दीपोऽहम्।।**

He believes in surrendering to God completely. Such evidences can be found in many of his poems including the following one where he says that there is no object left which cannot be given to you, because everything is yours. In poet's language :

**तन्नास्ति वस्तु यद् हि भवेत् तुभ्यमदेयम्।**

**सर्वं त्वदीयमेव न रे तुभ्यमदेयम्।।** (पिपासा-49)

Dr. Pathak's internal mind has got proper expression in his poems. Whatever he has written so far he has written them very honestly by entering to the utmost depth of his heart. He has written his poems by lifting himself above the bar of cast and creed. The search of eternal truth is the thrust area of his poems. The understanding of contemporary age, innovative thoughts and simple as well as transparent language, are other qualities of his poems. it is very difficult to raise finger against his correct usage of appropriate words and error-free language along with selection of proper metre. Dr. Pathak has mostly chosen *muktakas* to express his feelings in poetry-form. He is master of आर्या metre. He has written two thousand आर्या-s in विच्छित्तिवातायनी, one thousand in आर्यासहस्रारामम्. Though आर्या is his favourite metre, he has adopted *viyogini* in मृद्वीका. I am very much fond of one of his verse composed in *viyogini*. The thoughts of the verse quoted below, are as under : Let someone annihilate my wings or let one prison me in cage. But how can one cease my inner longing to fly up high in the sky. In the poet's language:

**मम नाशय पक्षतिद्वयं ननु मां पञ्जरके निवेशय।**
**परमुड्डयनाय लालसां मयि जातां कथमेव रोत्स्यति।।**

(मृद्वीका 155)

I take a lot of inspiration from this single verse. I feel that the verse can very well guide the young generation too. Not only this verse but many other verses of Dr. Pathak contain new themes in a most appealing style. His emotional expressions do efficiently give a shape to the expressions of his own life.

The poet is sad enough about the tendency of new generation who has blind faith on western culture. Therefore, he sometimes casts satiric expressions on such tendency and says :

**उच्छिद्यन्ते सम्प्रति पुरातनाः सर्व एव विषया अमी।**
**पूर्वाभिमुख इहासीद् यः स इतः पश्चिमाभिमुखः।।**

I feel, at present Dr. Pathak almost surpasses not only his contemporary generation but he also sits in the driver's seat of both the generations (i.e. upper and lower both) . The Sanskrit poets are famous for their proud expressions including कालिदास (पुराणमित्येव न साधु सर्वम्) or Bhavabhuti (ये नाम केचिदिह प्रथयन्त्यवज्ञां..) or Panditaraja Jagannatha in many of his poems. They all of course have their own style of expressing such proudness. While Panditaraja is more exposed in this direction, Dr. Pathak has his own symbolic style in this context. As Prof. Radhavallabh Tripathi has rightly pointed out in his Foreword right now and once before in Drik 10 also, that Panditaraja uses direct methods for such proud expressions whereas Dr. Pathak adopts the indirect ones. Let us now look at a couple of examples, again quoted in Foreword (पुरोवाक्) itself :

**दृष्टः स जगन्नाथो मध्ये विदुषां प्रवाहपतितानाम्।**
**स्यात् स्वयमेव गतोऽपि स्यादथवा केनचिन्नीतः।।**

**न जगन्नाथस्यास्य स्थानमविदुषः कुतश्चिदिह गोष्ठ्याम्।**
**तेन घुणाक्षररीत्या लब्धमपि स्यादितः स्थानम्।।**

(Quoted in दृक्-10, P. 10)

After a close observation of his poems one can find that Dr. Pathak does not want to accompany the people who are in very much hurry to achieve goals by hook or crook. The flattering culture also did not entertain him. Therefore, some times he finds himself alone.

**About the present work**

The present volume is rightly titled as जगन्नाथसुभाशितम्. After going through the entire volume of Dr. Pathak, I can say that he has given such a perfect presentation here by measuring the essence of each and every word that no body can raise finger towards it. I have no hesitation in declaring that this master piece proves as a welcome addition to the field of creative literature in Sanskrit.

In fact, it is a very difficult task to make a review of an excellent work, as the critic does not find much scope for criticizing it. In that case, he is left with no other option than appreciating the work from top to bottom, as I am also doing in the present case. However, in spite of his efficiency, his modesty is note-worthy. In fact, this shows the philosophy of poet's life.

When I decided to quote a few verses from the present volume for introducing his poems to our readers, I could not judge which one is to be left and which one is to be included. I found each and every verse as quotable. Since it is not practicable to do so, I just picked up a few haphazardly for this purpose. What I want to say is, it should not be taken for granted that the quoted verses are his best creations. Let us go through some of his verses quoted below to have an editorial analysis:

The present poet is not in favour of producing poems in volumes to gain name and fame as he feels that a poet can achieve such fame even by writing two or three poems.

**निर्माय न पद्यानां लभते कश्चिद् यशः सहस्रमपि।**
**पद्यैर्द्वित्रैरेव प्रसिद्धिमाप्नोति कश्चिदिह।।**

He has always sympathy towards the downtrodden society. In the following verse the mud represents such society. The poet feels that

though it is the fact that mud can never get the status of the sandal in the society still it has its own importance, for no one else is able to produce lotus except the mud. This view has been shaped in the poem titled पङ्कः. Here I quote one verse for our readers :

कथमपि पङ्कः शक्तो न चन्दनस्यास्पदं क्वचिल्लब्धुम्।
पङ्कजमुत्पादयितुं न कोऽपि शक्तोऽन्तरा पङ्कम्।।

Dr. Pathak feels that the poet's imagination has got wings to fly over the sky. Therefore, the poets would never tolerate to be prisoned in the cage, as he says in the poem titled कल्पना :

नभ उत्पतितुं पक्षतिरुपलब्धा जगति कल्पनाऽस्माभिः।
कवयो वयं खगास्ते न पञ्जरं सोढुमर्हा ये।।

His poetic environment is well recorded in one of his famous poem's of this volume titled : कविता तदा मनसि मे समुन्मीलति, where he points out when exactly he is tempted to write a poetry . He puts forth more than a dozon sheds in this context, of which I will quote only a couple of couplets. The clouds have been attracting our Sanskrit poets even before Kālidāsa. The poet Dr. Pathak is not an exception to it and he opens this poem with a fine description of clouds, as he says :

यदा नभसि कोणतः क्वचन काऽपि कादम्बिनी
प्रगर्जितपरायणा स्फुरितविद्युदाडम्बरा।
प्रनर्तितमयूरका शिखरिशृङ्गमालिङ्गति
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।

In fact, from this particular poem and from similar other poems of the present volume it appears that the poet is appreciably a minute observer of the nature and its beautiful creation. In the following verse he sketches a very good picture of natural environment as he says :

यदाऽधिदिवसान्तमाकुलतया प्रतीक्षापरान्
अजातमृदुपक्षकान्निजशिशून् कुलायस्थितान्।
प्रतर्पयति शालिभिः खगवधूः सुदूरगता
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।

Impatience and intolerance is the main concern of the present day. The poet is well aware of this fact. To point out the tendency of the intolerance of the people of the present generation, he says in the poem entitled असहिष्णुता :

**असहिष्णुत्वमिदानीं मन्ये प्रत्येकमिह जने व्याप्तम्।**
**नगरग्रामाः सर्वेऽग्निपरीता हन्त दृश्यन्ते।।**

Dr. Pathak is in favour of linking Sanskrit to a common man instead of accepting it as a language of sophisticated intellectual people. He feels very bad when some one accuses Sanskrit as out-dated before him. He tries to reply him through the present verse under the title : संस्कृतम् by describing Sanskrit as the life of each and every Indian :

**केचिदुपेक्षन्ते बत संस्कृतमिह यातयाममिति मत्वा।**
**प्राणिति वस्तुत एतत् प्रत्येकं भारतीयेषु।।**

The concept of humanity is being ridiculed many ways in the present time. In fact, it has lost its meaning in the selfish society of ours. The poet feels that there was a time when the garden of humanity used to be adorned and inscented but now it is being crushed under the feet. In the poem, titled as मानवता in this volume, the poet says :

**सन्ततमिदं ययाऽऽसीदुद्यानं सुरभि शोभमानञ्च।**
**पददलिता सा क्लिश्यति हन्त वरमिह मानवता।।**

For कविता he has his own definitions. About his own poems, he presumes that whatever he sees in a flash of moment while closing his eyes in isolation, is called a poem. His following verse, titled कविता, desribes :

**यत्पश्यामि स्वदृशोर्विनिमीलितयोर्मुहूर्तमेकान्ते।**
**प्रायस्तदेव मन्ये कवितापदमादधाति मम।।**

He feels that a poem should be written in the colloquial language which can be well-understood by a common man. In the poem कविता जनसामान्यस्य भाषयाम् he says :

जनसामान्यः कवितां यद्यपि श्रोतुकाम आभाति।
भाव्यं परं कवितया जनसामान्यस्य भाषायाम्।।

Self pleasure is the main purpose behind his creation. He says, it is not the fact that I write because a like-minded man will read my poems. On the contrary, I write for my self-pleasure. The poem, titled स्वान्तःसुखम्, has the following lines to be quoted :

श्रोष्यति समानधर्मा यत्कवितामिति न रे प्रवृत्तः स्याः।
स्वान्तःसुखाय नैके कवयन्तोऽद्यापि दृश्यन्ते।।

He believes in self assessment of his poems, as he says although the metres of my poems are almost scattered now-a-days still it is very strange that the people do call me a poet even today :

व्याकीर्णतां गतानि प्रायश्छन्दांसि यस्य कवितायाः।
तमपि जगन्नाथं यत् कविरित्याहुस्तदाश्चर्यम्।।

Every writer has his own style by which he can be identified. Dr. Pathak is not an exception to it. His creative writings can also be easily recognised through his unique style and language which leave a permanent impact on his readers. He seems to be in favour of simple expression with deep thoughts. The scholarly poet, critic and Historian Dr. Pathak can be accepted as a guide for writers of new generation because of his unmatching poetic creations.

Every writing has a purpose behind its creation. The main purpose of Dr. Pathak's writings is to gain self-pleasure as he declars in Drik - 10 under the title 'why do I write'.

Before I conclude, I would like to acknowledge the persons and Institutions who have co-operated either to the original writer or to the editor of this volume :

The volume is composed by the poet under the 'writer in residence' scheme of Sahitya Akademi, New Delhi. I would like to utilize this opportunity to thank Sahitya Akademi on behalf of the author Dr. Jagannath Pathak. For the publication of the volume, the sole credit goes to Prof.

Radhavallabh Tripathi, the vice Chancellor of Rashtriya Sanskrit Sansthan, who has accepted my proposal to publish the volume under the esteemed banner of Sansthan. The title जगन्नाथसुभाषितम् is well suggested by Dr. Kishore Nath Jha for which he deserves our special thanks. I will certainly fail in my duty if I do not thank prof. Ramakanta Shukla who has kindly agreed to go through the final shape of the work and for suggesting necessary amendmends wherever required. Last but not the least, I would like to thank my research student Shri Manas Sharan Tiwari for helping me in proof-reading at initial stage.

Before I stop, I would like to express my regard and gratitude to the poet Dr. Jagannath Pathak for allowing me to edit this volume. I not only hope but believe that his present anthology of आर्या-s and few other metres used occasionall, will prove as a great contribution to the field of contemporary creative writings. I pray to the almighty lord जगन्नाथ to bestow the author with a long.. long.... healthy life.

**Banamali Biswal**

# कवितानुसन्धानम्


**जगन्नाथसुभाषितम् ( भागः - 1 )** **1-86**

1. आदिकविर्वाल्मीकिः 3
2. हे कालिदास ! 6
3. कविकुलगुरो! यदि स्वदेशस्त्वमागच्छेः 9
4. पण्डितराज-प्रशस्ति-शतकम् 14
5. भट्टमथुरानाथ/मंजुनाथ-प्रशस्तिः 26
6. दाराशिकोहः 29
7. कविता तदा मे मनसि समुन्मीलति 32
8. हे घनश्याम! (1) 36
9. हे घनश्याम! (2) 39
10. सर्वज्ञः 41
11. गङ्गाया व्यथितम् 46
12. अक्षयवटस्य व्यथा 49
13. वाग्देवताया व्यथितम् 52
14. काकानां व्यथितम् 55
15. पङ्कस्य सुखम् 58
16. दीपावली 60
17. गजेन्द्र-मोक्षः 63
18. हंसान् प्रति 66
19. मानवते! 68
20. दिनेष्वेषु 71
21. दाण्डी-यात्रा 74
22. ग्रामटिका 77
23. सम्मार्जनी 80
24. दलित-प्रसङ्गः 83

**जगन्नाथसुभाषितम् ( भागः - 2 )** **87-443**

**जगन्नाथसुभाषितम् ( भागः - 3 )** **445-548**

**परिशिष्टम्** जगन्नाथसुभाषित-पद्यानाम् अकारादिक्रमसूची 549-618

# जगन्नाथसुभाशितम्

(भागः - 1)

# आदिकविर्वाल्मीकिः

वाल्मीकेर्निर्माणं रामो रामस्य वाऽथ वाल्मीकिः।
निर्धारयितुमशक्यं कः कारणमथ च कः कार्यम्।।1।।

व्यासः कृपाकटाक्षो मन्ये जगतीह काऽपि वाग्देव्याः।
आदिकविर्वाल्मीकिः किमपि प्रतिभाति मृदु हसितम्।।2।।

एकत उत्तुङ्गतमो विराजमानो हिमालयो व्यासः।
वाल्मीकिरन्यतो नः कश्चिद् रत्नाकरोऽगाधः।।3।।

अद्यत्वेऽप्यादिकवेर्महीयसी कल्पनेव जागर्ति।
भारतमस्माकं स्याद् यत्किञ्चिद् रामराज्यमिति।।4।।

आदिकवेर्वाल्मीकेरनुसन्धानं नु तावदेकमिह।
स्वच्छः परमादर्शो रामाख्यः सन्मनुष्य इति।।5।।

अस्या भुव आर्याणां सनातनो नाम कश्चिदादर्शः।
धर्मो विग्रहवानिति रामो नामेह वाल्मीकेः।।6।।

यस्याश्रममुपगम्य स्वं रक्षितमन्ततोऽनुभूतवती।
पुत्री भारतभूमेः स जयति वाल्मीकिरादिकविः।।7।।

गृहिणी गृहान्निरस्ता न परं मनसः कदाचिदिह येन।
वाल्मीकेर्निर्माणं स जयति रामः सदादर्शः।।8।।

चक्रद्वयमिति मन्ये भारतनाम्नो रथस्य महतोऽस्य।
एको भगवान् व्यास:, भगवान् वाल्मीकिरन्यश्च।।9।।

आदिकविर्वाल्मीकी रत्नानामाकरो नु सत्यमिति।
यमुपेत्य भारतश्रीरद्यत्वेऽपीयमुल्लसति।।10।।

पश्यन्तु भारतेऽस्मिन् वाल्मीकिव्यासनूपुरोल्लसितम्।
वाग्देवी नृत्यपरा क्वणितं पदमादधातीव।।11।।

इह कालिदासचेत:सद्मनि मूर्ति: प्रतिष्ठिता भाति।
यैका काचिन्मन्ये वाल्मीके: सा किलादिकवे:।।12।।

वाल्मीकेराश्रम इति भारतदेशो महान् समुल्लसति।
रामं प्रतीक्षमाणा यस्मिन् सीता प्रजागर्ति।।13।।

प्रकटीभवति कदाचिद् यो मन्ये कालिदासतां प्राप्य।
भवभूति: सन् स्फुटतामेति च य: सोऽस्ति वाल्मीकि:।।14।।

सीताया रामस्य च यस्मिन्नेकत्र सङ्गमो भाति।
वाल्मीके: सुविरचितं मन्ये कोऽपि प्रयागस्तत्।।15।।

वाल्मीकीयं सुरचितमकर्दमं तीर्थमेकमिति मन्ये।
सुस्नात: खलु यस्मिन् वाचालो भवति मूकोऽपि।।16।।

वाग्देव्या: प्रासादो रामायणमस्ति कोऽपि वाल्मीके:।
अधिरुह्य यं सुमतयो वाचस्पतयो भवन्तीह।।17।।

वाल्मीके रामायणमस्त्वथवा मानसं सर: किमपि।
यस्मिन् सुधियो हंसा रममाणा: सततमीक्ष्यन्ते।।18।।

सन्त्ववतारा: कामं केचित् कवयोऽत्र नाम वाल्मीके:।
वाल्मीकिस्तु महर्षिर्वाग्देव्या: कश्चिदवतार:।।19।।

तेन जितं स कृती त: समीहितं नाम तस्य संसिद्धम्।
वाल्मीके रामायणमालयमभ्यस्तमिह येन।।20।।

पुस्तकमात्रं किञ्चिद् रामायणमस्ति नैव वाल्मीके:।
मूर्तिमती संस्कृतिरिह मन्ये तद् भारतीयेति।।21।।

अन्विष्यथ क्व यूयं लोके सुधिय: ! सुवर्णमेतस्मिन्।
वाल्मीके: प्रत्येकं पश्यत वर्णं सुवर्णमिति।।22।।

रामायणमास्वादितममृतं स्यादेवमेव सुस्वादु।
अमृता वयमिति सत्यं मृत्युरकिञ्चित्करोऽस्माकम्।।23।।

रामायणानि दीपा: प्रवर्तिता लोकत: शतं यस्मात्।
रामायणप्रदीप: स जयति कोऽपीह वाल्मीके:।।24।।

वस्तुत एव स्वादुर्गीर्वाणानां सुसंस्कृता वाणी।
रामायणञ्च तस्यां वाल्मीकेर्नाम सुस्वादु।।25।।

## हे कालिदास !

वीणावादिनि! वीणावादनतस्तावता भवेर्विरता।
हृदि कालिदासकविताक्षराणि किमपि ध्वनन्तीव।।1।।

व्यासे प्रतपति सूर्ये वाल्मीकौ विलसतीह चन्द्रे च।
दीपशिखेयं कापि स्फुरत्तया स्फुरति निजयैव।।2।।

वाल्मीकिनाम्नि विद्यापीठे प्रविधाय वादनाभ्यासम्।
वाग्देव्या वीणायां स कालिदासः कृतः स्पर्शः।।3।।

त्वामासाद्य प्रायो नवा पुराणीति भेदमुन्मुच्य।
कविता नवेव जाता सद्यःस्नाता सुरमणीव।।4।।

कवितैव कालिदासः कविता वा कालिदास एवेति।
चित्तात् सामान्यधियां नाद्यावधि निर्गता भ्रान्तिः।।5।।

शाकुन्तलमथवा स्यात् तव सुकवे मेघदूतमथवा स्यात्।
वाग्देव्या वीणायाः कोऽपि प्रतिभाति झङ्कारः।।6।।

वाग्देवीं सेवन्ते लोके प्रायः कवित्वमधिगन्तुम्।
इह वृतवतीव साक्षाद् वाग्देवी सोपगत्य त्वाम्।।7।।

चन्द्रकिरणसूत्रैरिव शब्दसुमनसां विभिन्नवर्णानाम्।
निबिडा म्लानिमनाप्ता काव्यमहास्रक् त्वया ग्रथिता।।8।।

भारतपारावारो भारतनामा नगाधिराजो वा।
निजयाऽगाधतया वा स्वौन्नत्येन त्वयि स्फुरत:।।9।।

न विलासिनीति काचिन्न भामिनीतीह नाबलेत्यपि च।
सुपदन्यासा नारी त्वयि या स्निग्धा च मुग्धा च।।10।।

लोके केनचिदस्मिन् तमसा व्याप्ते तु सूचिभेद्येन।
का चिन्ता यदि काचिद् दीपशिखैकेह जागर्ति।।11।।

सौन्दर्यं शाकुन्तलमादाय स्नेहसत्यसंवलिता।
साक्षाच्छिवा भवानी दीपशिखैका समुल्लसति।।12।।

वाल्मीक्याश्रमबद्धा गुणैस्तवोपस्नुतेव सुस्निग्धा।
त्वां कालिदास! वत्सं स्तन्यमपाययत कामगवी।।13।।

मालविकायां नृत्यसि शकुन्तलायां प्रभासि गानपर:।
वाद्यध्वनिमातनुषे स्वर्लोकीयं त्वमुर्वश्याम्।।14।।

न स्वर्गं न च कमपि स्वर्लोकमिव प्रकाशमानमिह।
स्वान् परमत्र सहृदयान् रामगिरेराश्रमान्नयसि।।15।।

परिशुद्धं सत्याग्नौ शिवया सम्मार्जितञ्च भावनया।
स्वं सुन्दरमुपनयसि त्वं सहृदयहृदयगोचरताम्।।16।।

कालक्रमेण विस्मृतिमन्ये याता: सहस्रश: कवय:।
त्वद्वाङ्मयं सहृदया अद्यावधि दधति हृदयेन।।17।।

स्वस्मिन्नुत्पन्नं त्वामविजानन् यत्र तत्र जगतीह।
अन्विष्यन्निव विचरति वाङ्मयनामा मृग: कश्चित्।।18।।

काल्या बहवो दासाः स्मर्यन्ते हन्त नेतिहासगताः।
कश्चित्स कालिदासस्त्वं स्मृतिपथमेक आयासि।।19।।

उज्जयिनीवास्तव्यस्त्वय्यार्द्रः कोऽप्यहो महान् कालः।।
त्वय्यक्षिकोण एको दासे पतितोऽथवा काल्याः।।20।।

यद्यपि तव कवितायां विराजमानं निपीय विश्वमिव।
स्वच्छविमादर्श इव प्रेक्षत इह भारतं तदपि।।21।।

## कविकुलगुरो ! यदि स्वदेशस्त्वमागच्छेः !

कविकुलगुरो! स्वदेशं प्रावृषि यदि भारतं त्वमागच्छेः।
देशस्य वर्तमानं खिन्नः स्याः स्वस्य परिलक्ष्य।।1।।

स्निग्धच्छायातरवो वैदेहीस्नानपुण्यसलिलास्ते।
नैवाश्रमा मिलेयू रामगिरेस्तेषु शृङ्गेषु।।2।।

आषाढस्य प्रथमे दिवसे प्रशमेऽपि वा समायाते।
वप्रक्रीडा-परिणतगज इव मेघो न दृश्येत।।3।।

सततं क्वचिदतिवृष्टिः सततमनावृष्टिरपि च कुत्रापि।
परिवर्तनमनुभूतं भविता मेघस्य तत्प्रकृतौ।।4।।

पुञ्जितधूम इवायं विचरति गगने न वस्तुतो जलदः।
सन्तप्तानां शरणं विद्धि न भविता कथञ्चिदपि।।5।।

न मिलेन्मेघेन समं त्वद्यात्रायां कदाचिदनुकूलः।
मन्दं मन्दञ्च नुदन् सहचर इव कोऽपि ते पवनः।।6।।

नापि सगन्धः कश्चिन्मिलेदितश्चातको नदन् मधुरम्।
नहि बद्धपङ्क्तयस्त्वां सेविष्यन्ते बलाकाश्च।।7।।

घनगर्जितं न जनयति कन्दलिकां भूमितो दिनेष्वेषु।
उड्डयमाना गगने न राजहंसाश्च दृश्यन्ते।।8।

श्रीरघुपतेः पदाङ्का रामगिरेर्मेखलासु ये दृष्टाः।
द्रक्ष्यन्ते ते साम्प्रतमायातेन त्वया न पुनः॥9॥

मुञ्चत्युष्णं बाष्पं रामगिरिर्नैष मेघयोगेऽपि।
येन स्नेहव्यक्तिर्भवतु जडस्यास्य यत्किञ्चित्॥10॥

खिन्नः खिन्नः शिखरिषु येषु पदं न्यस्य हन्त गन्तासि।
परिलघुवारीणि न ते तेषु स्रोतांसि मिलितारः॥11॥

पुनरायातो भूमौ कविर्महान् स इह कालिदास इति।
परिचेतुः कस्यापि त्वयि न स्याद् दृष्टिपातोऽपि॥12॥

आखण्डलस्य पुरतो वल्मीकाग्रान्मनोहरं प्रभवत्।
न द्रष्टासि क्वचिदपि पुनस्त्वमिह रे धनुःखण्डम्॥13॥

मेघं प्रतीक्षमाणा जनपदवध्वोऽम्बराद् दिनेष्वेषु।
दृष्टीर्निजा निराशा निवारयन्त्यश्च दृश्यन्ते॥14॥

सद्यः सीरोत्कषणान्मालक्षेत्रं सुगन्धि यदपश्यः।
वर्षाभावात् सम्प्रति तन्मरुतां प्राप्तमाभाति॥15॥

यं पूर्वमाम्रकूटं सुसानुमन्तं कदाचिदद्राक्षः।
स वनोपपप्लवततिभिस्त्वयाऽतिविकलः समाश्वास्यः॥16॥

अद्राक्षो यां रेवां सुविशीर्णां विषमविन्ध्यपादेषु।
आभाति साम्प्रतं सा वर्षाभावान्निमीलन्ती॥17॥

मदभरिता वन्यगजास्तटेषु तस्या न हन्त विचरन्ति।
उच्छिन्नानि च सम्प्रति जम्बूकुञ्जानि रम्याणि॥18॥

क्व हरितकपिशा नीपाः कन्दल्यश्चानुकच्छमुन्मुकुलाः।
क्व भुवो गन्धस्तादृक् सारङ्गास्तादृशश्च कुतः।।19।।

ककुभसुरभयो गिरयः क्व क्व क्षेपो भवेच्च कालस्य।
शुक्लापाङ्गाः क्व च ते य इह तव स्वागतं कुर्युः।।20।।

केतककुसुमैर्विहिता उपवनवृतयः क्व ता दशार्णेषु।
बलिभुङ्नीडारम्भैः कृताकुलास्तद्वसतयः क्व।।21।।

परिणतजम्बूश्यामाः क्व वनान्तास्तेऽधुना दशार्णानाम्।
प्रावृषि कतिपय-दिवसस्वीकृतवासाश्च हंसाः क्व।।22।।

तेषां विदिशानाम्नी रम्येदानीञ्च राजधानी क्व।
मुखमिव सभ्रूभङ्गं क्व वेत्रवत्याश्च जलं सोर्मि।।23।।

प्रावृषि विश्रामः स्यान्नीचैराख्ये गिरौ कृतः पूर्वम्।
क्व कदम्बानां सम्प्रति रम्यत्वं प्रौढपुष्पाणाम्।।24।।

तानि शिलावेश्मानि क्व नागराणां विलासमुद्दामम्।
प्रथयन्ति स्म परिमलैर्मन्ये भवता च दृष्टानि।।25।।

द्रष्टासि क्वेदानीं कानन-सरितां तटेषु रूढानि।
विततान्युद्यानानां सुयूथिका-जालकानि क्व।।26।।

स्वेदाम्भःसंसिक्ता गण्डस्थल्योऽभवन् श्रमाद् यासाम्।
क्वैतर्हि पुष्पलाव्यो निभालिता यास्त्वया पूर्वम्।।27।।

उज्जयिनीं प्रति मन्ये समधिकमाकर्षणं भवन्मनसि।
दिवसेष्वेषु तु दृष्टा कुर्यान्न भवन्तमाकृष्टम्।।28।।

सौधोत्सङ्गास्तस्याः सम्प्रति ते हन्त नावशिष्यन्ते।
लोलापाङ्गैर्यस्यां त्वमरंसीर्नागरस्त्रीणाम्।।29।।

निर्विन्ध्यायां मन्ये संसर्पन्त्यां त्वयेह विहृतं स्यात्।
सा न त्वामाकर्षेद् भूयः स्पृष्टा च दृष्टा च।।30।।

नावन्तिष्वद्यत्वे ग्रामेष्वेकोऽपि वा मिलेद् वृद्धः।
उदयनसम्बद्धानां सुकथानां कोविदो यः स्यात्।।31।।

सैव श्रिया विशालाऽद्याप्युज्जयिनी विराजते नूनम्।
न पुनर्वक्तासि दिवः सुकान्तिमत् खण्डमेकमिति।।32।।

अध्युज्जयिनि प्रवहति तरङ्गिणी सैव किञ्च शिप्राऽपि।
तस्याः कलनिर्ह्रादान् द्रष्टासि न सारसांस्तीरे।।33।।

यद्यपि हर्म्येष्वस्या नेष्यसि भूयो निजाध्वनः खेदम्।
न तथापि गृहमयूरान् द्रष्टासि च नृत्यतः क्वचन।।34।।

चण्डीश्वरस्य धाम द्रष्टुं त्वं भूय एव गन्तासि।
कविकुलगुरूकृतस्त्वं त्रिभुवनगुरुणाऽसि तेनैव।।35।।

पटहादिनादभरितां सन्ध्यानीराजनां गिरीशस्य।
काले द्रष्टासि पुनस्त्वमपि महाकालमासाद्य।।36।।

उज्जयिनीं न त्यक्तुं मन्ये शक्तो भवान् कथञ्चिदपि।
विषयान् स्वदृष्टपूर्वानौत्सुक्यं गन्तुमीरयिता।।37।।

गम्भीराया न पयश्चित्तमिवेह प्रसन्नमाभाति।
नाकर्दमानि तस्या द्रक्ष्यसि कुत्रापि तीर्थानि।।38।।

यद्यपि स दृष्टपूर्वो देवगिरिस्त्वां कदाचिदाकर्षेत्।
तत्र तथापि कुतश्चिन्न काननोदुम्बरान् पश्येः।।39।।

स्कन्दः स तत्र भगवान् त्वया न लभ्येत हन्त कृतवसतिः।
हन्त न तस्य कुतश्चित् त्वया मयूरोऽपि दृष्टः स्यात्।।40।।

भुवि परिणतेव कीर्तिः स्रोतोमूर्त्येह रन्तिदेवस्य।
चर्मण्वती न सुखयेद् दृग्गोचरतां गताऽपि त्वाम्।।41।।

सुपरिचितभ्रूवल्ली-सुविभ्रमाः काश्चिदथ च भूयस्त्वाम्।
दशपुरवध्वः कथमपि पश्येयुर्वा न पश्येयुः।।42।।

ब्रह्मावर्तं जनपदमथ दर्शं दर्शमेव गन्तासि।
प्राप्स्यसि धर्मक्षेत्रं भूयस्तावत् कुरुक्षेत्रम्।।43।।

न पुनर्द्रष्टासि त्वं सरस्वतीं पावनीं नदीं तत्र।
अन्वभवः स्वं पूतं यस्याः परिपीय तोयानि।।44।।

अनुकनखलं वहन्तीं द्रक्ष्यसि गङ्गामवश्यमेव त्वम्।
न परं मिलेत् कदाचित् तथा प्रसन्ना च रुचिरा च।।45।।

अग्रे हिमालयञ्च द्रष्टासि त्वं गिरिञ्च कैलासम्।
अपनेष्यति तद्द्वयमपि तव मन्ये खेदमत्यर्थम्।।46।।

स्मारं स्मारं सुकवे! भगवन्तं नीललोहितं देवम्।
प्रस्थास्यसि त्वमाशिषमादायेतः शुभां पित्रोः।।47।।

# पण्डितराज-प्रशस्ति-शतकम्

संस्कृतकाव्यहिमाद्रेर्मन्ये शिखराणि सन्त्यनेकानि।
पण्डितराजो राजत उत्तुङ्गे तेषु चैकस्मिन्॥1॥

निर्माणालोचनयोः काचित् सूक्ष्मेक्षिका सुकवितायाः।
पण्डितराजे साकं प्रतिभानेनैव जागर्ति॥2॥

पण्डितराजप्रतिभा-महासमुद्रस्य काचिदेवैताः।
स्नानकृतां सुखकर्यो लहर्य आतन्वते शोभाम्॥3॥

शास्त्रीयं पाण्डित्यं कवित्वमित्युभयमेव संश्लिष्टम्।
निःसंशयमाश्रयते पण्डितराजे परां काष्ठाम्॥4॥

कामं दीपशिखाकविरास्तां सुकटाक्ष एव वाग्देव्याः।
ताम्बूलरञ्जितं स्मितमिति पण्डितराजमाशंसे॥5॥

दैन्यं दिवौकसां पुर आकलनीयं यथैव निःसीमम्।
पण्डितराजे विदुषां पुरस्तथा गर्व उद्दामः॥6॥

मृगपतिरूपः क्वचन क्वचन सुगतिको मरालरूपश्च।
अन्योक्त्या स्वं प्रथयन् पण्डितराजो मनोहरति॥7॥

साहित्याकाशस्य त्वं कश्चित् पूर्णिमाशरच्चन्द्रः।
न कलङ्कादात्मानं शक्तो मोचयितुमभवस्त्वम्॥8॥

त्वामेव नृत्यकाले वाग्देवी नूपुरीकरोतीव।
कथमन्यथा त्वदीयं काव्यं झङ्कारमावहति।।9।।

आलङ्कारिकगोष्ठ्यां प्रायोऽद्यत्वेऽपि जायमानानाम्।
प्रश्नानां यत्किञ्चित् त्वमेव सिद्धं समाधानम्।।10।।

रसगङ्गाधरनाम्नि ग्रन्थाब्धौ सर्वकाव्यसिद्धान्ताः।
गाङ्गा इव प्रवाहा निपत्य तिष्ठन्ति संल्लीनाः।।11।।

कोऽपि विलासानुभवो भामिन्यास्तावकोऽस्ति कस्याश्चित्।
हृदयखनेरिव मन्ये रत्नान्युदितानि विविधानि।।12।।

पण्डितराजेऽस्माकं हृदयप्रासाददेशमधिरूढे।
आनन्दवर्धनोऽसावानन्दं न प्रवर्धयति।।13।।

जगति जगन्नाथा इह नैकेऽभूवंश्च सन्ति च स्युश्च।
स परं पण्डितराजो नाभून्नास्ति न स्याच्च।।14।।

मम्मट गृहाण मौनं क्वचिदपसर विश्वनाथ दूरे त्वम्।
जृम्भामातन्वानः पण्डितराजोऽत्र जागर्ति।।15।।

काव्यविचारक्षेत्रं दैवातपतप्तमेषु दिवसेषु।
सम्प्रति पण्डितराजाभिख्याऽस्माकं कादम्बिनी शरणम्।।16।।

सहृदयहृदयसरोवरमतिमात्रं शुष्कमेषु दिवसेषु।
पण्डितराजसुनामा वर्षतु कश्चिद् घनश्यामः।।17।।

साहित्योद्यानाद् बत यावत् त्वं निर्गतो वसन्त इव।
उत्कूजितवान् नाद्यावधि तावत् कोकिलः कश्चित्।।18।।

त्वत्पाण्डित्यकवितयोरेको यः प्रातिनिध्यमाचरति।
रसगङ्गाधरनामा मणिः स लोके चिरं लसतु।।19।।

पाण्डित्यातपयोगे ज्वलसि त्वं कोऽपि सूर्यकान्त इव।
सुकवित्वचन्द्रिकायां द्रवसि त्वं चन्द्रकान्त इव।।20।।

दिल्लीवल्लभपाणिच्छायायां यन्नवं वयो नीतम्।
तत्तव लोकोत्तरता पण्डितराज! प्रतीतैव।।21।।

यवनीमुखपद्मानां मधुगन्धः सेवितस्त्वया नूनम्।
त्वद्भणितिषु मदकृत्त्वं यदनुभवन्तीह मर्मज्ञाः।।22।।

रसगङ्गाधरनामा ग्रन्थमृगेन्द्रो यदैव जागर्ति।
इतरेऽलङ्कारमृगास्तदैव तिष्ठन्ति संछन्नाः।।23।।

श्रीकालिदासकविताऽऽधुनिकैः श्रव्या तथा च मन्तव्या।
पण्डितराजकवित्वं परं निदिध्यासितव्यमिह।।24।।

कस्याश्चिद्दुर्दृष्टेः किन्तु जगन्नाथ! पात्रमधुनाऽसि।
त्वद्वदनान्निर्यान्ति न शब्दा गङ्गालहर्य इव।।25।।

एषु प्रत्येकं तव हृद् भाति प्रज्वलन् प्रदीप इव।
नैतानि तावकानि स्तोत्राणि स्तोत्रमात्राणि।।26।।

सारस्वतवाग्धारा पण्डितराजस्य दाक्षिणात्यस्य।
निर्मितवती प्रयागं गङ्गां यमुनाञ्च सम्प्राप्ता।।27।।

पण्डितराजस्यायं 'मुंगंडा' नाम-जन्मभूर्ग्रामः।
दृक्पथमानीतो द्राक् पूतानस्मान् प्रविदधातु।।27क।।

ग्रामादस्माज्ज्योतिः पण्डितराजाख्यमेकमुदियाय।
अधिसंस्कृतसाहित्यं निवारितं तत् तमस्तेन।।28।।

पण्डितराज इति त्वं येभ्यः सम्मानमधिकमधिगतवान्।
तेभ्यस्तव सङ्कोचं वाङ् निर्यान्त्यन्वभूदेव।।29।।

वाचां न तव विलासो मन्ये यद्भामिनीविलास इति।
तव हृत्समुद्रमथनादुद्भूतं तत् किमप्यमृतम्।।30।।

तव भामिनीविलासाकलनं यैर्नाम जीवने न कृतम्।
कवितासौन्दर्यस्य ज्ञानं तेषामपूर्णमिव।।31।।

गङ्गा यमुना लक्ष्मीर्विष्णुः सूर्यस्त्वया स्तुताश्चैते।
किमभीष्टमन्यदासीत् स्तुतस्त्वया यत् स दिल्लीशः।।32।।

अपि दारिद्र्यं हेतुः सुखभोगेच्छा तवैहिकी हेतुः।
दृष्टौ यदभिन्नाविति कथन्नु जगदीशदिल्लीशौ।।33।।

दिल्लीनाथं कञ्चित् स जगन्नाथः कथञ्चिदनुगच्छेत्।
अस्माकं त्वद्विषये यत्किञ्चिच्चिन्त्यमेतर्हि।।34।।

योऽसि त्वं सोऽसि त्वं कोऽप्यादरणीयतां गतो नस्त्वम्।
पण्डितराज त्वाम्प्रति काचिदपूर्वाऽस्ति नः प्रीतिः।।35।।

श्रीकृष्णं प्रति रागो यस्ते मथुरां प्रतीह याऽऽसक्तिः।
साऽऽसक्तिः स च रागस्त्वाम्प्रति नः पण्डितेन्द्र! स्यात्।।36।।

पायं पायं कश्चित् पण्डितराजस्य जगति काव्यमधु।
मत्तो न परो मत्तः कोऽपीति प्रीतिमावहति।।37।।

भौतिकमस्तित्वं ते पण्डितराज! क्वचिद्विलीनमितः।
वाङ्मयमस्तित्वं तु प्रकाशमानं प्रदीप इव।।38।।

कृष्टं वर्त्म यदेकं पण्डितराज! त्वयेत एकेन।
तत्र न गतानुगतिको भविता मन्ये महार्घ इह।।39।।

सौन्दर्यस्य द्रष्टा पण्डितराज! त्वमेक एवासीः।
याते त्वय्युद्यानं जीर्णारण्यत्वमापन्नम्।।40।।

असकृत्तवानुभावः सूचीभिर्हन्त विद्ध आभाति।
अपि हे पण्डितराज! त्वया सकृन्नाम हसितमिह।।41।।

तव भामिनीविलासेऽस्माकमवाप्ते श्रुतेः सृतिं तावत्।
अन्ये कवयो नैव स्मृतिपथमस्माकमायान्ति।।42।।

बद्धः पण्डितराज! त्वत्कविताजालके वराकोऽयम्।
अस्मन्मनोमृगो न क्वचिदन्यत्रापसरतीव।।43।।

पण्डितराज! क्वचन त्वया कृतं नैव बद्धमुष्टित्वम्।
उद्घाटितमिव पुस्तकमनुभावस्तावकीन इह।।44।।

परितस्त्वां नवपद्मैर्यदपि स्फुटितञ्च नूपुरै रणितम्।
पण्डितराज! तदपि ते मनसा यमुनातटे रमितम्।।45।।

तर्कास्त्वन्मतिमिलिताः पण्डितराज! प्रयान्ति शास्त्रत्वम्।
त्वल्लेखन्या स्पृष्टौ भवतः कवितेह शब्दार्थौ।।46।।

कामं दीपशिखेति प्रसिद्धिरास्तां नु कालिदासस्य।
काव्याम्बरसञ्चारी कश्चित्त्वं पूर्णिमाचन्द्रः।।47।।

रसगङ्गाधरनामा ग्रन्थो नहि पूर्णतां त्वया नीत:।
पण्डितराज! न पण्डितराजत्वं तेन ते छिन्नम्।।48।।

काऽऽसीन्मनोऽभिरामा तव रे वद तावकीनकवितेव।
भामिन्येह यया सह कृतो विलासस्त्वया जगति।।49।।

विप्रेष्वासीस्तेषु त्वमपि य इह तत्त्वमेकमपि सत् तत्।
मन्वाना: प्रणमन्ति त्वद्भक्तिभेदेन सर्वसुरान्।।50।।

प्रज्वलित: क्षणमासीदनुभावस्तावकीन इति मन्ये।
धूमायितेव चिरमिह पण्डितराज! स्थितिर्न मता ।।51।।

यदि तावदेतदुक्त्वा विरम्यते पण्डितेन्द्र! तव विषये।
वचसोऽसामर्थ्यादिह न तव गुणानामियत्तेति।।52।।

पण्डितराज श्रुत्वा त्वत्स्तोत्राणि द्रवन्ति हृदयानि।
गङ्गाकालिन्द्योरिह दशाऽभवत् का स्वयं द्रुतयो:।।53।।

अरमत काव्योद्याने व्यचरद् य: शास्त्रकठिनकान्तारे।
निर्द्वन्द्वं सममेव स पण्डितराजो जगन्नाथ:।।54।।

रमणीयार्थान् न्यस्ता: काव्ये प्रतिपादयन्ति यच्छब्दा:।
वाग्देवतावतार: पण्डितराज: स जयतीह।।55।।

सद्वचसां श्लाघायां वाचंयमता न कस्य दृष्टेह।
हृदि धारयन्ति सन्तो यद्भणिती: पण्डितेन्द्र: स:।।56।।

पण्डितराजप्रतिभान्विता सुकविता हृदि व्यवस्थाप्य।
अन्येषां कविताया: सन्तो नैव स्मरन्तीह।।57।।

कूजति पिकः कदाचिद् हुङ्कुरुते केसरी कदाचिच्च।
पण्डितराजकवित्वं सचेतसः शृण्वतो हृदये।।58।।

निस्तेजसि भवभूतौ माघश्रीहर्षयोश्च निष्प्रभयोः।
पण्डितराजाभिख्या स्फुरत्तयैव स्वया स्फुरति।।59।।

हृदि यत् त्वयाऽनुभूतं प्रकाशितं तद् विनैव सङ्कोचम्।
भिन्नः पण्डितराज! त्वमनेनान्येभ्य आभासि।।60।।

काश्यां मथुरायां वा किञ्च जगन्नाथ! तावकं दिल्ल्याम्।
शार्दूलीयं दृष्टं मुग्धं विक्रीडितं लोकैः।।61।।

यद्यपि मनोभिरामा त्वत्पत्नी तावकीनकवितेव।
याता दिवं तथापि त्वं न त्यक्तः कवितयाऽऽसीः।।62।।

स्वनखानां पाण्डित्यं न प्रादर्शि त्वयेह कुत्रापि।
जागर्ति मृगपतित्वं जगति जगन्नाथ! सर्वत्र।।63।।

कवितैव केवलं ते न भाति लोकोत्तरा जगन्नाथ!
त्वज्जीवनमप्यासील्लोके लोकोत्तरं किञ्चित्।।64।।

यदपि स्तनन्धयस्त्वं लक्ष्म्या आसीरतीव बाल्ये स्वे।
आशैशवात् सुपीतं तदपि स्तन्यं सरस्वत्याः।।65।।

नैका गोष्ठ्यः साम्प्रतमपि प्रवर्तन्त एषु दिवसेषु।
पण्डितराज! न शोभाऽनुभूयते त्वद्विरहितासु।।66।।

मधुरः स कालिदासो माघो मधुरश्च भारविर्मधुरः।
संलग्नं नस्तु मनः पण्डितराजस्य माधुर्ये।।67।।

आदिकवित्वं बाल्ये शैशवकाले तु कालिदासत्वम्।
वाग्देवतेह युवतिः पण्डितराजत्वमापन्ना।।68।।

विमनायमान आसीदन्येषां हन्त काव्यविषये यः।
सन्धारयति सहृदयः पण्डितराजे स औत्सुक्यम्।।69।।

येषां हृदि न स्नेहो ये न च करुणार्द्रचेतसो जगति।
बोद्धुमनर्हाः कवितां पण्डितराज! त्वदीयां ते।।70।।

दाराशिकोह आसीत् राजकुमारः स बन्धुरत्नं ते।
पण्डितराज! स्वर्गं याते तस्मिंस्त्वया रुदितम्।।71।।

कामेश्वरी त्वदीया हृदीश्वरी स्वर्गता विहाय त्वाम्।
पण्डितराज! वियुक्तस्तया त्वया निर्भरं रुदितम्।।72।।

क्रूरैर्झञ्झावातैरुपशान्तोऽभून्न यः कदाचिदपि।
त्वद्वाङ्मयप्रदीपः सुधियां सोऽन्तर्हृदि ज्वलति।।73।।

अस्तित्वं कविता च द्वयमन्योन्याश्रितं तवेवासीत्।
अवबुद्धेनैकेन स्वयमवबुद्धं भवत्यन्यत्।।74।।

बोद्धृषु मात्सर्येण ग्रस्तेषु प्रभुषु दूषितेषु मदात्।
भर्तृहरेरिव मन्ये कोऽपि जगन्नाथ! तेऽनुभवः।।75।।

आसीस्त्वं मिश्रो वा भट्टो वा कोऽपि च त्रिशूली वा।
अस्मन्मते त्वमासीः पण्डितराजो जगन्नाथः।।76।।

न पदाघातस्सोढः कस्यापि स्वाभिमानिना येन।
पाण्डित्यवीर आसीत् स कोऽप्यपूर्वो जगन्नाथः।।77।।

तव पाण्डित्यं काव्ये केवलमासीन्न काव्यशास्त्रे च।
अधिसङ्गीतकलं ते प्रवृत्तिरपि नः श्रुतिं प्राप्ता।।78।।

त्वत्कवितां शृण्वानाः सुमधुरपदयोजनामयीं रसिकाः।
अर्थमजानाना अपि शिरांसि परिघूर्णयन्तीव।।79।।

येन त्वया जगत्यां क्रीडितमिह मानसे शुभे सरसि।
तेन त्वयोषितं हा भेकैरपि पल्वलेषु समम्।।80।।

पेरमभट्टात् स्वगुरोरधीतशास्त्रस्य ते महान् क्लेशः।
रसगङ्गाधरनाम्ना फलेन सुखरूपतां प्राप्तः।।81।।

चुम्बितवती मतिं ते कलिन्दकन्या तटद्रुमालम्बा।
कादम्बिनी नु काचन सदा वलयिता शतैस्तडिताम्।।82।।

सुतरामदृष्टपारा गङ्गायमुनावतारसम्भारा।
प्रवहति सतां हृदन्तः पण्डितराजस्य वाग्धारा।।83।।

मृद्वीकास्वादूनां मधुमधुराणां गिरां च निर्माणे।
सत्यं पण्डितराज! प्रसिद्ध इह मार्मिकस्त्वमसि।।84।।

त्वत्कविताप्रावरणे प्रायः सर्वात्मना त्वदस्तित्वम्।
सुन्दर्यञ्चलवर्तिप्रदीप इव भाति सन्ध्यायाम्।।85।।

दिल्लीराजकुले तव सुपरिचिताः पारसीककवयः स्युः।
तेषां कविताया इव तव कवितासु प्रभावः स्यात्।।86।।

त्वत्कविताया इव रे मनोऽभिरामस्तवानुभावः स्यात्।
दिल्लीराजकुले यत् त्वाम्प्रत्याकर्षणं तत् सत्।।87।।

त्वं शैवो वा वैष्णव इति वा नास्मासु रे विवाद इह।
तव पण्डितराजत्वे विप्रतिपत्तिश्च नास्मासु।।88।।

यो वा को वाऽसि त्वं शिवभक्तो वाऽथ कृष्णभक्तो वा।
कविरथ शास्त्रज्ञो वा स्पृहणीयः सर्वथा नस्त्वम्।।89।।

अप्पयदीक्षितसदृशा मन्ये सुधियो भवेयुरन्येऽपि।
पण्डितराज इव स्याः पण्डितराजस्त्वमेवेह।।90।।

अपि तव जीवनकाले नासन् बहवो गुणग्रहीतारः।
मन्ये न कोऽप्यभावोऽद्यत्वेऽपि गुणग्रहीतृणाम्।।91।।

मन्ये पदविन्यासा विसंष्ठुला कोऽपि नैषधादौ स्युः।
न परं त्वत्पदबन्धे विसंष्ठुलत्वं क्वचिद् दृष्टम्।।92।।

काव्याभ्यासो वा स्याच्छास्त्राभ्यासोऽथवा तवेह स्यात्।
पण्डितराज! प्रतिभा मन्ये तव सर्वतोदिक्का।।93।।

निर्माय नूतनानि स्फुटं त्वयोदाहृतानि पद्यानि।
नूनं त्वमेक ईदृङ् मृगोऽसि कस्तूरिकाजनकः।।94।।

कवितायाः सुन्दर्या उभयोः सौन्दर्यतत्त्ववेत्ताऽसि।
द्वित्रा भवन्ति मन्ये त्वमिव शताब्दीषु यातासु।।95।।

आकलिता प्रत्येकं क्षणे क्षणे मानसे सहृदयानाम्।
त्वत्कवितावाग्देवी प्रकाशयति नवनवानर्थान्।।96।।

तव हृदि पण्डितराज! प्रकाशमाना सदैव वाग्देवी।
सृजति स्म नवनवा इव भङ्गीभणितीः सतां हृद्याः।।97।।

'मुंगंडा' ग्राममिमं वयमायाताः प्रवर्तमानेऽस्मिन्।
पितृपक्षे स्मृत्यद्भिस्त्वामधुना सम्प्रतर्पयितुम्।।98।।

कवयति पण्डितराजे वसन्त इव लक्ष्यते स्म सर्वत्र।
कवितोद्यानमपश्रि त्वयि याते हन्त सञ्जातम्।।99।।

अर्थोऽभिनवोऽग्राम्या जातिः श्लेशोऽपि सर्वथाऽक्लिष्टः।
स्फुटरसता विकटाक्षरबन्धस्त्वयि सुलभमेकस्मिन्।।100।।

न प्राप्ता तव यमुना वर्णनचम्पूस्तथापि सम्प्राप्ता।
तव यमुनालहरीयं सन्तोषायालमस्माकम्।।101।।

आर्याणामेतेन स्फुटेन शतकेन देवता काचित्।
प्रीतास्त्विति सुमनोऽञ्जलिमर्पयतीमं जगन्नाथः।।102।।

पञ्चशती मूकस्याधीता लहरी च शङ्करस्येह।
न परं पञ्चलहर्यो नीतास्ताभ्यां गतार्थत्वम्।।103।।

जनयित्वैवोपकृतं न जगन्नाथं सुपेरुभट्टेन।
कृतवान् पण्डितराजं तमिति महान् कश्चिदुपकारः।।104।।

मुनिखण्डे या लक्ष्मीः पण्डितराजोत्तमं प्रसूतवती।
तामन्तरेण निपतेदस्माकं कम्प्रति प्रणतिः।।105।।

मुनिखण्ड–ग्रामभवान् प्रणमामः साम्प्रतञ्च तत्कुलजान्।
पण्डितराजोऽस्माकं पूर्वज इति गौरवं येषु।।106।।

ऐदम्प्राथम्येन प्रणमामो ग्रामरत्न–मुनिखण्डम्।
अलभत सुजन्म यस्मिन् पण्डितराजो जगन्नाथः।।107।।

यद्धूलिभिः स बाल्ये नित्यं क्रीडन् सुधूसरः समभूत्।
सम्वर्धितश्च विहसन् यदन्नतो यैः समं सखिभिः।।108।।

लक्ष्म्या वाग्देव्या च स्नेहात् सममेव पालितो यस्मिन्।
द्वैमातुर इव कश्चित् सोऽवर्धत पेरुभट्टसुतः।।109।।

सिंहशिशुर्यो यस्मिन्नुवास गोदावरीपयःस्नातः।
मृगपतिरजनि स काले खरनखपाण्डित्यशौर्यभरः।।110।।

पौनःपुन्येनेमां काव्यकृतां तीर्थतां गतां भूमिम्।
मुनिखण्डग्रामस्य प्रणमामः पावनीं प्रथिताम्।।111।।

राज्ञा भगीरथेन क्षोणीं गङ्गा कदाचिदानीता।
रसगङ्गां बुधहृत्सु तु स जगन्नाथः प्रवाहितवान्।।112।।

शास्त्रगहनकान्तारे मृगपतिनेव त्वया सदा भ्रान्तम्।
कविता–मानस–सरसि च हंसेनेव त्वया रमितम्।।113।।

अभिधाने तव कथितेऽलङ्कारकृतां कथाप्रसङ्गेन।
क्षेमेन्द्रमम्मटाद्या आरोहन्ति स्मृतिं नैव। ।114।।

# भट्टमथुरानाथ/मञ्जुनाथ-प्रशस्तिः

प्राचीनमपि तदेतत् संस्कृतसाहित्यमात्मनः स्पर्शात्।
नवतां येन प्रापितमिह स्तुमो मञ्जुनाथं तम्।।1।।

धन्या जयपुरनगरी यत्रोषितमात्मनः समं मित्रैः।
श्रीगिरिधरप्रभृतिभिर्भट्टश्रीमञ्जुनाथेन।।2।।

लेखन्या यस्येह स्पर्शादधिगत्य कञ्चिदुल्लासम्।
सुरवाक् स्पृहणीयाऽभूत् वयं स्तुमो मञ्जुनाथं तम्।।3।।

संस्कृतसेवाव्रतिनो नैके दृष्टाः कदाचिदस्माभिः।
न परं कश्चन दृष्टो भट्टश्रीमञ्जुनाथसमः।।4।।

संस्कृतभाषा सम्प्रति मृतेति यैः कैश्चिदत्र निर्णीतम्।
मुखमुद्रणार्थमुत्तरमिह तेषां मञ्जुनाथकविः।।5।।

यस्मिन् नैके कवयो लीलायितमाचरन्ति कुशलतया।
मथुरानाथस्तस्य स सुपूर्वरङ्गः प्रयोगस्य।।6।।

रसखानः स बिहारी स घनानन्दोऽथवा जगन्नाथः।
सर्वेऽप्येकीभूता यस्मिन् श्रीमञ्जुनाथः सः।।7।।

माधुर्यं संस्कृतगिर उर्दू-ग़ज़लस्य चैव लावण्यम्।
अधिमञ्जुनाथवाङ्मयमन्योन्यं मिलितमप्युभयम्।।8।।

यत्कवितायां शब्दा भासन्ते केवलं न रमणीयाः।
अर्था अपि रमणीयाः स विजयते मञ्जुनाथ कविः।।9।।

निर्माणालोचनयोः कविताया यस्य धीः समानेव।
समनुगता वयमेते तस्य श्रीमञ्जुनाथस्य।।10।।

सुरभिः कालः स तदा लसन्ति मञ्जर्य आम्र एव यदा।
श्रीमञ्जुनाथवाङ्मयमिह कलयामः सदासुरभि।।11।।

स्वादुश्रीभागवतं स्वादु तथा चेह गीतगोविन्दम्।
स्वादु स्वादु प्रतिपदमिह मथुरानाथसाहित्यम्।।12।।

शिखरं किमपि स्पृशती कविताया वैभवत्रयी यस्य।
भट्टो मथुरानाथः स कवीनामग्रणीर्जयति।।13।।

व्यासोच्छिष्टं केचन बाणोच्छिष्टञ्च केऽपि जगदाहुः।
मथुरानाथोच्छिष्टं जगदिति मन्यामहे तु वयम्।।14।।

श्रोतव्यौ मन्तव्यौ सुधीजनैः कालिदास-भवभूती।
श्रीमञ्जुनाथवाणी किन्तु निदिध्यासितव्येह।।15।।

उद्घाटितमिव पुस्तकमनुभावो यस्य मञ्जुनाथस्य।
मन्ये तस्य कृतित्वं गूढमगूढञ्च यत्किञ्चित्।।16।।

रसगङ्गाधरमेते सरलीकुर्वन्ति यावदेकत्र।
प्रौढिं नयन्ति गाथासप्तशतीं तावदन्यत्र।।17।।

आस्वादवद्भिरेतैः स्वकाव्यकवलैः सुपोषिता नूनम्।
सूते गीर्वाणगवी सम्प्रति दुग्धामृतं सततम्।।18।।

तद्रसनायां नृत्यति वादयते तस्य हृत्स्थले वीणाम्।
गायति कलञ्च वाणी मथुरानाथं तमधिकृत्य।।19।।

पद्येषु भाति हासः परिहासो भासते सुगन्धेषु।
श्रीमञ्जुनाथवाचः सुस्मितमाभाति गीतेषु।।20।।

व्यासेनारब्धा स्रग् या गुम्फितुमम्बिकाप्रदत्तेन।
सा पूर्णतामवाप्ता कविना श्रीमञ्जुनाथेन।।21।।

भङ्गीभिर्विविधाभिः संवलिताः सुप्रसन्नगम्भीराः।
मथुरानाथभणितयः प्रवहन्त्यः सन्तु हृत्सु सताम्।।22।।

## दाराशिकोहः

एकाधिकार आस्ते सत्ये धर्मस्य नेह कस्यापि।
इति सिद्धान्तो भवता स्थापित आत्माहुतीकृत्य।।1।।

सम्राडकबर आसीद् भवतः प्रपितामहो महाचेताः।
सरणिः समुपन्यस्ताऽभ्यस्ता भवतः कृते येन।।2।।

राजकुमारो दाराशिकोह इति तावदेतदभिधानम्।
औदार्यस्य नु कस्यचिदतिरमणीयस्य पर्यायः।।3।।

धर्मेषु सम्प्रदायेष्वास्तां समभाव आदृतः सम्यक्।
सत्यस्यास्य द्रष्टा त्वमिदम्प्रथमो महानासीत्।।4।।

परमात्मन एकत्वं न कुराणात् केवलं त्वया लब्धम्।
उपनिषदामपि निचयादेकं सत् तत्त्वमन्विष्टम्।।5।।

इस्लामस्यैकत्वं वेदान्तानां सतां तथैकत्वम्।
द्वयमप्येकीभूतं मन्ये दाराशिकोह इति।।6।।

भिक्षुक इत्यात्मानं राजकुमारोऽपि सन्नमन्यत यः।
तस्मै श्रद्धाञ्जलयोऽस्माकं दाराशिकोहाय।।7।।

सम्बन्धं विच्छेत्तुं त्वमागतो नैव कोऽपि जगतीह।
अपितु नृणां सम्बन्धं दृढतां नेतुं त्वमायातः।।8।।

तत्त्वज्ञाः सत्पुरुषाः सन्ततमुपसेवितास्त्वया नैके।
आजन्मनस्त्वमासीर्जिज्ञासुर्धर्मतत्त्वस्य।।9।।

परमेश्वरस्य नामसु न तवासीदाग्रहः कदाचिदपि।
रामोऽथवा स आस्तामास्तामथवा रहीमः सः।।10।।

ईश्वरसन्देशहरे मुहम्मदे तावकी यथा श्रद्धा।
आसीत् श्रद्धाबुद्धिर्गुरौ वसिष्ठे तथैव तव।।11।।

नायुष इह साफल्यं जन्तोः कस्यापि कोऽपि सुखलाभः।
केनेहाचरितं किं वस्तुत इत्यत्र साफल्यम्।।12।।

शासनमपि प्रजायाश्चिकीर्षितं तावकं यदप्यासीत्।
तदपि न ते विनिवृत्ता दृष्टिः सत्यानुसन्धानात्।।13।।

सूफी मुल्लाशाहो गुरुरासीत् तावकीन इह मान्यः।
सद्गुरु बाबालालस्त्वयोपसङ्गम्य पृष्टश्च।।14।।

धर्मो मुक्तेः साधनमथ धर्मः प्रेमबन्धनं किमपि।
एतद्द्वयातिरिक्तो धर्माभासो न धर्मः सः।।15।।

सुबहोः कालादेषा मानवता चेत् प्रतीक्षमाणा स्यात्।
दाराशिकोह एकः कदाचिदुत्पद्यते जगति।।16।।

केचिदसाफल्यस्य त्वां पर्यायं बुधेषु मन्यन्ताम्।
मन्यामहे वयं तु त्वां सफलं सर्वथा सफलम्।।17।।

सर्वेषां धर्माणां गन्तव्यं तावदेकमेव मतम्।
भाषाभेदः केवलमेषु स एकः परिस्फुरति।।18।।

पथिको यद्यप्यासीदेकाकी सर्वथा पथः स्वस्य।
बाधास्त्वामवरोद्धुं तथापि नाशक्नुवन् क्वचन।।19।।

उपनिषदोऽनूदितवान् पञ्चाशत् पारसीकभाषायाम्।
यासु कुराणं शास्त्रं लिपिबद्धं साररूपतया।।20।।

द्वेषं विस्मृत्याखिलमन्योन्यं चावलम्ब्य सद्भावम्।
स्थेयं सर्वैरिति यस्तव पक्षः सोऽधुनापि मतः।।21।।

स्वामिविवेकानन्दस्त्वामनुगतवान् गुरुं स्मरन् स्वीयम्।
त्वां  मन्यमान आसीद् राष्ट्रपिता गान्धिवर्यश्च।।22।।

परमेश्वरः कृपावान् स्यात्त्वय्यन्त्ये च निर्णयावसरे।
सफलीभूयात् प्रार्थितमस्माकं तावके विषये।।23।।

दाराशिकोह एकः पुनरुत्पद्येत भारते क्षेत्रे।
औदार्यं सर्वेषां हृत्क्षेत्रे संघटेत पुनः।।24।।

उत्पतितमात्मसदृशं त्वया यदिह सत्यदर्शनाकाशे।
मन्ये वस्तुत एतत् पुण्यश्लोकस्य सौभाग्यम्।।25।।

मानवताया ऐक्यं समभावः सर्वधर्ममार्गेषु।
इत्यासीत् स्वप्नस्तेऽकस्मात्तव मृत्युना भग्नः।।26।।

# कविता तदा मनसि मे समुन्मीलति

यदा नभसि कोणतः क्वचन काऽपि कादम्बिनी
प्रगर्जितपरायणा स्फुरितविद्युदाडम्बरा।
प्रनर्तितमयूरका शिखरिशृङ्गमालिङ्गति
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।1।।

यदाऽधिदिवसान्तमाकुलतया प्रतीक्षापरान्
अजातमृदुपक्षकान्निजशिशून् कुलायस्थितान्।
प्रतर्पयति शालिभिः खगवधूः सुदूरांगता
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।2।।

यदा रुदितकं क्षणात् समपहाय मातुः स्तनं
पिबन् सुविनिमीलितार्धदृगलमञ्चलाभ्यन्तरात्।
शिशुः पितरमागतं हसति वीक्ष्य मुग्धं मुहुः
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।3।।

यदा प्रखर आतपे श्रमजलार्द्र आरात्तरो-
स्तले हलिक आगतां सजल-पात्र-भोज्यान्नकाम्।
प्रतीक्षणपरायणां निजवधूमुपैत्यादरात्
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।4।।

यदा परगृहेष्वलं कृतपरिश्रमारम्भतो
दिवंगतधवाऽबला स्वसुतमाप्तवृत्तिं गृहम्।

विलोकयति सर्वत: प्रथममागतं सार्द्रदृक्
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।5।।

यदा युधि परै: समाहत उदारचेता मुहु-
र्निमीलनपरायण: स्वविषयं स्वतन्त्रं जनात्।
शृणोति विहसन् भट: सपदि मृत्युमालिङ्गति
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।6।।

यदा क्वचिदितस्ततो धनवतां गृहद्वारतो
ऽनवाप्तनिजभोजन: सुविचरन् बुभुक्षापर:।
दरिद्रगृहतो मनाग् लभत ओदनं भिक्षुक:
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।7।।

यदा भवति नैव कश्चिदपि हन्त पार्श्वे स्थित:
प्रवर्षति नभोगतो विमलचन्द्रिकां चन्द्रमा:।
सुमन्दमथ संवहन् भवति दक्षिणो मारुत:
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।8।।

यदा क्वचन हृद्गता सुबहुकालतो यत्नत:
प्रसह्य परिरक्षिता परिणतेव काचिद् व्यथा।
प्रतीक्षितजनान्तिकोपगमनात् स्फुटत्यन्तत:
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।9।।

विलोचनजलं सदा जगति हन्त सामान्यतो
जनस्य नयतीह नु प्रकटतां व्यथां सर्वथा।
यदा परमिह क्वचित् प्रकटयेदलं तां स्मितं
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।10।।

सदैव ननु दृक्पथं जगदिदं कठोरं तथा
नितान्तमथ नीरसं समनुभूयते सर्वथा।
यदाऽतिमृदु शोभनं सरसमेतदुन्नीयते
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।11।।

सदैव हृदयं प्रियो हरति भाषमाणः प्रियं
यदा स विमनायते क्वचन भाषते चाप्रियम्।
यदा स च विधेर्वशाद् भवति हा रुषं सङ्गतः
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।12।।

यदा मम समन्ततो दधदिव स्वरूपं शतात्
परं स्मृतिमुपैत्यदः प्रबलमाग उज्जृम्भितम्।
निमीलति तदा दृशोर्मम युगं पुरस्ते मुहुः
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।13।।

यदा स्मृतिमुपैति सा मम सुकोमलैकान्ततः
तदा किमपि ताजवत् लघु मयाऽपि निर्मीयते।
यदा भवति मीलितं तदपि विस्मृतं तत्क्षणात्
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।14।।

यदा विहसतोऽप्यहं स्रजि गतस्य पुष्पस्य तां
व्यथाजनितचीत्कृतिं क्वचन सूचिविद्धस्य रे।
शृणोमि हृदि सर्वथा स्वयमपीह विद्धो भवन्
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।15।।

यदा विधिविनिर्मितौ किमपि रूपमत्यद्भुतं
मदक्ष्यतिथितां दधात्युदितचन्द्रवद् भास्वरम्।
तदा भवति मानसं मम मनागिवोद्वेलितं
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।16।।

यदा क्वचन सङ्गतो भवति कश्चिदेकान्ततः
प्रमोदपरिपूरितः प्रियजनो व्यथां संहरन्।
यदा समुपजायते मृदु च तेन सम्भाषितं
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।17।।

यदा सुमनसां शुभावलिरुदीतगन्धा मुहुः
प्रतीक्षत इतः क्वचिद् दिवसमेव रात्रौ ततः।
निमीलति वनान्ततो निजनिरीक्षकाभावतः
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।18।।

भवेदपि न कश्चन क्वचन कोऽपि मेघोदयो
भवेदपि च न क्वचिन्नभसि विद्युतामुद्यमः।
यदा स्पृशति मानसं किमपि मेघदूतं मनाक्
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।19।।

भवेदिह न कस्यचित् सकमलं सरः पश्यतः
कवेः सहृदयस्य वा मनसि कोऽपि काव्योदयः।
यदा मम तु दृक्पथं समुपयाति शुष्कं सरः
क्षणं नु कविता तदा मनसि मे समुन्मीलति।।20।।

# हे घनश्याम (1)

ग्रीष्मो यातो न परं यातो ग्रीष्मस्य दुष्प्रभाव इतः।
प्रावृडुपेता श्यामो नोपेतः प्रावृषेण्य-घनः।।1।।

आषाढस्य प्रथमो दिवसो यातः प्रवर्तमानेऽब्दे।
नभसि प्रत्यासन्ने न समासन्नो घनश्यामः।।2।।

त्वय्यायत्तं कृषिफलमिति जानीते जनोऽपि सामान्यः।
स नहि त्वमेव वेत्सि प्रथितो य इतो घनश्यामः।।3।।

यद्यपि नभसि सुदूरे कदाचिदालोक्यसे सुसन्नद्धः।
न तथाप्युपैसि निकटेऽस्माकमभीष्टो घनश्यामः।।4।।

पूर्णस्त्वमिति समेषां त्वद्विषये दृढतरोऽस्ति विश्वासः।
रिक्तोऽसीत्यववादस्त्वयि न घनश्याम! कोऽप्युदियात्।।5।।

पश्य घनश्याम! त्वां प्रतीक्षमाणा वयं दिनेष्वेषु।
अपि जानीषे त्वमसि प्रतीक्ष्यमाणो जनैः कैः कैः।।6।।

सरितः सरांसि कूपाः सम्प्रति सर्वे पिपासयाऽऽक्रान्ताः।
अपि साम्प्रतमपि शेषे समुद्रमध्ये घनश्याम!।।7।।

सरला भ्रुवो विलासैरनभिज्ञाः का इमा न वेत्सि त्वम्।
जनपदवध्व इमास्तास्त्वाञ्च घनश्याम! पश्यन्ति।।8।।

मन्दं मन्दं सम्प्रति पवनः कोऽपीह किन्न नुदति त्वाम्।
वद कारणेन केन त्वं न घनश्याम! सञ्चरसि।।9।।

नभसि त्वां सन्नद्धं साम्प्रतमनवेक्ष्य हन्त शुष्यन्तः।
न मयूरा नृत्यन्ति त्वन्नु घनश्याम! कठिनोऽसि।।10।।

अप्येषु रे दिनेषु प्रणयिन्या विद्युता वियुक्तोऽसि।
क्वचन निमीलंस्तिष्ठसि यदिह घनश्याम! नोत्सहसे।।11।।

मा कुरु नैराश्यहतान् कृश्याजीवान् न हन्त पथिकांश्च।
सर्वेऽप्येते प्रावृषि सन्ति घनश्याम! सोत्कण्ठाः।।12।।

वृन्दावनं न केवलमेकं शुष्यद् विना विभाति त्वाम्।
त्वाञ्च घनश्याम! विना विनिमीललतिचित्रकूटोऽपि।।13।।

यमुनातटभुवि दोला तिष्ठति शिथिलेव हन्त राधायाः।
हे गोपवेषधारिन् क्वासि घनश्याम! न त्वरसे।।14।।

श्यामश्यामान् दिवसान् मेदुरमप्यम्बरं विलोकयितुम्।
कालं कियन्तमेते वयं घनश्याम! तिष्ठामः।।15।।

वनपल्वलेषु भेकाः शब्दायन्ते न हन्त शुष्यत्सु।
उद्यानेषु स्तब्धान् पश्य घनश्याम! नोत्सहसे।।16।।

मधुरो रवस्त्वदीयो नास्माकं कर्णगोचरीभवति।
श्रुतिपथमानय गर्जितमाशु घनश्याम! विकलाः स्मः।।17।।

काचिद् गौरिव पृथिवी प्रतीक्षमाणा भवन्तमेतर्हि।
गोषु श्रुतमस्माभिर्द्रवसि घनश्याम! मुग्धासु।।18।।

रामायणमादिकवेः सुकालिदासस्य मेघदूतञ्च।
नास्मानिह रञ्जयतः किमपि घनश्याम! पश्यास्मान्।।19।।

हन्त दृशो न कियत्यः प्रेक्षितुकामाः पतन्ति सौत्सुक्यम्।
दृक्पथमायासि कदा कदा घनश्याम! दृश्योऽसि।।20।।

नष्टासु कृषिषु कस्मै त्वदागमः स्यादितो नु लाभाय।
तव दातृत्वं सिध्येदेषु घनश्याम! कृषकेषु।।21।।

त्वद्गर्जितेन सदृशं ध्वनति मृदङ्गश्च कोऽपि शङ्खश्च।
त्वद्गर्जितेन साम्यं किमपि घनश्याम! नान्यस्य।।22।।

तव मेघदूतमलिखत् स कालिदासः सुगर्जितं श्रुत्वा।
स्वं गीतकाव्यमलिखत् किञ्च घनश्याम! जयदेवः।।23।।

महतश्चैतन्यस्य त्वमसि घनश्याम! कोऽपि विस्फारः।
त्वद्दर्शनेन यन्नश्चित्तं स्पृशतीव विस्तारम्।।24।।

# हे घनश्याम! (2)

हन्त दृशो न कियत्यः प्रेक्षितुकामाः पतन्ति सौत्सुक्यम्।
दृक्पथमायासि कदा कदा घनश्याम! दृश्योसि।।1।।

नष्टासु कृषिषु कस्मै त्वदागमः स्यादितो नु लाभाय।
तव दातृत्वं सिध्येदेषु घनश्याम! कृषकेषु।।2।।

कृषका रुदन्त एते 'नश्यामस्त्वां विनेति' भाषन्ते।
वर्षास्वासूद्यन्तं त्वां न घनश्याम! पश्यामः।।3।।

त्वदनुध्यानपरेव स्वःसरिदधुना धुनोति मूर्धानम्।
यान्त्यनुदिनञ्च कृशतां प्रतीक्षते त्वामितो यमुना।।4।।

स्मारं स्मारं प्रतिदिनमिह पूर्वं त्वत्कृतान् सुखाश्लेषान्।
दिवसेष्वेषु क्लिश्यति स चित्रकूटो घनश्याम!।।5।।

श्यामीकृतं सदैव स्वगोपवेषेण यत् त्वया पूर्वम्।
क्लिश्यति वृन्दावनमपि तदिह घनश्याम! न ह्वयसे।।6।।

श्रुतिपथमायातमपि श्रीजयदेवस्य गीतगोविन्दम्।
नास्मभ्यं रोचत इदमदृष्टवद्भ्यो घनश्यामम्।।7।।

अनुकूलस्त्वां पवनः सत्वरमित आनयेद् घनश्यामम्।
आगच्छत इभगत्या पन्थानस्ते शिवाः सन्तु।।8।।

अवगुण्ठनानि पाणिभिरुत्थाप्य स्वानि जातु वदनेभ्य:।
त्वत्स्वागतार्थमुत्का जनपदवध्वो घनश्याम!।।9।।

उपसञ्चरन् सुदूराद् दृक्पथमायासि वारणेन्द्र इव।
त्वद्गर्जितं गभीरं भाति घनश्याम! बृंहितवत्।।110।।

को वा नेह परिचित: प्रणयिन्या विद्युता तया तव रे।
स्फुरति त्वामालिङ्ग्यालिङ्ग्य घनश्याम! मुग्धेव।।11।।

यायावरस्त्वमेकोऽथवाऽसि नभसस्त्वमित्वर: कश्चित्।
यो वा को वाऽसि त्वं त्वं त्वस्माकं घनश्याम:।।12।।

न घनागम: कुतश्चिन्न मन्दपवनोद्गम: कुतश्चिच्च।
न घनश्यामास्माकं समागम: किं त्वया भविता।।13।

त्वां पश्यत उद्यन्तं नगाधिराज: स्मृतावुदेतीव।
नादृश्यत त्वदपर: क्वचिदभिरामो घनश्याम:।।14।।

# सर्वज्ञः

अद्येदं सुदिनमहो नु मामकीनं
सर्वज्ञः स खलु महीयसां महीयान्।
अस्तित्वं मम फलवद् विधातुकामो
यद्दृष्टेर्विषय इहाभवद् वरेण्यः।।1।।

प्रभ्रष्टं लघुगणिकापदं मदीयं
जाताऽहं बत जगतीह काऽपि धन्या।
लोकेऽस्मिन्नहमतिमात्रमस्म्यपङ्का
जायेत क्वचिदपि कस्याचिन्न शङ्का।।2।।

नारीयं कनकमयाङ्गयष्टिकल्पा
वर्षेभ्योऽगमदिह भोगसाधनत्वम्।
नीतेयं बत भुवि पण्यताञ्च काम-
व्यासक्तैर्नरपशुभिः प्रसह्य कैश्चित्।।3।।

वैशाली मम नगरी प्रकामरम्या
शोभायाममरपुरीमसौ जयन्ती।
मद्दृष्टेः क्षणविनिपातमीहमाना
सर्वस्वं मम पदयोर्निधातुकामा।।4।।

प्रासादा विपुलधनानि रम्यरम्याः
सुच्छायोपवनजुषः समे तटाकाः।

यद्यप्युल्लसति सुवैभवं मदीयं
सम्मोदं जनयति नो तथापि किञ्चित्।।5।।

शय्यायां सुजटितरत्नभासुरायां
कौशेयस्फुटशिखिवर्हकोमलायाम्।।
यामिन्यामुपचरिताऽप्यलं सखीभिः
स्वीयाभिः कथमपि हा लभे न निद्राम्।।6।।

निर्वृत्ताऽभवमहमाम्रवृक्षमूले
लेखेवानुदिनमथैन्दवी स्फुरन्ती।
वैशाल्या नगरवधूरिहाऽऽम्रपाली
त्याख्याता–हरिणदृगस्मि काऽपि नारी।।7।।

सुश्यामा भ्रमरसुकान्तयः प्रलम्बा
भ्राजन्ते शिरसि नु मूर्धजा मदीयाः।
सम्प्राप्ते वयसि शणोपमा इमे स्युः
श्वेताश्च प्रकटितगाढरूक्षरूपाः।।8।।

अस्तीदं सुरभिकरण्डकोपमेयं
सद्गन्धैः कुसुमभरैर्मदुत्तमाङ्गम्।
सम्प्राप्ते वयसि च जीर्णतां प्रपन्नं
दुर्गन्धं बत जनयेच्छशस्य लोम्नाम्।।9।।

उद्यानं किमपि सुरोपितं तदेतत्
सौषम्यं जनयति मामकं शरीरम्।
सम्प्राप्ते वयसि विशीर्णसन्धिबन्धं
सञ्चारेऽप्यलमसमर्थतां गतं स्यात्।।10।।

कृष्णाभं सुरभिभरं सुवर्णदीप्तं
वेणीभिः सततमलङ्कृतं शिरो मे।
सम्प्राप्ते वयसि सुनिश्चितं समन्तात्
सम्भूयात् पलितमथाप्यहो विशीर्णम्।।11।।

हन्तेमे सुविलिखिते भ्रुवौ मदीये
केनापि श्रुतयशसेव चित्रकर्त्रा।
सम्प्राप्ते वयसि वलिप्रलम्बिते वा
स्यातां हा समधिकमेव वा विकीर्णे।।12।।

नेत्रे मे बत रुचिरे च भास्वरे च
स्वच्छा मे तरलसुनीलरत्नकान्ती।
सम्प्राप्ते वयसि वराटिकोपमेये
सद्बाष्पे सपदि भविष्यतः स्थिरे च।।13।।

नासा मे शुकमपि साम्प्रतं सलज्जं
कुर्वाणा किमपि च तुङ्गतां गताऽऽस्ते।
सम्प्राप्ते वयसि विकारमाप्नुवाना
श्लक्ष्णत्वं निजमथ सन्त्यजेदवश्यम्।।14।।

शोभामावहति सुकङ्कणं सुमृष्टं
कामप्युच्छलति ममाधिकर्णपालि।
सम्प्राप्ते वयसि वलिप्रलम्बिता सा
व्यामोहं मम विनिवारयेदवश्यम्।।15।।

दन्ता मे सुघटितपक्वदाडिमाभाः
शोभन्तेऽलमिह मणिप्रभां किरन्तः।।
सम्प्राप्ते वयसि यवाभपीतवर्णाः
सर्वेऽपि प्रविरलतां गता भवेयुः।।16।।

मद्वाणी गमयति कोकिलां सलज्जां
कूजन्तीं मधुरमरण्यखण्डमध्ये।
सम्प्राप्ते वयसि ततस्ततः स्खलन्ती
श्रोतॄणां श्रुतिकटुतां गता भवित्री।।17।।

श्लक्ष्णामप्रियतरकम्बुनोपमेया
ग्रीवा मे विलसति सुप्रमार्जितेव।
सम्प्राप्ते वयसि विनामिता च भग्ना
सम्भूयादथ हृदि खेदमानयेच्च।।18।।

बाहू मे विलसत ईदृशौ सुवृत्तौ
सुश्लिष्टावथ च शिरीषसौकुमार्यौ।
सम्प्राप्ते वयसि भविष्यतो नितान्तं
विश्लिष्टौ प्रविलुलितौ सुदुर्बलौ च।।19।।

हस्तौ मे सुघटितमुद्रिकासुवर्णा-
भूषाभिः परिकलितौ सुशोभमानौ।
सम्प्राप्ते वयसि सुमूलमूलिकाभौ
द्रष्टॄणां मनसि तु खेदमानयेताम्।।20।।

शोभेतेऽलमिह सुवर्तुलौ सुपीना-
वुत्तुङ्गौ स्मरजनकौ कुचौ मदीयौ।
सम्प्राप्ते वयसि सुलम्बितौ भवेतां
प्रक्षीणावथ च जनैर्विगर्हणीयौ।।21।।

कायो मे फलकवदस्ति काञ्चनस्य
प्रश्लिष्टः सुघटित एष शोभमानः।
सम्प्राप्ते वयसि समन्ततो भवेद्वा
सूक्ष्माभिर्वलिभि रथानतः पुरस्तात्।।22।।

शास्ता मां समनुगृहीतवान् स्वदृष्ट्या
सद्भावस्फुरदनुकम्पयाऽऽर्द्रया च।
सुस्नातं परिकलये स्वमद्य धन्यं
प्रत्नो मेऽनुभव इवैष जीवितस्य।।23।।

द्वारं श्वो मम समुपेत्य भोजनार्थं
श्रीशास्ता पुनरिह मामनुग्रहीता।
उच्चैस्ते जगति शिरोऽम्बपालि नूनं
सौभाग्यं तव किमतः परं वद स्यात् ।।24।।

(कवितेयं पालिसाहित्यस्य थेरीगाथायां प्राप्ताम् अम्बपलि-गाथामधिश्रिता, भगवतो बुद्धस्य साक्षात्कारेण आत्मनः कृतार्थताम् अनुभवन्त्या गणिकाया आम्रपाल्या उद्गारोच्छ्वसितरूपा च)

# गङ्गाया व्यथितम्

विष्णोः पदारविन्दात् परमपवित्रादहं विनिर्गत्य।
सम्प्राप्तं सुविशालं शिवस्य पूतं जटाजूटम्॥1॥

विष्णुपदीत्याहुर्मां सुप्रथितां देवनिम्नगेत्याहुः।
भूलोकञ्च प्राप्तां बहवो भागीरथीत्याहुः॥2॥

आहिमभूधर-शिखरात् आसिन्धोर्भारतस्य भूभागम्।
सुबहोः कालात् सन्ततमेषा गङ्गा पुनानाऽस्मि॥3॥

सकलाया वसुधाया सौभाग्यमिति स्तुताऽस्मि कविभिरहम्।
मम दर्शनाल्लभन्ते मुक्तिमितो मानवा बहवः॥4॥

वर्षेभ्यो नैकेभ्यो नगराणां तीरवर्तिनां हन्त।
रथ्योदकानि नित्यं मय्यतिमलिनानि निपतन्ति॥5॥

मम तीरेषु शवानां शताधिकानां प्रवर्त्यते दाहः।
प्रायोऽर्धदग्धदेहा मदप्सु नित्यं प्रवाह्यन्ते॥6॥

आसीन्मयि यत्किञ्चित् पूतीकरणक्षमत्वमिह लोके।
तदपि समन्तादधुना क्षरतीति तु मामकोऽनुभवः॥7॥

आर्ता मत्तीरगता नित्यं मामाह्वयन्ति विनिपत्य।
मामकमार्तत्वमितो न कोऽपि हन्तानुभवतीह॥8॥

दयनीयां स्थितिमेषा यैरहमेतावतीमिह प्राप्ता।
ते मयि सम्प्रति केचन न स्नातुं हन्त चेष्टन्ते।।9।।

मयि न हिमाद्रेर्निर्मलजलप्रवाहोऽपि दृश्यते नूनम्।
ग्रीष्मेषु काचिदेषा भवाम्यहं काकपेयेव।।10।।

याऽहं स्वर्गस्य कृतेऽभवमिह निःश्रेणिरात्मना जगतिः।
साऽहमिदानीं स्वजनैर्भग्ना तिष्ठामि शोचन्ती।।11।।

शुध्यन्ति स्म पुरा ये क्षणमप्यवगाहनेन हन्त मयि।
अपि सम्प्रति ते विकला मद्विषये सन्ति तिष्ठन्तः।।12।।

मातर्धरित्रि मामपि विधेहि सीतामिवात्मनोऽङ्कगताम्।
मदवस्थां दयनीयां पश्यन्ती दूयसे न कथम्।।13।।

अस्तित्वमेव मामकमतीव सन्दिग्धमेषु दिवसेषु।
भीष्मः स मामकीनस्तनयः स्याद् भूय उत्पन्नः।।14।।

वस्तुत इतः प्रवाहो मम गङ्गाया न दृश्यते क्वचन।
प्रवहन्ति यान्ति तानि तु जलानि मन्नेत्रजातानि।।15।।

सरितां पतिर्न साम्प्रतमुपस्थितां परिचिनोति गङ्गां माम्।
कम्प्रति सम्प्रति दुःखं निवेदयेयं स्वहृदयस्थम्।।16।।

लोकादस्माल्लोकः सरस्वतीं मन्वते विलीनेति।
मामपि विलीयमानामवेक्षितारः समे नचिरात्।।17।।

गङ्गा कदाचिदासीत् प्रवहन्ती भारतस्य मेदिन्याम्।
मन्ये लोकेऽस्मिन् मां ज्ञातारः केचिदितिहासात्।।18।।

कृष्णद्वैपायन इव विरौम्यहं नित्यमूर्ध्वबाहुरिह।
कश्चन जनो मदीयामार्तिं विनिवारयेदेत्य॥19॥

जगदेतन्मम कार्ये बधिरीभूतं नु जातमेतर्हि।
भारतमपि मद्विषये न सानुकम्पं वरीवर्ति॥20॥

भगवन् विष्णो मां लघु विधेहि निजपादयोः पुनर्लीनाम्।
अथवा भगवञ्शम्भो विनिवेशय मां जटाजूटे॥21॥

नाहं सम्प्रति गङ्गा न च त्रिपथगेति हन्त सम्बोध्या।
नूनं काचिदिदानीमवरुद्धा निम्नगाऽस्मीति॥22॥

केवलमहमेवार्ता नास्मि परं मामकी सखी यमुना।
नित्यं रुदिवः साम्प्रतमुभे प्रयागाङ्गणे मिलिते॥23॥

# अक्षयवटस्य व्यथा

कालात् सुचिरादेव प्रयागगत एष वीतराग इव।
अक्षयवटोऽस्मि तिष्ठन् निरीक्षमाणो जगन्नाट्यम्।।1।।

कल्पक्षये मदीये पत्रपुटे प्रलयजलधिपृष्ठगते।
भगवान् बालमुकुन्दः शयान आसीदिति ख्यातम्।।2।।

आत्मानं नित्यमहं यमुनायां दर्पण-प्रकल्पायाम्।
दर्शं दर्शं स्वीयं सौभाग्यं मानयन् वर्ते।।3।।

नाना-दिग्देशेभ्यः प्रयागमागत्य लोकसामान्याः।
स्नात्वा समुद्रपत्न्योर्जलमध्ये मां निरीक्षन्ते।।4।।

स्निग्धच्छायायां मम तलभूमौ शेरते सुखं सर्वे।
स्पर्शं स्पर्शं तेभ्यः स्वाशीर्वादांश्च वितरामि।।5।।

प्रतिवर्षमेव काले मम पतितेष्वेव शीर्णपर्णेषु।
स्पर्शसुखानि मृदूनि स्वानि वहाम्येष पर्णानि।।6।।

स्कन्धेषु मामकेषु प्रततासु च मामकीषु शाखासु।
निवसन्ति भयविरहिता विहगा नीडानि निर्माय।।7।।

यद्यपि काले काले कैश्चिद् धर्मं द्विषद्भिरिह लोके।
मूलच्छेदाय मम प्रयतितमिति संस्मरन्नस्मि।।8।।

न तथापि मामकीनं सुदृढं मूलं कदाचिदुच्छिन्नम्।
उज्जीवितोऽस्मि शाखास्कन्धमयोऽक्षय्य एषोऽहम्।।9।।

प्रत्यहमेवाहमितः स्वैश्चक्षुर्भिर्विनैव संबाधम्।
देवविमानानां दिवि गतागतानि प्रपश्यामि।।10।।

गङ्गाया यमुनाया निवसन्नेषोऽस्मि सङ्गमक्षेत्रे।
सन्ततमेव तयोर्मां स्पृशन्ति पूतानि सुपृषन्ति।।11।।

आसनबन्धं कृत्वा स्थितमेकं कमपि सिद्धमुनिमिव माम्।
सिञ्चन्ति मूलदेशे नमन्ति नित्यञ्च सुस्नाताः।।12।।

भगवान् रामो गच्छन् जानक्या लक्ष्मणेन सह गहनम्।
सुष्वाप मामकीने मूल इति स्मृतिपथेऽस्ति मम।।13।।

श्रीहर्षः सम्राडिह समेत्य सर्वस्वमर्पयामास।
तत्सर्वमेव दृश्यं नाद्यावधि विस्मृतिं यातम्।।14।।

यागाः शताधिका इह समभूवन् वेदमन्त्रसंवलिताः।
प्रतिवर्षमेव मुनयः प्रयागमुपयान्ति सम्पूताः।।15।।

मां पावयन्ति दर्शनदानेनाहञ्च तान् इति प्रायः।
कोऽपि विवादोऽद्यावधि न शान्त इति मे मतिर्भवति।।16।।

दिवसेष्वेतेषु परं गङ्गां यमुनाञ्च सर्वथा म्लानाम्।
दर्शं दर्शं सततं चेतसि खिन्नोऽस्मि सञ्जातः।।17।।

गङ्गा रोदिति यमुनाऽपि च रोदिति हन्त मूलमुपगत्य।
आश्वासनस्य कः स्यात् तयोरुपायो न जानेऽहम्।।18।।

निरुपाय एव वृद्ध: पितेव पुत्रीद्वयन्नु शोचामि।
सम्पूरितानि रुदतो भवन्ति मम लोचनानि जलै:।।19।।

निजपत्रस्य पुटे तं बालमुकुन्दं शयानमिति वच्मि।
निद्रां मुञ्च निभालय गङ्गां दीनाञ्च यमुनाञ्च।।20।।

किं स्याद् यदि गङ्गैषा भवेद् विलीना च हन्त यमुनैषा।
केन प्रतिष्ठिता स्याद् भारतभूसंस्कृतिर्जगति।।21।।

माधव एतु महीयान् उमाधवस्तावदेतु वृद्धस्य।
अस्य वटस्याक्रन्दस्तयोरुपैति श्रुतिं यदि चेत्।।22।।

# वाग्देवताया व्यथितम्

ऐदम्प्राथम्येनावातरमहमाननेषु देवानाम्।
तत उदभूवमृषीणां हृद्देशेषु स्वतःस्फूर्ता।।1।।

कवितैव मामकीनं स्वरूपमिति सर्व एव मन्यन्ते।
प्रस्फुटिताऽभूवमहं वाल्मीकेराननात् सहसा।।2।।

विविधपुराणरचनया महता सह भारतेतिहासेन।
मामिह सम्वर्धितवान् कृष्णद्वैपायनो व्यासः।।3।।

शाकुन्तलादिकाव्यैः कविकुलगुरुकालिदासलेखन्या।
वीणापाणिरभूवं लोके ह्यस्मिन् सुविख्याता।।4।।

श्रीभारवेः कदाचिन्माघस्य महाकवेः कदाचिदिह।
श्रीहर्षस्य कदाचिन्नृत्यमकार्षञ्च रसनाग्रे।।5।।

कालक्रमेण नैकैर्दृढं कदर्थीकृता कविम्मन्यैः।
स्वजनानां हन्त पुरः क्लिश्यामि द्रौपदीवाहम्।।6।।

वैदिक्यामिह नाहं न सीमिता हन्त संस्कृतायां वा।
मद्रूपमेव सर्वा भाषा जगतीह यावत्यः।।7।।

विश्वजनीनान् भावान् बिभर्मि सुधियां हृदन्तरुद्भूता।
सत्यं शिवञ्च सुन्दरमिति त्रयं मामकं रूपम्।।8।।

इतिहासेषु पुराणेश्वागमशास्त्रेषु चैव विविधेषु।
शिवरूपाऽहं नित्यं निवसामि प्रीतिसम्पन्ना।।9।।

अधिसद्वदनमृषीणां मान्यानां क्रान्तदर्शिनां नित्यम्।
तिष्ठामि सत्यरूपा मामर्था: समनुधावन्ति।।10।।

सत्कविरसनावर्तिषु काव्यालापेषु जगति वितेतषु।
तिष्ठामि प्रतिपद्य स्वं रूपं सुन्दरं सौम्यम्।।11।।

प्राकृतजनगुणगानैर्ये खलु मां पीडयन्त इह सन्ति।
तेषां विषये नाहं बिभर्मि लोके शुभां दृष्टिम्।।12।।

कवितैव वस्तुतो मे स्वरूपमित्यत्र नैव संशीति:।
दिवसेष्वेषु मलिनया मलिनीभूता कवितयाऽहम्।।13।।

मत्करगताऽपि तिष्ठति मूकीभूतेव मामकी वीणा।।
सम्प्रति मन्ये जाता मम भारो दुर्बल: कश्चित्।।14।।

क्वचिदुड्डीय गतो मे हंस: प्रियवाहनो मयूरश्च।
शुद्धस्फटिकसुकलिता मम मालापि क्वचिद्भ्रष्टा।।15।।

मलिनाम्बरेण संवृतकाया तिष्ठामि किञ्च शोचामि।
क्व गता मम सत्पुत्रा: प्राणेभ्योऽपि प्रिया लोके।।16।।

ब्रह्मविचारस्य कृते याऽहं पूर्वैर्मतोपयुक्तेति।
उदरस्य पूर्तये सा साधनभूता दिनेष्वेषु।।17।।

समतिष्ठत लक्ष्मीर्या मम सेवां सर्वदैव कुर्वाणा।
सम्प्रति नित्यं तामहमवतिष्ठे सेवमानेह।।18।।

येषां सदने विदुषां नानाविधपुस्तकान्यदृश्यन्त।
विरतस्वाध्यायास्ते लक्ष्म्याः सेवापरा दृष्टाः।।19।।

न हि गङ्गैवेदानीं प्रदूषिता हन्त नैव यमुनैव।
जाता सम्प्रत्यहमपि सरस्वती काकपेयेव।।20।।

सत्यं यदहं लुप्ता कलिकाले सर्वथा तमश्छन्ने।
सत्यं यदहं सुधियां तिष्ठाम्यधुनाऽपि हृद्देशे।।21।।

# काकानां व्यथितम्

अस्पृश्यानां यैव स्थितिर्मनुष्येषु काऽपि दलितानाम्।
सैव प्रायोऽस्माकं पतत्रिवर्गेषु काकानाम्।।1

वर्णस्य कार्ष्ण्यमधिकं कार्कश्यञ्चाधिकं विरावस्य।
प्रतिकूलत्वं धातुः स्फुटतां गतमेवमस्मासु।।2।।

शापस्य कस्यचिद् वा दुष्परिणामोऽथवाऽपराधस्य।
नितरामुपेक्षितायां यज्जनिताः काकयोनौ स्मः।।3।।

यद्यपि न व्याधेभ्यः पञ्जरबन्धाच्च न क्वचिद्भीतिः।
सर्वत्र सर्वदैव प्रकृतिर्नः किन्तु भीतत्वम्।।4।।

निन्द्योऽस्माकं वर्णो भक्ष्याभक्ष्याशनञ्च नो निन्द्यम्।
निन्दायाः पात्रत्वं भाग्येऽस्माकञ्च भागे च।।5।।

दैवायत्तो वर्णो दैवायत्ता च जातिरस्माकम्।
काकभुशुण्डिन एते वंशोत्पन्ना इति ध्येयम्।।6।।

जगतोऽस्यास्माकमपि स्वच्छीकरणेऽस्ति योगदानमिति।
अस्मानुपेक्षमाणैर्विचारणीयञ्च सम्मिलितैः।।7।।

धातुर्निर्माणेऽस्मिन् वयमप्युपयुक्ततां भजाम इति।
सम्मिलितैः सङ्घटितैरस्माभिः सम्प्रति ध्येयम्।।8।।

नद्यः प्रदूषिता इह काकैः पेया इति स्म मन्यन्ते।
अस्माभिः काकैरपि ताः सम्प्रति किन्त्वपेया नु॥9॥

भक्ष्याण्यधुना प्रायः प्रदूषितानीति गृध्रजातिरिव।
उच्छिन्ना हन्त तथाऽस्माकमपि स्याद् गतिस्तावत्॥10॥

मानवजातिरिदानीं स्वं सुखमेवास्ति काङ्क्षमाणेह।
तिष्ठति वस्तुत एषा स्वस्य विनाशे कृतोद्योगा॥11॥

काकानामपि कार्यं सर्वैः संरक्षणं तथा लोके।
संरक्षिता यथा स्यान्मानवजातिर्भविष्येऽपि॥12॥

परमस्माकं कश्चिन्निवेदने साम्प्रतं श्रुतिं दद्यात्।
दयनीयेष्वस्मासु क्षणं पतेत् कस्यचिद् दृष्टिः॥13॥

यावज्जातिः काचित्स्वस्मिन्नपि संबिभर्ति सामर्थ्यम्।
यावच्च जागरूका तिष्ठति तावत्स्वतन्त्रेह॥14॥

केषाञ्चिदपि दयाया न वयं पात्रं न भिक्षवश्च वयम्।
एका जिजीविषेयं सन्ततमस्मासु जागर्तु॥15॥

पञ्जरबद्धाः कीराः कामं भुक्त्वा फलानि मोदन्ताम्।
स्वातन्त्र्यस्यास्माकं तुलनायां तत्सुखं तुच्छम्॥16॥

काका वयं स्वबुद्ध्या स्वेनैवोपार्जितेन जीवामः।
जीविष्यामः सर्वे काले चानागतेऽपि वयम्॥17॥

प्रतिदिनमेव प्रातर्वयमुत्थाय प्रसादसम्पन्नाः।
सर्वेभ्योऽपि वदामः स्वारावैः सुप्रभातमिति॥18॥

दौर्भाग्येष्विह सत्स्वपि सौभाग्यं किञ्चिदेकमस्माकम्।
बलिभोजनस्य पात्रं पक्षिषु वयमेव, नैवान्ये।।19।।

कामं केचिदिहास्मानस्पृश्यान्नाम हन्त मन्यन्ताम्।
काकैरस्माभिरितो विधीयते भूरियं स्वच्छा।।20।।

प्राय: काका वयमिह पथिकस्त्रीणां गृहाणि सम्प्राप्य।
सूचयितुं प्रभवामस्तासां भाविप्रियागमनम्।।21।।

भाविप्रियजनसङ्गमसूचनया भूरिहर्षभरितानाम्।
पाण्युपहृतञ्च तासां दध्योदनमूररीकुर्म:।।22।।

अधिकार: प्राणिभ्यो जीवितुमिह दत्त एव दैवेन।
भुञ्जाना बलिमेते चिराय जीवाम इह काका:।।23।।

निन्दन्तु केचिदिहास्मान् विदधतु केचिच्च नस्तिरस्कारम्।
काका: स्मो वयमेते सोढुं शक्ताश्च सर्वमपि।।24।।

अस्मानुच्छेत्तुमना यद्येषा मानवस्य जातिश्चेत्।
उच्छिन्नेष्वस्मासु स्वमनसि शोचिष्यते नूनम्।।25।।

हंसा इत उच्छिन्ना: प्रायो गृध्राश्च तावदुच्छिन्ना:।
अस्माकं काकानामुच्छेदस्याधुना काल:।।26।।

## पङ्कस्य सुखम्

दृष्टिं मयि निपतन्तीं विनिवार्य स्वां व्रजन्ति सुधियोऽपि।
पुरतः कस्य व्यथितं सम्प्रति विनिवेदयानि स्वम्।।1।।

कर्दम इति पङ्क इति क्षुद्र इति स्पर्शवर्जनीय इति।
अस्पृहणीयत्वमलं प्रकटीकुर्वन्ति मद्विषयम्।।2।।

मयि यद्यपि सौन्दर्यं मन्ये नास्त्येव हन्त किञ्चिदपि।
किन्नु तथापि विशाले जगत्यकिञ्चित्करो वर्ते।।3।।

जगतां कस्यचिदहमपि नियन्तुरस्मीह किमपि निर्माणम्।
मय्यपि सैव भगवती सततं जागर्ति मृद्रूपा।।4।।

स्थिरमिह कस्य महत्त्वं कस्यास्तित्वञ्च सन्ततस्थायि।
अस्यां मृदि भगवत्यां विलीयमानं नु सर्वमपि।।5।।

वर्ते सन्ततमार्द्रो जाड्यस्यास्याहञ्च कोऽपि पर्यायः।
कश्चन दयनीयोऽहं कश्चन निम्नोऽपि नीचोऽपि।।6।।

विदलय्य मां स्वचरणैर्यान्ति जनाः प्रायशः स्वगन्तव्यम्।
दलितः स्वात्मनि तेषां बिभर्मि चिह्नानि चरणानाम्।।7।।

प्रेम्णा कस्यचनाहं भवामि लग्नो न केवलं पदयोः।
परिधानाम्बरमपि च स्पृशामि यत्स्यादविज्ञातः।।8।।

निर्घृण इव जन एष क्षुब्धो द्राङ्मां कलङ्क इति मत्वा।
अपवारयति न केवलमम्भोभिः स्वं पवित्रयति।।9।।

परमार्थतः पवित्रः क इह च को वा नितान्तमपवित्रः।
निर्णेतुं प्रभवेदिह को वा को वा प्रमाणयिता।।10।।

किमपि पवित्रयितुं यदि जलानि जगतीह चेत् समर्थानि।
वर्ते जलेषु सततं निमग्न एषोऽहमपवित्रः।।11।।

जनधारणा तु सैषा मद्विषये नास्ति काचिदेतर्हि।
प्रागपि कलङ्क इति मां जना अमन्यन्त हतभाग्यम्।।12।।

व्यथयाऽनयैष वर्ते व्यथा–कथामात्मनः कियद् वच्मि।
परमेकं सुखमपि मे धात्रा लिखितं नु मद्भाग्ये।।13।।

पङ्कादथ च कलङ्कान्मत्तो जनितेह पङ्कजं किञ्चित्।
तद्भविता सुन्दरमपि पवित्रमपि धार्यमप्युरसि।।14।।

तदिदं सुखमिति मन्ये मन्ये स्वीयञ्च किमपि सार्थक्यम्।
स्वं निर्मातारम्प्रति वर्ते हृदये कृतज्ञश्च।।15।।

# दीपावली

भारतमिव कथमेतन्न लक्ष्यते भारतं दिनेष्वेषु।
महिष इवैतद् ध्वान्तं प्रसरति, दीपावलि! क्वासि।।1।।

मातर्लक्ष्मि! ज्वलतु त्वदनुग्रहदीपवृक्ष एतर्हि।
अयमन्यथाऽन्धकारग्राहो निगलेज्झटित्यस्मान्।।2।।

मात:! प्रविश गृहान् न: स्वेनावृत्याऽञ्चलेन दीपशिशुम्।
वादितया शूर्पिकया विनिवारय किञ्च दारिद्र्यम्।।3।।

भारतभवने या खलु दीपशिखैका सदा ज्वलन्त्यस्ति।
स्नेहमयी सा नित्यं ज्वलेदिदं चिन्त्यमस्माभि:।।4।।

यस्या: स्नेहो गान्धी यस्या वर्तिर्जवाहरप्रतिभा।
भारतदीपशिखा सा ज्वलतु ब्रह्माण्डहर्म्यस्था।।5।।

दीपत्वं गच्छेन्ननु तावकमस्तित्वमेतदुल्लसितम्।
दीपानामावलीयं भवेदकिञ्चित्करी तावत्।।6।।

दीप: कोऽपि लघीयान् इति मत्वा मित्र! न त्वयोपेक्ष्य:।
अस्मिन् निलीय निवसति मित्राणां भास्वतां कोटि:।।7।।

दीपावलि! नैके त्वां जानत इह हन्त! दीपमात्रमिति।
अनभिव्यक्तस्य त्वं किञ्चिदभिव्यक्तमस्तित्वम्।।8।।

तारा–ग्रह–नक्षत्रैर्दीपावल्या दिवीव घटिताया:।
प्रतिबिम्बमात्रमेतन् मन्ये दीपावलीत्युक्तम्।।9।।

प्रत्येकमेव दीपो ज्वलति यथा कोऽपि बोधिसत्त्व इति।
प्रत्येकमेव दीपो निर्वाण: कोऽपि बुद्ध इति।।10।।

स्नेहमयस्य ज्वलत: प्रशंसनीयत्वमस्य दीपस्य।
मार्गभ्रष्टा मार्गं लभन्त एतेन सन्तमसे।।11।।

त्वामिव दीप! कदाचित् सौन्दर्यं तन्नु तत्त्वमेकं स्यात्।
त्वामवलोकयतो मे प्रतीयमानं तदाभाति।।12।।

कविताऽसि दीप! साक्षाद् वयं पठामो विलोकयन्तस्त्वाम्।
निजया स्फुरत्तया त्वं साक्षात् प्रतिभासि गीतेव।।13।।

उपर्युपरि मृन्मयी जगति वस्तुतश्चिन्मयी
शिखाकुसुममण्डिता प्रशमपाठने पण्डिता।।
स्वरूपजितचम्पका सततसञ्चलत्कम्पका
सुवर्णमयपीठिका जयति देहली–दीपिका।।14।।

तडिन्मयसुमण्डना स्फुरति कापि मेघावली
नभोऽङ्गणविलासिनी लसति कापि तारावली।
सुरभ्युपवनोद्गता मिलति काऽपि पुष्पावली
सुभारतमहाजिरे वलति काऽपि दीपावली।।15।।

तमांसि! सुतरामितोऽपसरत क्वचिद्दूरतो
न जाड्य ! बत विद्यते स्थितिरपीह युष्मत्कृते।
द्रुतं क्वचिदपेहि न: सदनतश्च दारिद्र्य रे!
समुल्लसितुमुत्सुका भवति कापि दीपावली।।16।।

गृहाणि परितः सुधा समुपलिप्यतामङ्गणं
सुगोमयपरिष्कृतं झटिति संविधेयं नवम्।
स्रगादिसुरभिः शुभस्तुलसिचत्वरो मण्ड्यतां
समुल्लसतु सोत्सवा सुगृहिणीव दीपावली।।17।।

# गजेन्द्र-मोक्षः

निर्माणमसि विधातुर्जगति विशालस्त्वमेक इति जाने।
गजराज! विचरसि त्वं वनेषु निजयूथमध्यगतः।।1।।

पत्रैरश्वत्थस्य त्वं वर्तयसे फलैः कपित्थैश्च।
अवधूत इव दिनानि त्वं गमयसि धूलिधूसरितः।।2।।

मन्दं मन्दं चलितं धीरं धीरं विलोकितं किञ्चित्।
मुग्धं निमीलितञ्च त्वयि जनयन्तीह मोहं नः।।3।।

कलभः सन् मदचलितो युवा च जरयेह जीर्णवृद्धश्च।
त्वं जनयस्यानन्दं मङ्गलमूर्तिश्च साक्षात् त्वम्।।4।।

हिंस्रैर्जन्तुभिरधिकं पदे पदे काननेषु भरितेषु।
विचरसि यूथगतस्त्वं निर्भयमेव स्वतन्त्रतया।।5।।

ऐरावत इत्याख्यः श्रुतो गजेन्द्रो विडौजसोऽस्माभिः।
दृष्ट्वा त्वामनुमातुं महाबलः शक्य एवेह।।6।।

त्वाम्प्रति हृत्स्वस्माकं सद्भावः कश्चिदभ्युदेतीव।
दुःखाकुर्वन्त्यस्मान् दुर्व्यवहारास्त्वयि क्रूराः।।7।।

दन्तद्वयं सुरुचिरं जनयत्याकर्षणं मनुष्यस्य।
तस्य कृते तेन चिराद् विषयीक्रियसे प्रहारस्य।।8।।

आनीयानीय त्वं नानोपायैः पुरा वनान्तेभ्यः।
गर्वान्वितैर्नृपतिभिर्नियोजितः स्वासु सेवासु।।9।।

दानजलमलिनगण्डो विशालकायो रणे क्षतावयवः।
शत्रुषु विजयस्य त्वं साधनतां तावदानीतः।।10।।

त्वं दर्पशातनामा सम्राजो हर्षवर्धनाख्यस्य।
राजद्वारि निबद्धो दृष्टो भट्टेन बाणेन।।11।।

सिंहासनमध्यगता घण्टाद्वयसङ्गतं समारुह्य।
सामर्थ्यस्य स्वस्य प्रदर्शनं नृपतयोऽकुर्वन्।।12।।

सम्प्रति ते न नृपतयः प्रदर्शनं नापि तादृशं किञ्चित्।
मन्ये तथापि दुःखं तव गजराजस्य तदवस्थम्।।13।।

चिन्ताविलापरहितः सहसेऽद्यापि त्वमत्र दुःखानि।
अस्नात एव सुदृढे निबध्यसे तावदालाने।।14।।

अनुदिनमेव निशाता यदङ्कुशाः सम्पतन्ति गण्डभुवि।
अनुदिनमेव द्वारि द्वारि च भैक्षं समाचरसि।।15।।

सूर्ये प्रतपति भारं वोढुं विनियोज्यसेऽतिविकलोऽपि।
न तवोदरस्य पूर्तिर्भवति बुभुक्षुश्च यापयसि।।16।।

त्वत्सञ्चरणार्हाणि प्रायो नहि काननानि तान्यद्य।
त्वत्स्नानार्हाणि च ते सरोवराण्यपि न तान्यद्य।।17।।

अस्तित्वमेव जातं तव मन्ये साम्प्रतं परार्थमिह।
प्रच्छन्नः कश्चिदिह त्वमिदानीं बोधिसत्त्वोऽसि।।18।।

त्वमहिंसामिह परमं धर्मं मनुषे प्रपीड्यमानोऽपि।
मरणान्तमपि च कष्टं सहमानो मौनमाचरसि।।19।।

गजराज! तावकीनां नियतिं परिवर्तयेत् स आगत्य।
करमुन्नमय्य न कथं तमेव विष्णुं पुनर्ह्वयसे।।20।।

त्वामाकृष्याकृष्य ग्राहा नैकेऽत्र नेतुमिच्छान्ति।
तव वस्तुतः समुचितो गजेन्द्र! कालोऽस्ति मोक्षस्य।।21।।

करुणार्द्रान्तःकरणं क्वचिदुपलब्धासि नैव जनमद्य।
त्वमकारणकारुणिकं तमेकमुपयाहि शरणमतः।।22।।

# हंसान् प्रति

उड्डीय क्व गता भवन्त इत इत्येते न जानीमहे
यूयं मानसनाम्नि वा सरसि नास्माकं दृशां गोचराः।
किं त्यक्त्वैव वसुन्धरां श्रयथ वा लोकोत्तमं ब्रह्मणः,
किं वा पादतले निलीय वचसां देव्याः समे तिष्ठथ।।1।।

यद्यप्यत्र खगान् सुपक्षतिपुटान् सद्भिः स्वरैर्मण्डितान्
प्रायो नित्यमितो नदीतटगताः पश्याम एते वयम्।
युष्मान् किन्तु सकृत् क्वचित्तरुतले द्रष्टुं सकामा भृशं
दृष्टिर्नः समुपोषितेव सुतरां क्लान्तेव नोन्मीलति।।2।।

धन्यास्ते तव खेलितं सुललितं ये पीतवन्तो दृशा
धन्यास्ते ननु यैः क्षणं तव शुभा रावाः श्रुतिं प्रापिताः।
चक्षूंषि श्रुतयश्च हन्त तृषितास्तिष्ठन्ति येषां सदा
ते सर्वे जगतीह जीवितमृता हंस! त्वधन्या वयम्।।3।।

आकाशाख्यमहासरोवरगतं धीरं तरन्तं मुहुः
पश्यामो निशिचन्द्रमेकमुदितं तं पौर्णमास्यां तिथौ।
त्वं दृष्टः खलु पूर्वजन्मसु तदाऽस्माभिस्स्मृतौ कल्प्यसे
साक्षात्कार इह त्वदीय इति स प्रीणाति नः स्वात्मनः।।4।।

पूर्णं विग्रहवत् प्रतीयत इह त्वय्येव सद्ब्रह्म तत्
त्वय्येव स्मृतिकल्पिते मन इदं पुष्णाति शुभ्रां स्थितिम्।
नीरक्षीरविवेक इत्यतिशयं ख्यातो गुणाग्रेसर-
स्त्वय्यस्माज्जगतो गते स नु गतो दिव्यस्त्वदीयो गुणः।।5।।

कामं नाम कदर्थयन्तु बहुधा त्वां सन्ततं वायसाः,
कामं नाम बका भवन्तमथवा निन्दन्तु रात्रिन्दिवम्।
उच्छिन्नेऽपि जगत्यहो तव निजेऽस्तित्वे त्वमेवैकको
जातो व्योमविहारिणामिह कुले सद्भिर्हृदि स्थाप्यसे।।6।।

निःश्रीकाणि सरोवराणि सुबहोः कालादरे त्वां विना
मथ्नन्त्येव महोत्पलानि कलभाः कृत्वा प्रवेशं ततः।
शुष्यन्मानसमेव लक्ष्यत इतो मन्ये भृशं त्वां विना
त्वं कुत्र ध्रियसे सुहंस! चलितं पश्येम किं तावकम्।।7।।

लेखन्या विषयं विधाय सुकविस्त्वां कालिदासोऽभवत्
त्वां संकीर्त्य यशोऽधिकः स भवभूतिः कीर्त्यते भूतले।
श्रीहर्षस्य च नैषधीयचरितं त्वय्यर्पितं राजते
हे हंस! त्वदधीनमेतदधुना मन्मानसं तिष्ठति।।8।।

शोभन्ते न सरोवराणि सुतरामेतानि रे त्वां विना
तेष्वेतानि महोत्पलानि नितरां क्लिश्यन्ति रे त्वां विना।
निर्गच्छ त्वमदृश्यकोटरगतस्त्वां द्रष्टुकामा वयं
साफल्यं सकृदप्यतीव गमयास्माकं दृशां सम्भवम्।।9।।

पूर्वं यानि सरोवराणि सुधिया संसेवितानि त्वया
हंस्या प्रत्यहमेव येषु विहिताः सार्धं त्वया केलयः।
तेषां हन्त तटेषु वासमधुना कुर्वन्ति ये वायसा–
स्तेषां जायत एव नित्यकलहः प्राप्तैर्बकैः साम्प्रतम्।।10

कीराः सन्ति सहस्रशोऽत्र ललिताः सन्त्येव ते केकिनः
पारावतशतानि शान्तमधुना तिष्ठन्त्यतो लक्षशः।
सन्त्येवान्यखगा इतश्च विविधैर्वर्णैः स्वरैर्मण्डिता
अस्मान्, त्वन्तु न हंस! दृश्यस इयं दुःखाकरोति स्थितिः।।11।।

## मानवते!

स्वलघीयस्त्वे पुष्पं पुष्पोद्यानञ्च रे महीयस्त्वे।
मानवते! यत्किञ्चित् सुगन्धि मन्ये त्वदस्तित्वम्।।1।।

स्वलघीयस्त्वे बिन्दुः स्वमहीयस्त्वे च कोऽपि सिन्धुस्त्वम्।
ईदृक्तयेत्तया वाऽनवधार्या त्वमसि मानवते।।2।।

सुरभीण्युपलभ्यन्ते मन्ये वस्तूनि जगति यावन्ति।
मानवते! सर्वेषां त्वमसि तदेकीकृतं सारम्।।3।।

त्वामाश्रित्य लभन्ते सर्वाण्यपि सुन्दराणि सौन्दर्यम्।
सौन्दर्याणामपि रे मानवते त्वमसि सौन्दर्यम्।।4।।

ईहन्ते त्वां द्रष्टुं मानवते! स्प्रष्टुमपि च चेष्टन्ते।
त्वामालिङ्गितुकामा देवास्तिष्ठन्ति नाकगताः।।5।।

भवनेषु नागराणां ग्रामीणानाञ्च हन्त गृहकेषु।
स्नेहेन रे ज्वलन्ती मानवते! दीपिका त्वमसि।।6।।

आदाय सागराणां गाम्भीर्यं हिमवतस्तथौन्नत्यम्।
इह काऽप्यलङ्घनीया मानवते! निर्मिता त्वमसि।।7।।

सुतरामसि त्वमार्द्रा कारुण्येनान्तरे समुच्छलता।
कादम्बिनी च काचित् मानवते! त्वमसि तापहरा।।8।।

मध्याह्ने हलचालनकृतश्रमाणां कदापि कृषकाणाम्।
मानवते! मन्ये त्वं स्फुरसि श्रमवारिपृषतेषु।।9।।

स्मयमानेह कदाचित् कदाचिदायासि दृक्पथं रुदती।
मानवते! मुग्धेव प्रतीतिमस्माकमायासि।।10।।

सङ्कुचितानि लघूनि त्यक्त्वा चेतांसि हन्त मानवते!
चेतांस्यनुगृह्णासि स्थितये त्वमुदारचरितानाम्।।11।।

यद्यपि मानवते! त्वां समेऽपि जानन्ति मृन्मयीत्येव।
तव याथार्थ्यविदां दृशि हिरण्मयीत्येव रे त्वमसि।।12।।

कोऽप्युत्साहश्चलतां वीराणां त्वमसि राष्ट्ररक्षायै।
व्युषितं प्रियमाश्रित्य त्वं कस्याश्चिद् दिदृक्षाऽसि।।13।।

स्मितमसि मानवते! त्वं मातुः क्रोडे शिशोः शयानस्य।
उरसः स्वतः स्त्रवन्ती त्वं स्नेहाद् दुग्धधाराऽसि।।14।।

त्वमृषीणां ध्यानगता मन्त्राणां काचन स्वतःस्फूर्तिः।
आदिकवेर्व्यासस्य च मानवते! त्वं कवित्वमसि।।15।।

कविकुलगुरोः सदैवोड्डयसे किञ्च कल्पनाकाशे।
आचार्यशङ्करस्य स्वान्तःसौन्दर्यलहरी त्वम्।।16।।

पुर्याः परिसर एव श्रान्तां सीतामवेक्षमाणस्य।
मानवते! रामस्य त्वमश्रुणः कश्चिदवतारः।।17।।

प्रकटीभवसि कदाचित् त्वमितो बुद्धस्य हन्त कारुण्ये।
त्वमहिंसायां मन्ये सुमहावीरस्य च स्फुरसि।।18।।

नानक–कबीरयोरसि मानवते! स्वच्छमुत्तरीयमिह।
मानवते! मानसमसि तुलसीदासस्य च स्वच्छम्।।19।।

अन्यत् किं वक्तव्यं गङ्गा यमुना सरस्वती त्वमसि।
मानवते! प्रवहन्ती नित्यममलिना भवेह भुवि।।20।।

त्वमसि कठोरा वज्रादपि प्रसूनाच्च कोमलाऽसि त्वम्।
लोकोत्तराऽसि काचिन्मानवते! त्वां न जानीमः।।21।।

आनन्दोल्लासे त्वं विकासमायासि काञ्चनार इव।
आर्तानां नादे सति मानवते भवसि करुणार्द्रा।।22।।

# दिनेष्वेषु

वेदानां स्वाध्यायोऽस्माकं देशे विराममाप्त इव।
क्वचिदपि वेदान्ता न श्रुतिगोचरतां न उपयान्ति।।1।।

मीमांसामध्येतुं प्रवर्तते नैव कोऽपि जिज्ञासुः।
नापि न्यायस्य कृते कोऽप्युत्सहते सुनिपुणोऽपि।।2।।

अष्टाध्यायी क्रन्दति रोदिति रात्रिन्दिवं महाभाष्यम्।
विरतः सम्प्रति विदुषां सूत्राण्याश्रित्य शास्त्रार्थः।।3।।

काव्यालापस्रोतस्तन्मन्ये समय-सैकते लीनम्।
नामानि कालिदास-प्रभृतीनां नेह गृह्यन्ते।।4।।

कस्यापि न जिज्ञासा कौटिल्यस्यार्थशास्त्रविषयेऽपि।
भरतस्य नाट्यशास्त्रं नाध्येतुं कश्चिदुत्सहते।।5।।

वाल्मीके रामायणमपि कश्चिच्चेष्टते न परिचेतुम्।
नैके सुमहद् भारतमवलोक्यैवेह मूर्च्छन्ति।।6।।

विद्यावत्त्वं स्वीयं कोऽप्युद्यमते न हि प्रमाणयितुम्।
श्रीमद्भागवतं कोऽवगाहतामद्य गम्भीरम्।।7।।

तिष्ठत्युपेक्षितेव प्रतीक्षमाणेव वत्सकान् स्वीयान्।
सवंर्धनमनवाप्त क्षीणक्षीणेव देवगवी।।8।।

भूयोऽवतर पृथिव्यां गोपाल! स्वं विहाय वैकुण्ठम्।
पृथिवी गोरूपधरा प्रतीक्षते त्वां दिनेष्वेषु।।9।।

क्वचिदतिवृष्टिर्जायत इह क्वचिज्जायते त्वनावृष्टिः।
ग्रसमानेव बुभुक्षा जन–समुदायं दिनेष्वेषु।।10।।

सत्यस्य न प्रतिष्ठा प्रभवत्येतत्त्वसत्यसाम्राज्यम्।
भ्रष्टाचारो जगति प्रवर्धमानो दिनेष्वेषु।।11।।

धर्माणामुपदेशाः सर्वत्रैवेह सम्प्रवर्त्यन्ते।
कस्मिंश्चिदपि न तेषां प्रभाव आलक्ष्यते कश्चित्।।12।।

सर्वत्र कण्टकानां प्रवर्धमानोपलक्ष्यते जातिः।
उत्पीडनमिव दृश्यत इतः सुमनसां दिनेष्वेषु।।13।।

न महाभारतकाले केवलमजनीह कोऽपि धृतराष्ट्रः।
नैकेऽन्धा धृतराष्ट्रा इह राजन्ते दिनेष्वेषु।।14।।

केवलमिह गङ्गायाः पानीयत्वं न तावदुच्छिन्नम्।
शङ्कास्पदमिव तस्याः स्नानीयत्वं दिनेष्वेषु।।15।।

धर्मं प्रति या श्रद्धा विश्वासो यश्च विषय ईशस्य।
तत् क्षीयमाणमुभयं संसारेऽस्मिन् दिनेष्वेषु।।16।।

श्रोतारो मन्तारः प्रायो जगतीह नोपलभ्यन्ते।
उपदेष्टारो यद्यपि नगरे नगरे दिनेष्वेषु।।17।।

कारागृहेषु भाव्यं धूर्तैं रात्रिन्दिवं निबद्धैर्यैः।
विहरन्तो दृश्यन्ते चतुष्पथे ते दिनेष्वेषु।।18।।

यस्या दानस्यासीन्माहात्म्यं समधिकं गते काले।
विद्या विक्रीयत इह सर्वत्रैषा दिनेष्वेषु।।19।।

येषां सौजन्यस्य स्तुतयो गीताः प्रकाममस्माभिः।
परिचिन्वन्ति न तेऽस्मानत्याश्चर्यं दिनेष्वेषु।।20।।

गङ्गा मलिनीभूता प्राप्ता मालिन्यमिह च यमुनाऽपि।
का नु सरस्वत्याः स्याद् दशा न जाने दिनेष्वेषु।।21।।

विनिवारिता तृषेयं विधिना स्यात् केन वा बुभुक्षेयम्।
इति चिन्तैव मनुष्यं विकलीकुरुते दिनेष्वेषु।।22।।

उदरस्य येन विधिना पूर्तिः प्रभवेद् दुरन्तपूरस्य।
चिन्त्य इदम्प्रथमतया स एव मन्ये दिनेष्वेषु।।23।।

लोकस्य व्यवहारा जाताः सर्वेऽपि हन्त परिवृत्ताः।
दर्शं दर्शं चेतोऽस्माकं खिन्नं दिनेष्वेषु।।24।।

## दाण्डी-यात्रा

लवण-विधानपिधानं महदुद्देश्यं ययोः किमप्यासीत्।
दाण्डीपथप्रवृत्तौ स्मरणीयौ तावुभौ चरणौ।।1।।

साबरमत्याः सिद्धाः सत्यस्य स्वाग्रहेण सम्पुश्टाः
राष्ट्रस्य स्वाराज्यं, धृतव्रता लब्धुकामाश्च।।2।।

लवणे कर-ग्रहस्य प्रबलविरोधः स कोऽपि जनतायाः।
सविनयमेकमवज्ञान्दोलनमासीदपूर्वमिह।।3।।

दाण्डीं यावद् यात्रा जनसामान्यैः सहाष्टसप्ततिभिः।
आसीत् स पूर्वरङ्गः स्वातन्त्र्याख्यस्य नाट्यस्य।।4।।

एतन्नासीन्मन्ये कस्यापि कवेः प्रयोगविज्ञानम्।
सत्यस्य कश्चिदासीत्तथाप्यवश्यं प्रयोगः सः।।5।।

साधारणान्नपानं स्वदेशजननिर्मितं च परिधानम्।
एवं गन्तव्यं प्रति च स्वपदाभ्यां शान्तसञ्चारः।।6।।

लगुडैः क्वचित् प्रहारः प्रस्तरखण्डैः क्वचिच्छिरःस्फोटः।
नानाविधबाधानामाश्चर्यकरं सहिष्णुत्वम्।।7।।

सत्यस्याहिंसाया एष विचित्रो महांश्च संयोगः।
दृष्टो न भारतेऽस्मिन् गतासु मन्ये शताब्दीषु।।8।।

सर्वस्यास्य य आसीदेको नाट्स्य सूत्रधार इह।
मोहनदासो गान्धीः सुकीर्त्यते कर्मचन्दसुतः।।9।।

याते 'तिलके' स्वर्गं नेतरि याते च 'गोखले'नाम्नि।
सिद्ध्यै स्वातन्त्र्यस्याग्रेसर एकोऽभवद् गान्धी।।10।।

विन्दति चरन्नितो मधु वेदः कृतवान् यमेकमुद्घोषम्।
तं श्रुतवान् स महात्मा स्वकार्यसिद्धिं परं मेने।।11।।

आसीत् स तुल्यनिन्दास्तुतिरासीद् येन केन सन्तुष्टः।
मौनी स कश्चिदासीत् कश्चिद् भगवत्प्रियश्चासीत्।।12।।

हृदि सन्निधाय रामं स्वमनस्याधाय सर्वलोकहितम्।
दाण्डी–यात्रायां स प्रवृत्त आसीन्महापुरुषः।।13।।

सत्यमहिंसा चेति द्वे शस्त्रे तस्य हन्त हस्तगते।
न जयाजययोः पक्षे न च लाभालाभयोरासीत्।।14।।

यस्यां सर्वे सुखिनो निरामयाः सन्तु यत्र सर्वेऽपि।
सा भारतीयसंस्कृतिरासीत् हृदयङ्गता तस्य।।15।।

तस्य करे गीताऽऽसीदेकस्मिन् लगुड एवमन्यस्मिन्।
अर्धपटावृतदेहः स कश्चिदासीन्महानात्मा।।16।।

अग्रेसरतस्तस्य तु नाभावस्तद्गतानुगतिकानाम्।
भारतनभसि स उदितः कोऽप्यासीदन्य दीधितिमान्।।17।।

सर्वेष्वपि धर्मेषु प्रबलाऽऽसीत् काऽपि तन्मनस्यास्था।
जगतोऽस्य च निर्मातरि स कश्चिदासीद् दृढश्रद्धः।।18।।

चित्तस्य तस्य कश्चिद् विस्तारो ज्ञात एव सर्वजनैः।
लीना कुटुम्बकत्वं प्राप्तेवेयं धरा यस्मिन्।।19।।

दाण्डीयात्रा वस्तुत आसीत् तस्येह तीर्थयात्रेव।
स्वातन्त्र्यबोध उदितो ययेह सामान्यलोकस्य।।20।।

यः सञ्चारः पद्भ्यां तेन कृतो हन्त धूलिमलिनाभ्याम्।
आसीत् क्षमः स मन्ये तं भूभागं पवित्रतां नेतुम्।।21।।

स्मृतिमायान्ति प्रायस्तद्भाणतानीह तानि सरलानि।
सुरभिर्दाण्डीयात्राऽद्यत्वेऽप्यनुभूयतेऽस्माभिः।।22।।

दाण्डीयात्राया इह वर्षाणां पञ्चसप्ततिर्याता।
उत्पद्येत स भावः प्रवर्ततां सा पुनर्यात्रा।।23।।

# ग्रामटिका

दु:खाकरोति दृष्टा ग्रामटिका भारतस्य मां यदपि।
अस्यामुषितुं तदपि प्रकाममाकाङ्क्षते चेत:।।1।।

अस्यां यदपि निवसतां संस्कारो नैव लक्ष्यते कश्चित्।
एषामसंस्कृतत्वं जनयत्याकर्षणं तदपि।।2।।

जीवनसरिदत्र शनैः प्रवहन्ती भाति निस्तरङ्गेव।
नि:स्नेहदीपिकेव ग्रामटिका भाति, न च भाति।।3।।

मलिनाम्बरा कदाचिद् गृहीतमौना भृशं विषण्णेव।
प्रहसन्ती च कदाचिच्छरदः सम्फुल्लमल्लीव।।4।।

संक्षिप्तेन शरीरे परिधानेनेयमर्धनग्नेव।
श्रमजनितस्वेदकणैः सद्य:स्नातेव खिन्नेव।।5।।

लवणरसाप्लुतमथवा मधुररससम्मिश्रमोदनं भुङ्क्ते।
भरितोदरा कदाचित् कदाप्यभुक्तैव निद्राति।।6।।

धूलिष्वनया बाल्यं यौवनमथ वार्धकञ्च याप्यन्ते।
मन्ये ग्रामटिकायाः परिचय एकोऽस्ति धूलिरिति।।7।।

तपनप्रखरातपतो ग्रामटिकैषा दिवा भृशं तपति।
तमसा स्वं छादयति प्रायो निशि सूचिभेद्येन।।8।।

जागर्ति वेपमाना निर्वसना हैमनीषु रजनीषु।
वर्षत्स्वार्द्रा तिष्ठति मेघेषु प्रावृषेण्येषु।।9।।

नहि केनापि द्वेषो न च रागः केनचिन्मनस्यस्याः।
स्वस्यास्तित्वस्य कृते श्रममर्चति देवमियमेकम्।।10।।

धर्मादीन् पुरुषार्थान् कथमेषा ज्ञातुमत्र शक्नोतु।
जागर्त्युदिते सूर्ये यातेऽस्तं किञ्च निद्राति।।11।।

श्राम्यति दिनेषु नित्यं रात्रिषु निद्राति किञ्चिदुपभुज्य।
याप्यन्त एवमनया दिवसाः पक्षास्तथा मासाः।।12।।

स्वर्गनरकयोर्विषये ग्रामटिका किमपि नैव वेत्तीयम्।
अस्या मते न भेदः कश्चित् सुखदुःखयोर्मध्ये।।13।।

निन्दति कमपि न कमपि स्तौत्येषा तिष्ठतीह तुष्टेव।
वस्तुत एषा वेत्ति न निन्दास्तुतिशब्दयोरर्थम्।।14।।

वार्तां न जनः पृच्छति समीपमागत्य कश्चिदप्येनाम्।
तिष्ठति यद्यप्येषा प्रतीक्षमाणा न कमपीतः।।15।।

क्वेदानीमादिकविः क्वेदानीं हन्त कालिदासः सः।
अपि दृष्टेह भवद्भ्यां ग्रामटिका दीनदीनेयम्।।16।।

आदिकवे! पश्येमां क्लिश्यत्यद्यापि तावकी सीता।
कविकुलगुरो! विलोकय शकुन्तलाऽद्यापि दृश्येत।।17

यो गीयत इह रागो ग्रामटिकायां स दुःखरागोऽस्ति।
करुणार्द्रचेतसस्तं केचिदिमं श्रोतुमर्हन्ति।।18।।

बहवश्चक्षुष्मन्तोऽनेन पथा नित्यमेव गच्छन्ति।
न परं कश्चिदुपेतश्चक्षुष्मान् द्रष्टुकाम इमाम्।।19।।

कुर्वस्यां भवभूते! ग्रामटिकायां निवासमेकदिनम्।
मूकानां परिदेवितमाकर्णयितुं क्षमश्चेत् त्वम्।।20।।

उपदेशा धर्मविदां ग्रामटिकां प्राप्य हन्त विरमन्ति।
नीतिविदां नीतय इह भवन्त्यकिञ्चित्कराः प्रायः।।21।।

स्प्रष्टुमपि ग्रामटिकां शास्त्राण्येनां न हन्त चेष्टन्ते।
जननायकोऽपि कश्चिन्नायाति द्रष्टुमप्येनाम्।।22।।

यावद् बुभुक्षुरेषा ग्रामटिका तिष्ठतीह निर्वसना।
शापादस्यास्तावत् स्यान्न सुखी कोऽपि न च शान्तः।।23।।

यदि रुदती ग्रामटिका स्थास्यति जगतीह यावदेकाऽपि।
द्रक्ष्यसि दिन एकस्मिन् इह निर्जनतां गतं सर्वम्।।24।।

वाग्देव्या लक्ष्म्या वा ग्रामटिका वञ्चिता कृपादृष्ट्या।
केनापि दुर्ग्रहेण क्लिश्यति नित्यं गृहीतेव।।25।।

## सम्मार्जनी

प्रत्येकमेव सद्मनि नृपतेर्भवने मुनेः कुटीरे वा।
महदुपयोगित्वमहं बिभर्मि सम्मार्जनीत्याख्या।।1।।

मालिन्यं यत्किञ्चिद् यत्किञ्चिच्चैव वस्तु दुर्गन्धि।
सकृदपि मत्सञ्चारान्निवर्तते झटिति तत्सर्वम्।।2।।

रूपाणि सन्ति यद्यपि बहूनि मे सम्प्रयुज्यमानानि।
सम्मार्जनीति नाम प्रख्यातं मे तथाप्येकम्।।3।।

मत्सञ्चारः प्रभवेत्पुरीशभवने तथा 'पुरीष–गृहे'।
उभयोर्विनैव भेदं मन्वाना सञ्चराम्येषा।।4।।

कोऽपि न सम्मन्यत इह गौरिति मां हन्त गौरिवेत्यपि माम्।
यद्यपि करोमि सुतरां स्थलानि सञ्चारपूतानि।।5।।

रूक्षायां मलिनायां भूमौ नित्यं भवामि संघृष्टा।
कुर्वत्याश्चीत्कारं मम कष्टं को नु जानीयात्।।6।।

स्वस्य गृहस्य गृहिण्यो मामादाय प्रकुर्वते शुद्धिम्।
मां मन्वानाऽशुद्धां क्षिपन्ति कोणे तमोभरिते।।7।।

संघर्षणेन भूमौ व्याकीर्णोपेक्षिता च तिष्ठन्ती।
क्रमशः क्षीणतरत्वं प्राप्य त्याज्या भवाम्येशा।।8।।

कच्चरजातस्यादौ निवारणे हन्त साधनीभूता।
निक्षिप्ताऽन्ते कच्चरमये स्थले कच्चरीभूता।।9।।

स्मरति न कोऽपि कदाचित् कष्टमयीं हन्त मामकीं सेवाम्।
प्रत्येकञ्च गृहिण्याः पाणिस्पर्शं स्मराम्येषा।।10।।

ग्रामटिकावास्तव्या निःस्वा गृहिणी स्वपर्णशालां माम्।
आनीय रश्मिबन्धं बद्ध्वा गृह्णाति मत्सेवाम्।।11।।

यत्किञ्चित् सेवायामुपयोगात् किमपि मे न सौभाग्यम्।
कादाचित्की भवति स्थितिरिति मन्ये मदस्तित्वे।।12।।

गृहरथ्यानगराणां शुद्धीकरणेऽर्पिताऽहमस्मीह।
आजन्मन आमृत्योः काचिदशुद्धैव तिष्ठामि।।13।।

कच्चरराशौ श्वानः कदाचिदथ शूकराः कदाचिच्च।
कलहायन्ते नित्यं कृते समे स्वस्य भागस्य।।14।।

सम्प्रत्यात्मन एतद्व्यथितं विनिवेद्य कन्नु तुष्टा स्याम्।
दौर्भाग्यग्रस्ताया व्यथाकथां कश्च मे शृणुयात्।।15।।

मूका जडा च बधिरा वर्ते यदपीह हन्त संसारे।
सम्मार्जन्यहमस्मि स्वेन तदपि सर्वमेव सहे।।16।।

स्वस्यास्तित्वस्यान्तं प्रतीक्षमाणाऽस्मि कच्चरे लीना।
घटनैका संघटिता काऽप्यहमिव सङ्गता जरती।।17।।

पत्या रहिताऽपत्यैर्गृहाद् विनिःसरिता च जरतीयम्।
तिष्ठति मयैव सार्धं वसनविहीना क्षुधा खिन्ना।।18।।

मां गृह्णाति कदाचिच्छिरो मयि स्वञ्च हन्त निदधाति।
मललिप्तसर्वगात्रा विकीर्णकेशा रजोभरिता।।19।।

व्रणराशिपीडितेयं शेते न च हन्त नापि जागर्ति।
दर्शं दर्शं व्यथितामेनां मे विस्मृतं व्यथितम्।।20।।

सद्योऽद्यैव मृतेयं सम्प्रति सञ्जीवितेति मन्येऽहम्।
कच्चरराशिचितायामस्यामेनाञ्च धक्ष्यन्ति।।21।।

अहमप्यनया सार्धं यत्किञ्चिद् भस्मसाद् भविष्यामि।
सम्प्रति विराममेष्यति मदीयमस्तित्वदौर्भाग्यम्।।22।।

## दलित–प्रसङ्ग:

दु:खं स्थितमस्माकं जीवनपर्यन्तमेव धूलिगतै:।
यत्पूर्वजैस्तथैवास्माभि: स्वदिनानि नीयन्ते।।1।।

शूद्रा इत्युक्ता वयमिह द्विजानां स्थिताश्च सेवायाम्।
वयमीश्वरस्य राज्ये परिचरणायैव यज्जनिता:।।2।।

पक्षेऽस्माकं विषमा दृष्टिर्जातेश्वरस्य समदृष्टे:।
वयमुत्पत्तिमवाप्ता: पद्भ्यामेवेह तस्येति।।3।।

न शरीरे नाङ्गे वा न च रुधिरे नापि मांसमज्जासु।
भेदोऽस्माकं कश्चिद् द्विजेभ्य इह लक्ष्यते जगति।।4।।

किमिदं विधेर्विधानं मतमथवा धर्मशास्त्रकाराणाम्।
असति च भेदे कथमिह त उत्तमा: स्मो वयं नीचा:।।5।।

यस्यां ग्रामटिकायां जाता न ततो विनिर्गता: क्वचन।
ग्रीष्मे तप्ता:, शैत्यात् प्रकम्पिता: किञ्च शीततौं।।6।।

विहगानां खलु मध्ये स्थितिर्यथा मन्यतेऽत्र काकानाम्।
परिगणितास्तिष्ठामो वयं तथेतो मनुष्याणाम्।।7।।

केदाराणां कर्षणकार्ये वपने च तत्र बीजानाम्।
खन्त्रीभि: श्राम्यामो वयमिह केदारनाथानाम्।।8।।

कृषिफललाभावसरे पृथक्कृताः सर्वथैव तिष्ठामः।
अस्मभ्यं दीयत इव भिक्षान्नं भागधेयं नः।।9।।

मलिनान्येवास्माकं भवन्ति वासांसि जीर्णजीर्णानि।
अस्माकमुदरपूर्त्यै भवन्ति बहुधा कदन्नानि।।10।।

अभ्यस्ता वयमेते नैकविधानां सदैव दुःखानाम्।
दुःखसहिष्णुत्वमितः सञ्जातं भाग्यमस्माकम्।।11।।

स्वार्थपराणामस्मान् प्रत्यासीत् काचिदेव दुर्नीतिः।
एतावन्तं कालं प्रवञ्चिताः स्वाधिकारेण।।12।।

आजन्मन आमृत्योर्भारोद्वहनं शिरोभिरस्माभिः।
स्वस्कन्धाभ्यां विहितं वृत्तान्तोऽस्माकमेतावान्।।13।।

वक्तुं श्रोतुं द्रष्टुं कृता निजैरिन्द्रियैरनर्हाः स्मः।
अनुभूतं नास्माभिः क्वचिदपि करुणार्द्रचित्तत्वम्।।14।।

समुपैति ग्रामटिकां वार्तां स्प्रष्टुं न हन्त कश्चिदपि।
प्रोञ्छति नाश्रूणि तथा रुदतामस्माकमक्षिभ्यः।।15।।

पूर्वस्मिन्नस्माभिः कृतस्य पापस्य कोऽपि परिपाकः।
अस्मिञ्जन्मनि यदिदं शूद्राणां नः कुले जन्म।।16।।

आमृत्योर्द्रारिद्र्यं दुःखानुभवोऽन्वहं बुभुक्षायाः।
अपमानश्च प्रतिपदमिति चरितं शूद्रकुलजानाम्।।17।।

वाग्देव्या न कृपाया वयमिह पात्रं न च श्रियो देव्याः।
सर्वात्मनाऽऽवृता वयमज्ञानेनान्धकारेण।।18।।

सामप्रतमप्यस्मासु द्रवति न चेत: कथञ्चिदीशस्य।
धनपतय: कथमिव ते द्रवेयुरस्मासु निष्करुणा:।।19।।

उद्धारायास्माकं नागन्ता कश्चिदिति वयं विद्म:।
स्वोद्धारोऽस्माभिरत: स्वहस्त एवेति निर्णीतम्।।20।।

अस्मानग्रे चलितानवरोद्धुं नैव कोऽपि शक्नोति।
दलिता: सन्तोऽपि वयं दलयितुमपि साम्प्रतं शक्ता:।।21।।

सुमहान् स भीमराव: सुविदित इह मार्गदर्शकोऽस्माकम्।
चक्षुष्मतेह चक्षुस्तेन न उन्मीलितं सम्यक्।।22।।

# जगन्नाथसुभाषितम्

(भागः -2)

## (1) सौहार्दम्

दिवसेष्वेषु न केवलमापः सततं सरित्सु शुष्यन्ति।
शुष्यत् सौहार्दमपि प्रतीयते मानवस्य हृदि।।

## (2) मृत्युः

न गतेरस्या मन्ये पूर्णविरामः क्वचित् कदाचिदपि।
आगन्ता स कदाचिन्मृत्युरकिञ्चित्करो नाम।।

## (3) दौर्भाग्यम्

छलिता वयमत्यर्थं कृपाकटाक्षैर्निरन्तरैः स्वेषाम्।
न पुरा कदाचिदासीद् दौर्भाग्यं तावदस्माकम्।।

## (4) शुश्रूषुः

मामतिरिच्य प्रायो गोष्ठ्यां सर्वेऽपि सन्ति वक्तारः।
भाषन्ते मामेकं वराकमुद्दिश्य शुश्रूषुम्।।

## (5) नग्नत्वम्

नग्नं मां पश्यन्तीति न मय्युत्पद्यते क्षणं चिन्ता।
वासांसि लज्जिता मे केचित् स्वयमेव दास्यन्ति।।

## (6) हरितत्वम्

यद्भूमेर्हरितत्वं क्षरदिव संल्लक्ष्यतेऽतिवेगेन।
तन्मानवहृदयस्य प्रतिबिम्बं शुष्यतो मन्ये।।

**(7) गङ्गा**

यामिह समनुभवन्ति स्पृष्ट्वा शुद्धिं परां समेऽप्यार्याः।
गङ्गा सैवेदानीं प्रार्थयते स्वात्मनः शुद्धिम्।।

**(8) गुरूणामाशिषः**

आशीर्भिः सुगुरूणामवलम्बो मे पदे पदे दत्तः।
कथमन्यथेह पङ्गुर्भवेयमर्हः पुरो गन्तुम्।।

**(9) स्वरलयौ**

अद्यावधि नास्माकं स्वरो लयश्चैकरूपतां प्राप्तौ।
स्वरलययोः संवादो जनयति किमपीह माधुर्यम्।।

**(10) मनुष्यबुद्धिः**

ग्रन्थानां निर्देशान् मनुष्यबुद्धिः कदाचिदत्येति।
सिध्यति बत नियमानां किञ्चिदकिञ्चित्करत्वमपि।।

**(11) कवेः प्रसिद्धिः**

निर्माय न पद्यानां लभते कश्चिद् यशः सहस्रमपि।
पद्यैर्द्वित्रैरेव प्रसिद्धिमाप्नोति कश्चिदिह।।

**(12) आकृतयः**

आचक्षते हृदन्तर्गतं मनुष्यस्य नूनमाकृतयः।
सम्प्रति जना निजाया आवरणेऽप्याकृतेर्निपुणाः।।

## (13) गुणग्रहीतृत्वम्

न परेषां परमाणून् गुणानहं वच्मि पर्वतीकृत्य।
गुणिनां विषये नूनं बिभर्मि कमपीह सम्मोहम्।।

## (14) स्मृतिः

जगति जनस्य घटन्ते पुरतो मिलनानि हन्त विरहाश्च।
कतिचित् परमामृत्योः स्मृतिमेकान्ते सदा यान्ति।।

## (15) अग्निकाण्डः

सन्दृश्यते सुदूरात् प्रबलतमो धूमराशिरुद्गच्छन्।
मन्ये प्रवर्तमानः क्वचिदतिभीमोऽग्निकाण्डः स्यात्।।

## (16) सङ्ग्रहीतृत्वम्

एषु दिनेषु व्याप्तं सर्वेष्वेवेह सङ्गृहीतृत्वम्।
संन्यासिनोऽपि सम्प्रति दृश्यन्ते सङ्ग्रहासक्ताः।।

## (17) सीता

यद्यपि मयाऽधिरङ्गं निर्व्यूढा भूमिका दशास्यस्य।
क्षणमपि तथापि सीता मातेति व्यस्मरं नैव।।

## (18) कोऽपि वराकः

विस्मृतिगर्तगतेषु प्रायः कविषु स्वनामधन्येषु।
स्मृतिपथमायात्यसकृत् कोऽपि वराको जगन्नाथः।।

**(19) जागरूकाः**

जागर्तीति न कञ्चित् सम्मन्यन्तेऽत्र जागरूकेषु।
निद्रालवोऽपि बहवो गण्यन्ते जागरूकेषु।।

**(20) वर्षाभावः**

श्रावणभाद्रपदावलमायातौ मत्पुरं प्रयातौ च।
काऽपि न रथ्या क्लिन्ना गर्जितमाकर्णितं नापि।।

**(21) विडम्बना**

विमुखा एव प्रायो मत्पुरतो यान्ति सर्व आत्मीयः।
द्वित्राः सङ्गच्छन्ते किन्तु परे सम्मुखीभूताः।।

**(22) स्पर्शः**

अन्तःप्रविश्य कोऽपि स्पर्शः कुरुते पवित्रमात्मानम्।
आप्लावयति रसेन तु समग्रमस्तित्वमिह कोऽपि।।

**(23) असहायः**

असहायः सञ्जातो मनुजः प्रत्येकमेषु दिवसेषु।
शब्दावर्थविरहितौ सौहार्दं साहचर्यञ्च।।

**(24) सतृषा दृष्टयः**

अभिनेतारो न वयं न च नेतारोऽपि राजनीतिविदः।
कथमस्मासु पतेयुर्दृष्टिमतां दृष्टयः सतृषाः।।

**(25) नटाः**

हसितं कृत्रिममेषां कृत्रिममाभाति हन्त रुदितञ्च।
किन्नु नटानां वसतौ वयमायाता दिनेष्वेषु।।

**(26) मनुष्यत्वम्**

परिचय एको वस्तुत इतो मनुष्यस्य रे मनुष्यत्वम्।
मुस्लिम इति हिन्दुरिति क्रिश्चन इति बाह्य आरोपः।।

**(27) भ्रमणम्**

गिरिगह्वरे कदाचित् प्रसूनभरिते कदाचिदुद्याने।
भ्रामयति मां मनो मे कदाचिदाकृष्य कान्तारे।।

**(28) ज्ञानालोकः**

गुरवः सन्ति सहस्रं शतं विराजन्त इह जगद्गुरवः।
मन्ये तथापि रहितो ज्ञानालोकेन लोकोऽयम्।।

**(29) आदर्शविक्रेतारः**

आदर्शानामेते विक्रेतारो वयं नु सम्प्राप्ताः।
जन्मान्धानां नगरं दुर्योगेनैव केनापि।।

**(30) प्रतीक्षा**

आसीः प्रतीक्षमाणस्त्वं मां दिवसांश्च कांश्चिदिह मासान्।
अधुना प्रतीक्षमाणोऽस्मि त्वां सुबहूनि वर्षाणि।।

## (31) सौन्दर्यम्

आकर्षणाय मन्ये बाह्यमलं तावदेव सौन्दर्यम्।
आन्तरिकं सौन्दर्यं नहि यावद् दृष्टिपथमेति।।

## (32) पश्चात्तापः

कालो यातः सुमहान् मनोविनोदेन किञ्च शयनेन।
श्वसिमः केवलमेते न काचिदस्माकमुपलब्धिः।।

## (33) वसुधैव कुटुम्बकम्

मध्यगता देशानां विध्वस्ताः सन्तु भित्तयः सर्वाः।
वसुधामिमां कुटुम्बकमिति मनुतां वस्तुतो मनुजः।।

## (34) कल्पना

नभ उत्पतितुं पक्षतिरुपलब्धा जगति कल्पनाऽस्माभिः।
कवयो वयं खगास्ते न पञ्जरं सोढुमर्हा ये।।

## (35) स्वराः

तान् धारयन्ति पश्यत सदलङ्कारान् खरा दिनेष्वेषु।
धारयितुं यानश्वा अर्हन्ति श्यामकर्णा हीः।।

## (36) असहिष्णुता

असहिष्णुत्वमिदानीं मन्ये प्रत्येकमिह जने व्याप्तम्।
नगरग्रामाः सर्वेऽग्निपरीता हन्त दृश्यन्ते।।

### (37) संस्कृतम्

केचिदुपेक्षन्ते बत संस्कृतमिह यातयाममिति मत्वा।
प्राणिति वस्तुत एतत् प्रत्येकं भारतीयेषु।।

### (38) नीडनिर्माणम्

उद्यानानि वनानि च विलीयमानानि सर्वतः सन्ति।
कुत्र गतैरस्माभिर्विधीयतां नीडनिर्माणम्।।

### (39) पाण्डित्यम्

जनयेदवरोधं मे पाण्डित्यं स्वेच्छया समुत्पतितुम्।
इति नाभिनिवेशो मे तद्विषयेऽभूत् कदाचिदपि।।

### (40) खादतमोदता

खादतमोदतयाऽत्र प्रायः स्वदिनानि यापयन्ति जनाः।
यत्साधनमेवासीत् तदजनि साध्यं दिनेष्वेषु।।

### (41) वैराग्यम्

कस्यचिदुदेति साधोः सौभाग्यस्येह चेत् पराकाष्ठा।
आलिङ्गति वैराग्यं मन्ये तस्यैव हृद्देशम्।।

### (42) जीर्णपत्रम्

वायोर्वेगेनेतस्ततो विचलितत्वमेकमतिरिच्य।
शाखायाः पतितस्य क्व स्थैर्यं जीर्णपत्रस्य।।

### (43) जगद्गुरुत्वम्

स्वस्मिन्नारोप्य हठाज्जगद्गुरुत्वं सदा मिमीलन्तः।
गजवद् दृश्यन्त इतः केचन लम्बोदराः प्रायः॥

### (44) स एव वक्ता स च दर्शनीयः

दृक्पथमनुगच्छन् यं जनसम्मर्दो विशाल आयाति।
सम्प्रति स एव वक्ता स मन्यते दर्शनीयश्च॥

### (45) गङ्गा

पौत्राः प्रक्ष्यन्ति स्वान् पितामहान् प्राय उत्सुकाः सन्तः।
यां पुस्तके पठामः शृणुमश्च क्वेह सा गङ्गा॥

### (46) विडम्बना

नगरे प्रवर्तमानो वासन्तिक उत्सवोऽयमेकत्र।
ग्रामे करकापाताद् रोदिति कृषकोऽयमन्यत्र॥

### (47) धर्मध्वजाः

धर्मध्वजैरिदानीमुत्तोल्यन्ते ध्वजाः स्वधर्मस्य।
परिलक्ष्यते तु मध्ये दण्डादण्ड्येव बत तेषाम्॥

### (48) संवेदना

अस्तित्वमेतदधुना प्राप्तं मरुभूमितां मनुष्यस्य।
संवेदना समन्तान्निरन्तरं क्षीयमाणेव॥

## (49) स्वार्थपरता

कीदृशमहो महत्त्वं महातरूणां य आत्मना सततम्।
रसमाकृष्य तरूणां लघीयसां वर्धयन्ति स्वम्।।

## (50) अग्निकाण्डः

एकस्मिन् नगरे वा ग्रामे वा नायमग्निकाण्ड इह।
प्रतिभात्यग्निपरीतं भारतमेतर्हि सम्पूर्णम्।।

## (51) सूत्रधारः

नेपथ्यान्तस्तिष्ठन् त्वमदृश्यः सूत्रधार इव कश्चित्।
सर्वं प्रवर्तयन्नसि नाटकचक्रं विना यत्नम्।।

## (52) कविः

स्वं मन्यते महाकविरिति कोऽपि च वावदीति गोष्ठीषु।
कविरित्यपि नात्मानं स्वीचक्रुः कालिदासाद्याः।।

## (53) वृद्धगृध्राः

अस्मिन् श्मशानवृक्षे वृद्धास्तिष्ठन्त्यनेकशो गृध्राः।
भक्ष्यं प्रतीक्षमाणा बुभुक्षिता एव वर्तन्ते।।

## (54) स्मृतिविषयः

हृदि कम्पः समजायत यस्य परिचयेन मामके, स जनः।
मम साम्प्रतं दवीयानसकृदुपैति स्मृतिद्वारम्।।

### (55) स्वजनाः

द्वाराणि वारितानि स्वजनानां त्वत्कृते जगन्नाथ!
स्वजनं त्वां मन्वानाः स्वजनास्त्वद्द्वारमायान्ति।।

### (56) जगद्गुरवः

नहि केवलमिह गुरवो नैके तिष्ठन्ति रे जगद्गुरवः।
अज्ञानमिमिरराशिस्तथापि लोकस्य तदवस्थः।।

### (57) हिंसा

क्षुद्राः स्वार्था मानव–हृदयं यावत् प्रभावयिष्यन्ति।
तावन्न हि प्रणष्टा भवितेयं राक्षसी हिंसा।।

### (58) हिंसावह्निः

गौतमबुद्ध! क्वासि क्व स्वामिन् वर्तसे महावीर!
हिंसावह्निपरीतं नयत प्रशमं युवां विश्वम्।।

### (59) हृदयाभावः

स्यादिह वक्षसि मन्ये कस्यचन प्रस्तरस्य हृदयमपि।
कस्यचिदिहाततायिन उरसि भवत्येव नो हृदयम्।।

### (60) सौन्दर्यम्

विज्ञानं यत्किञ्चिद् दर्शनमथवैतदस्ति सौन्दर्यम्।
एताभ्यामपि मन्ये सौन्दर्यं किञ्चिदतिरिक्तम्।।

## (61) वर्णवैविध्यम्

सम्मिलितैः खलु वर्णैर्विविधैरुत्पद्यतेऽत्र यो वर्णः।
मन्ये तस्य समुचितं यत्किञ्चिद् भारतं नाम।।

## (62) चित्रकूटः

कामदगिरिरिति लोके यो रामस्य स्थितेः सुविख्यातः।
दृप्तककुद्मानिव नः स चित्रकूटो नतेः पात्रम्।।

## (63) अन्तःसङ्गीतम्

अन्तःसङ्गीतमिव प्रायः सङ्गच्छतेऽनुभूतिपथम्।
कोलाहलपर्यायो बाह्यं सङ्गीतमाभाति।।

## (64) अशान्तिः

न दिशोः पूर्वोत्तरयोः शान्तिर्न च हन्त पश्चिमोत्तरयोः।
शान्तेः सन्देशहरं भारतमेतर्ह्यशान्ततरम्।।

## (65) विनयः

यत्र चलन्ति कतिपये स्वमुन्नमय्य स्मयेन मूर्धानम्।
तत्र जगन्नाथ! त्वं नतेन मूर्ध्ना कथं चलसि।।

## (66) कवियशःप्रार्थी

कश्चन महाकविरिति प्रथयन् विश्राम्यति क्षणं न यतः।
हन्त जगन्नाथ! त्वं कविरित्युक्तस्ततस्त्रपसे।।

## (67) प्रतीक्षा

तिष्ठति कश्चिद् द्वारि प्रतीक्षमाणः प्रदीपमादाय।
जानन्नपि त्वमधुना रथ्यां परिवर्त्य निर्यासि॥

## (68) गृध्रः

कालवशादुच्छिन्ना ये गृध्राः पूर्वमम्बरादभवन्।
केचन मनुष्ययोनौ त एव मन्ये समुत्पन्नाः॥

## (69) उद्यानम्

यत् स्निग्धच्छायातरु सुन्दरमुद्यानमेकमस्माकम्।
अस्मासु हन्त केचित् तस्य विनाशार्थमुद्युक्ताः॥

## (70) गर्तनिपातः

नक्तन्दिवमाभाति प्रत्येकं साम्प्रतं जनो धावन्।
न स्याद् गर्तनिपातोऽस्य धावनस्येह परिणामः॥

## (71) द्रष्टा

क्रान्तद्रष्टार इतः पूर्वं कवयो बभूवुरुत्पन्नाः।
वयमाधुनिकान् न कवीन् द्रष्टार इति क्षमा वक्तुम्॥

## (72) आशा

अर्केण साकमुदयं यात्याशाऽस्तञ्च साकमर्केण।
उदयास्तयोः कथामहमिमां किमतिरिच्य कथयेयम्॥

**(73) अपराजितः**

असकृत् पराजयेन श्रान्तोऽहं तावदस्मि कायेन।
हृदयेन प्रभुकृपया तिष्ठाम्यपराजितः किन्तु।।

**(74) अन्धतमसम्**

जगदेव रक्षसेव स्वेन समाक्रान्तमन्धतमसेन।
भाव्यं रामेणेव व्योम्नि समुदितेन सूर्येण।।

**(75) गृध्रः**

उपसेवितमिदमासीत् पिकैर्मरालैश्च पूर्वमुद्यानम्।
गृध्राः प्रायो वृक्षान् साम्प्रतमधिकृत्य तिष्ठन्ति।।

**(76) अहमहमिका**

अहमहमिकया ग्रस्तं धर्मस्यापीह लक्ष्यते क्षेत्रम्।
सर्वत्रैवेदानीं प्रवर्तमानं कुरुक्षेत्रम्।।

**(77) मूकाः**

कोऽपि न वाचालानां प्रपीडितानां शृणोति चीत्कारम्।
कः शृणुयान्मूकानामशब्दमस्मादृशां रुदितम्।।

**(78) हृदयम्**

मधुरं कण्ठं मन्वत इह केचिच्चेह सुन्दरं रूपम्।
संवेदनशीलं यद् हृदयं तत् सर्वतोमान्यम्।।

## (79) गङ्गायाः क्रोडगतः

नाहमिलाहाबादी नाहं कश्चित्प्रयागवास्तव्यः।
श्रीगङ्गाया मातुः क्रोडमधिश्रित्य तिष्ठामि।।

## (80) आशा मौनञ्च

जागर्ति प्रत्याशा प्रत्याकृति शान्तभस्मराशिरिव।
बलिपशुरिवोपनद्धं प्रतिमुखमुपलक्ष्यते मौनम्।।

## (81) श्रोतुमिच्छा

श्रोतव्यं यत्किञ्चिन्नय सुकवे श्रोत्रमार्गमेतर्हि।
त्वद्वदनादमृतझरीं प्रतीक्षमाणे मम श्रोत्रे।।

## (82) संस्कारः

निर्माय मानवं स्यात् कामं मन्ये पितामहस्तृप्तः।
नाद्याप्यनुभवति स्वं संस्कुर्वन् मानवस्तृप्तिम्।।

## (83) युगधर्मः

समजनि किं युगधर्मो हिंसैषा सम्प्रतीह दग्धमुखी।
भ्रमति स्वकरे प्रायो भुशुण्डिमादाय सर्वोऽपि।।

## (84) लक्ष्मीः

स गतः कालो यस्मिन् फलमासीदानुषङ्गिकं लक्ष्मीः।
साम्प्रतमुलूकवाह्या देव्यैकैवास्ति सर्वस्वम्।।

## (85) कालभुजङ्गी

मुञ्चत्यन्तः काचित् कालभुजङ्गी कदुष्ण–फूत्कारान्।
स्मितमाभात्यधरोष्ठं मधुरमुपर्युपरि कस्यापि।।

## (86) परिवर्तनम्

जातान्युद्यानानानि स्थाण्ववशेषाणि केवलं नेह।
सम्प्राप्ता नद्योऽपि प्रत्युत भुवि काकपेयात्वम्।।

## (87) वागर्थौ

वागर्थाभ्यां यद्यपि सम्बन्धः स्थापितस्त्वया मन्ये।
न तथापि प्रतिपत्तिर्घटिता वागर्थयोरिह ते।।

## (88) भारतम्

गङ्गा गौरिव वाणी गीर्वाणानामुपेक्षिता चेयम्।
वस्तुत आभिस्तिसृभिर्भारतमिति भारतं भाति।।

## (89) भारतीयत्वम्

कामं कियदप्यास्तां सुरक्षितं भारतं दिनेष्वेषु।
असुरक्षितमस्माकं प्रतीयते भारतीयत्वम्।।

## (90) भ्रान्तः

त्वामेकं केन पथा चलितं शरणं व्रजेयमाख्याहि।
मां नेष्यति कः पन्थास्त्वदन्तिकं नावगच्छामि।।

**(91) आर्या:**

जाने नेमा: क्वचिदपि भविता कश्चित् समुत्सुक: श्रोतुम्।
'आर्या:' किमहं कुर्यां लेखन्यास्तदपि निर्यान्ति।।

**(92) गृध्र:**

गृध्राणामधिजग्धि प्राय: सर्वैरतृप्तिरनुभूता।
गृध्रत्वमेव तेषां कश्चिदतृप्तेर्हि पर्याय:।।

**(93) प्रतिदानम्**

तन्मन्ये बहु मह्यं यद् दत्तं मामकेन राष्ट्रेण।
खिन्नोऽस्मि चिन्तयित्वा किमपि न तस्मै मया दत्तम्।।

**(94) अलाभकरम्**

नाद्यावधि कस्मैचित् सिद्‌धा तव वाग्मितेह लाभाय।
मौनेनापि न सेत्स्यति किमपि जगन्नाथ! तव मन्ये।।

**(95) विडम्बना**

हंसा: पूर्वमतिष्ठन् विगतभया येषु तुङ्‌गतुङ्‌गेषु।
देवालयस्य शृङ्‌गेष्वधुना तेष्वासते काका:।।

**(96) विक्षोभ:**

अनुभूयत इव कोऽयं विक्षोभश्चित्तसागरे प्राय:।
क इहावलम्बनीयो मया निरोधाय योगोऽस्य।।

## (97) अस्तित्वम्

साफल्यानि कदाचिद् वैफल्यानीह नः कदाचिच्च।
द्वन्द्वघटितमिव किञ्चित् प्रतिभात्यस्माकमस्तित्वम्।।

## (98) आतिथ्यम्

सौस्नातिका मिलेयुः क्वचन मिलेयुश्च सौखशायनिकाः।
भूयस्तादृशमेव प्रवर्ततां किञ्चिदातिथ्यम्।।

## (99) औदार्यम्

भारतवास्तव्यानामितिहासो यत् प्रसिद्धमौदार्यम्।
परिलक्ष्यते कुतश्चित् प्रवर्तमाने न तत् काले।।

## (100) विद्यावन्तः

आसीदेकं मुक्तिर्विद्यायाः किमपि चरममुद्देश्यम्।
सम्प्रति विद्यावन्तो भुक्तिमपेक्ष्य प्रवर्तन्ते।।

## (101) राजनीतेः क्षेत्रम्

नहि धर्मस्य क्षेत्रं क्षेत्रमिदं किमपि नैव नीतेश्च।
क्षेत्रे तु राजनीतेर्न धर्मनीत्योः कृतेऽवसरः।।100।।

## (102) पुष्पोद्यान-विहारः

आजन्मनो द्रुमान् स्वं समपश्यं परित एव कण्टकिनः।
विहृतं तथापि सुरभिषु पुष्पोद्यानेषु चित्तेन।।

**(103) विनीतः**

इह तादृशेन भाव्यं न जगन्नाथ! त्वया विनीतेन।
अवताडयेत् स्वपद्भ्यां त्वामिह यः कश्चिदागत्य।।

**(104) कोलाहलः**

बीजान्युप्तानि पुरा सङ्गीतस्येह यानि कण्ठेषु।
निर्यान्ति तानि मन्ये सम्प्रति कोलाहलीभूय।।

**(105) दीपाः**

स्नेहो येषामस्ति स्पृहणीयो जगति जीवनाधारः।
दीपास्तेऽद्य वराका हन्त निमीलन्त इव भान्ति।।

**(106) सुखदुःखे**

छायासुखमनुभवितुं दुःखं केनापि मह्यमातपजम्।
सुखदुःखे वस्तुत इह दुःखसुखाभ्यामनुस्यूते।।

**(107) बकाः**

मध्येसभं बकानां हंसः कुत आगतोऽयमस्माकम्।
अपि केनचिदामन्त्रित एष बकेनाविनीतेन।।

**(108) दोला**

स्थातुं जगति क्षणमपि न कदाचिच्चित्तमीहतेऽस्माकम्।
किञ्च कदाचित् स्थातुं शरदांशतमुत्सुकं भवति।।

## (109) मानवता

मानवतया विरहितः स्पृहणीयो भवति मानवो नेह।
रूपवदपि कोमलमपि गन्धविरहितं प्रसूनमिव।।

## (110) सहिष्णुता

सोढास्त्वया कियत्यो न दुर्जनानामरुन्तुदा वाचः।
रुदताऽप्यन्तः सततं त्वया जगन्नाथ! मृदु हसितम्।।

## (111) परिवर्तनम्

क्व गतास्ता गजशालाः क्व गतास्ता मन्दुराश्च नगरस्य।
दृश्यन्ते धावन्तः क्वचिद् वराहाः क्वचिच्च खराः।।

## (112) अन्धतमसम्

अन्धतमसमिह लोके संवर्धितमात्मनाऽतिमात्रं यैः।
हा हन्त! याचमानस्तान् खलु लोकोऽयमालोकम्।।

## (113) करुणार्द्राः

कस्मै निवेदयेयं कथामिमामात्मनोऽद्य करुणार्द्राम्।
न मिलन्त्येषु दिनेषु श्रोतारो हन्त करुणार्द्राः।।

## (114) गङ्गा

शक्ता नेतुं न त्वां स्वर्गमहं तद्गृहं निवर्तस्व।
गङ्गा सम्प्रति वक्ति प्रत्येकं स्नातुमायातम्।।

## (115) स्वादः

स्वादोऽद्यावधि नहि मे स्मृतेः पथः सर्वथा बहिर्भवति।
दध्ना नवौदनेन च सर्षपशाकस्य भुक्तस्य।।

## (116) अनुग्रहः

लक्ष्मी–सरस्वतीभ्यामनुग्रहो वर्षितस्त्वयि स्वेन।
हस्तौ न जगन्नाथ! प्रसारणीयौ निजौ तावत्।।

## (117) तौर्यत्रिकम्

यद्यपि न कोऽपि गायति नृत्यत्यथ मत्पुरश्च वादयति।
मामभितः सङ्गीतं तथापि मन्ये प्रवृत्तमिव।।

## (118) जीर्णारण्यम्

अपहृतमिव लुण्ठितमिव कुतो मया हन्त तदनुसन्धेयम्।
जीर्णारण्यीभूतं यदभावादेतदस्तित्वम्।।

## (119) प्रेम

आजन्मनो मया श्रुत एष प्रेमेति शब्द उच्चरितः।
शब्दस्यास्य न परमहमज्ञासिषमर्थमद्यापि।।

## (120) छाया

न तव च्छायाऽपि त्वामनुगन्तुं किञ्चिदीहमानेव।
कथय जगन्नाथ! सह त्वयेह चेष्टेत को गन्तुम्।।

## (121) औदासीन्यम्

औदासीन्यस्य मम च्छायोद्यानं कृते न किञ्चिदिति।
उद्यानात् सुविलसिताद्बहिरेव स्थातुमिच्छामि।।

## (122) जीवन-कला

हसितमिति व्याचष्टे कोऽपि सुधीर्जगति जीवनस्य कलाम्।
अपि परिगणयति कश्चिद् रुदितं सुजनः कलामध्ये।।

## (123) खेदानुभवः

गीतासूपनिशत्सु च पुरो जगन्नाथ! विद्यमानासु।
कथमनुभवसि न खेदं रचनास्वन्यासु रममाणः।।

## (124) आकृतयः

नैसर्गिक्यो द्वित्रा आकृतयो गोचरीकृता दृग्भ्याम्।
षोडश शृङ्गारा अपि नासन् यासूपयोगार्हाः।।

## (125) हिंसा

हिंसाया जिह्वायां न पिपासा शाम्यतीयमद्यापि।
प्रवहन्त्यधिपृथवीमा ह्रादिन्यो मर्त्यरुधिरस्य।।

## (126) राजनीतिः

पूर्वमवर्तत बहुजन-हिताय या राजनीति-विष्णुपदी।
सम्प्रति सा सञ्जाता प्रदूषिता काकपेया च।।

**(127) हृद्देशः**

उपदेशकाः सहस्तंः वर्षन्त्युपदेशवारि नित्यमितः।
श्रोतृणां हृद्देशः किङ्कुर्युस्ते मरूभूतः।।

**(128) सार्थक्यम्**

आजन्मनो मयेदं चिन्तितमेकान्ततः स्थितेनेह।
सिध्येद् विधिना केन स्वस्यास्तित्वस्य सार्थक्यम्।।

**(129) सहचरः**

वर्त्मनि बहवो मिलिताः क्षणं मिलित्वा स्ववर्त्मना याताः।
एकोऽपि न मिलितो यः पदानि सह कानिचिद् गच्छेत्।।

**(130) आशाभङ्गः**

आश्वस्तोऽस्मि स्वजनैर्वसन्त आयास्यति स्वमुद्यानम्।
इह वात्यैव समुदिता सन्ति धराशायिनस्तरवः।।

**(131) परिवर्तनम्**

आयातः स नु कालः प्रगाढमनुभूयते यतो वैरम्।
यातः कालो यस्मिन् मैत्री लोके प्रगाढाऽभूत्।।

**(132) अश्रुभेदः**

दुःखेष्वेव न केवलमश्रूण्यक्ष्णोः सुखेऽपि निर्यान्ति।
अनुभवगम्यः कश्चित् परमुभयोर्मन्यते भेदः।।

## (133) लोकदृष्टिः

त्वमसि जगन्नाथ! यथा कुरु प्रकटमात्मनस्तथा रूपम्।
अन्त:प्रविश्य पश्यति निपुणा दृष्टिर्हि लोकस्य।।

## (134) मालिन्यम्

सरितामेव न केवलमिह प्रवाहा: प्रदूषिता: सन्ति।
सद्भावा अपि मन्ये मनुष्यमनसोऽभवन्मलिना:।।

## (135) शिरीषमृद्वी

कुशकण्टकान् जनकजे! पुरो गमिष्यामि मृद्नतीत्यवद:।
परिसर एव पुरस्त्वं पृच्छसि कियदस्ति गन्तव्यम्।।

## (136) स्वार्थलिप्तः

कथय जगन्नाथ! जन: स्मरिष्यति प्रस्थितस्य क इतस्ते।
स्वस्योदरस्य पूर्तिं कृतवानतिरिच्य किं त्वमिह।।

## (137) लोकदृष्टिः

महदिति सामान्यमपि प्रसिद्धिमेतीह येन वैदुष्यम्।
तस्य गुणस्य जना इह वदन्ति मूर्खत्वमिति नाम।।

## (138) पण्डितम्मन्यः

बद्धोष्णीषाणामिह मध्यगतो हन्त पण्डितानां य:।
पण्डित इत्यात्मानं स जगन्नाथोऽपि मन्वान:।।

### (139) हृदयेनापराजितः

कामं मन्यन्तामिह पराजितं कतिपये जगन्नाथम्।
अपराजित इति मन्ये स वर्तते स्वेन हृदयेन॥

### (140) विडम्बना

प्रेम्णः सौन्दर्यस्य च गीयन्ते तैर्जनैः सुगीतानि।
सौन्दर्यदृष्टिरहिता ये प्रेम्णोऽर्थं न जानन्ति॥

### (141) पुष्पाकाङ्क्षी

अवचेतुमद्य गतवान् पुष्पाण्युद्यानमद्य सुरभीणि।
विनिवृत्तोऽहमिदानीं व्यथितोऽङ्गुलिभिः क्षताभिरिह॥

### (142) पटाक्षेपः

कमपि क्षणमाधाय स्वात्मनि धैर्यं प्रतीक्षितव्यमिह।
अन्त्यो मन्ये भविताऽस्य पटाक्षेपः प्रयोगस्य॥

### (143) समयभेदः

एकस्मिन् दिवसे त्वं शिबिकामारुह्य मद्गृहं प्राप्ता।
एकस्यां निशि शिबिकामारुह्य च मद्गृहाद् याता॥

### (144) ग्रीष्मः

ग्रीष्मेण पूर्वमासीदतिमात्रं हन्त मामकं वैरम्।
अधुनाऽजायत मैत्री परं प्रगाढाऽऽवयोर्मध्ये॥

## (145) सामर्थ्याभावः

उड्डयितुं मन एतत् त्वयाऽर्पितं हन्त तावदिह मह्यम्।
किन्तु तथा सामर्थ्यं न परं मत्पक्षयोर्दत्तम्।।

## (146) अनुग्रहः

नैराश्यमन्धतमसं चेतः परितोऽस्ति नः परिव्याप्तम्।
पश्यामस्त्वदनुग्रहमाशाकिरणं तथाप्येकम्।।

## (147) यथार्थस्य जिज्ञासा

आख्यानानि त्वत्तः श्रावं श्रावं स्थितोऽहमुद्विग्नः।
यत्किञ्चिदिह यथार्थं संक्षेपेण त्वमभिधेहि।।

## (148) व्रणः

कामं वपुषि क्वचन व्रणस्य कस्यापि शक्य उपचारः।
कथमुपचारः शक्यो यदि व्रणोऽस्तित्वमेव स्यात्।।

## (149) अभयदानम्

मा भैषीर्मा भैषीश्छायेव त्वामिहानुगच्छामि।
निशि कश्चिदेत्य कर्णे प्रतीयते व्याहरन्निति माम्।।

## (150) मर्त्यधर्मा

एतन्मृद उद्भूतं मृदि भवितैतत् सखे विलीनमपि।
अस्यास्तित्वस्य कृते कियन्तमिह गर्वमुद्वहसि।।

## (151) वैकल्यम्

नाकस्मादुद्भूतं मन्ये वैकल्यमेतदतिमात्रम्।
अनुभूयतेऽन्तरन्तर्यत् किञ्चिद् दह्यमानमिव।।

## (152) उच्छेदः

नीडस्यैकस्य कृते कियत्प्रयतितं दिनानि सुबहूनि।
आकस्मिकेन झञ्झावातेन तु सर्वमुच्छिन्नम्।।

## (153) अनभित्यक्तं बलम्

पादाहतं न कुर्युर्बलहीनं कमपि केचिदिह सबलाः।
बलहीनेष्वपि सुमहद् बलमनभिव्यक्तमुल्लसति।।

## (154) पश्यतोहराः

इह पश्यतोहरैस्त्वं मुषितो भवितासि रे जगन्नाथ!
पित्तल–हेम्नोर्भेदो ज्ञातुमशक्यो हि मन्देन।।

## (155) अप्रतीकारः

त्वयि समुपेत्य समक्षं दुर्वाद–प्रस्तरान् क्षिपन्त्येते।
नैष जगन्नाथ! तव प्रशंसनीयोऽप्रतीकारः।।

## (156) प्रतीक्षा

प्राङ्गणतुलसी शुष्यति न पञ्जरस्थः शुकः समालपति।
प्रत्येकं गृहवस्तु प्रतीक्षमाणं त्वमायाहि।।

## (157) महान् इत्वरः

मनसि प्रतिष्ठितो मे न केवलं गद्यकाररूपेण।
प्रत्युत मामाकर्शति बाणः सन्नित्वरोऽपि महान्।।

## (158) पृथिवी-धेनुः

शुष्यति पृथिवीधेनुः क्षीणक्षीणेव दुग्धदोहेव।
वत्सा अपि शुष्यन्ति स्तन्यमनधिगम्य चातृप्तेः।।

## (159) कृपा-कटाक्षः

कालं कियन्तमेष प्रतीक्षतां पामरो जगन्नाथः।
मातर्वीणावादिनि कृते तवास्याक्षिकोणस्य।।

## (160) द्विधा स्थितिः

स्वार्थान्धेन क्रौर्यं कृतं मनुष्ये सदा मनुष्येण।
करुणार्द्रेण च तस्य व्रणेषु कारुण्य-लेपोऽपि।।

## (161) दृष्टि-सङ्कीर्णता

अवगतमिह स्वमूल्यं प्रवर्तमाने युगे मनुष्येण।
कथमपि मान्या न जगत्यस्पृश्यः शूद्र इति दृष्टिः।।

## (162) महाजनः

मतिभेदेन ग्रस्ते धर्माचारे यमीक्षते लोकः।
स महाजनः कदाचित् क्वचिदिह दृग्गोचरीभवति।।

## (163) धूर्ताः

काषायवसनधारिणि साधुरिति व्याहरन्ति लोकेऽस्मिन्।
नैकेऽत एव धूर्ता धृतकाषायाः प्रविचरन्ति।।

## (164) निर्गन्धता

श्लाघ्यत्वं न सुमनसां वर्णस्याधिष्ठितं प्रकर्षमिह।
निर्गन्धता तु तासां दुनोति हृदयं सहृदयानाम्।।

## (165) प्रणयः

श्रीराधा–माधवयोः श्रीसीता–रामयोर्यथा प्रणयः।
मन्ये तस्य न जगति क्वचिदपि लभ्येत सादृश्यम्।।

## (166) गृध्राः

गृध्राणामेकस्मिन् निपतति लक्ष्ये क्षुधाकुला दृष्टिः।
विद्धि नखानखि तेषां मध्ये यत्किञ्चिदनिवार्यम्।।

## (167) अनुग्रहः

मधुरं न सर्वथेदं न सर्वथेदं कटु स्वमस्तित्वम्।
एतद् यथा तथाऽस्तु त्वदनुग्रह इत्यहं मन्ये।।

## (168) मूकानां वाणी

न मनोरञ्जनमात्रं द्वित्राणामत्र तेऽस्ति कर्तव्यम्।
मत्कविते! वाणी स्यात् मूकजनानां विपन्नानाम्।।

### (169) सहृदयाः प्रमाणम्

इह विन्यासविशेषं वाच्येऽर्थस्य प्रचक्षते काव्यम्।
वस्तुत इतः प्रमाणं सचेतसामेव चेतांसि।।

### (170) सौभाग्यम्

स्निग्धं तवैतदाननमीषद्धसितञ्च तावकीनमिदम्।
उभयमपि स्याल्लिखितं भाग्यवतः कस्यचिद् भाग्ये।।

### (171) विडम्बना

अभिनेतृभिरेतर्हि प्रणयक्षेत्रे कृतोऽधिकार इह।
शुष्यन्ति निर्जनेषु प्रायः प्रणयस्य तत्त्वज्ञाः।।

### (172) स्थितेर्वैपरीत्यम्

धृतराष्ट्रेष्वन्धेषु द्रोणादिष्वागृहीतमौनेषु।
दुःशासनस्य यच्चेत् प्राबल्यं तत्तु नाश्चर्यम्।।

### (173) भाषा-सरसी

प्रत्येकमेव शब्दैः स्वस्वोऽर्थः साम्प्रतं परित्यक्तः।
मलिनेव प्रतिभाति च भाषा-सरसी दिनेष्वेषु।।

### (174) निर्गन्धत्वम्

कामं मधौ सुमनसामुल्लासो दर्शनीय उद्याने।
निर्गन्धत्वं तासां जनयति नः खेदमतिमात्रम्।।

**(175) शस्त्र-भेदः**

स्वमिह स्वीकारयितुं बिभर्ति हस्ते भुशुण्डिकां कश्चित्।
मादृग्जनस्तु विकलो बिभर्ति कठिनीं निजे हस्ते।।

**(176) अवसादः**

उदयन्तमेव सूर्यं पूर्वमतिष्ठं निरीक्षमाणोऽहम्।
दिवसेष्वेषु प्रेक्षेऽस्तं यान्तं सूर्यमवसन्नः।।

**(177) धैर्यम्**

कर्णौ पिधाय नयने निमील्य मौनञ्च तिष्ठ सन्धार्य।
सेत्स्यति न जगन्नाथ! त्यागो धैर्यस्य कुशलाय।।

**(178) नटाः**

यापितवन्तो जीवनमभिनयमेवेह ये प्रकुर्वाणाः।
ते नास्तित्वस्य नटा याथार्थ्यं ज्ञातुमर्हन्ति।।

**(179) प्रकृतेर्दोहनम्**

प्रकृतेर्विराममेति प्रवृत्तिरेषा न दोहनस्येह।
वस्तुत एष मनुष्यो यतमानः स्वस्य नाशाय।।

**(180) घुणकीटः**

साहित्ये सङ्गीते कलासु चान्यासु सम्प्रविष्टेन।
वाणिज्येनोच्छेदो घुणकीटेनेव संरब्धः।।

## (181) नियति–नटी

हिंसोपद्रवकलुषाऽऽसीर्लोकस्य स्थितिर्नु पूर्वमपि।
नट्या नियते: कोऽर्हो लीलायितमित्यभिज्ञातुम्।।

## (182) स्वत्वम्

न स्वोऽनुभव: कश्चिन्नापि स्वं किमपि हन्त वैदुष्यम्।
अर्पितमिह स्वगुरुभिर्यन्मह्यं तन्मम स्वत्वम्।।

## (183) स्व:पदास्पदम्

यदकृतकलहैरकृतद्रोहैरकृताग्रहै: स्थितं स्वजनै:।
तदिह स्व:पदवाच्यं स्थानं नहि किञ्चिदप्यन्यत्।।

## (184) सामञ्जस्यम्

शिक्षितमद्यावधि यै: सामञ्जस्यं परै: समं नेह।
न समं समन्वयस्तैस्समभावो जातु वा सिध्येत्।।

## (185) निरपेक्षत्वम्

जगतोऽस्मान्निरपेक्षैस्तत्रभवद्भिर्गतव्यथैर्यातम्।
मत्पूर्वजा: क्षमध्वं क्षमोऽस्मि वो नाहमनुसर्तुम्।।

## (186) संयोगा:

संयोगा नाकारणमिह मन्ये जगति सिद्धिमायान्ति।
आयोज्यन्ते पूर्वं कस्मिंश्चित् स्थान एवैते।।

**(187) स्वेच्छा**

न जगन्नाथ! विचारान् स्वीयानारोपयेह कस्मिंश्चित्।
वर्त्म जनः प्रत्येकं चिनुते स्वेच्छानुसारेण।।

**(188) खड्गविषाणकल्पः**

अनुगन्तुं त्वामिच्छति न कश्चिदिह न त्वया च सह गन्तुम्।
खड्गविषाण इवैकः प्रचल जगन्नाथ! निर्द्वन्द्वः।।

**(189) भाग्यविपर्ययः**

स्प्रष्टुं मया प्रयतितं प्रसूनमिति यदिह मन्यमानेन।
भाग्यविपर्ययतो मे तदग्निकणतां गतं सद्यः।।

**(190) अस्थिरा दृष्टिः**

विषये धर्मस्य तव क्वापि जगन्नाथ! न स्थिरा दृष्टिः।
त्वदभिप्रेतं तावन्नास्माभिः शक्यमनुमातुम्।।

**(191) मानवतायाः स्पर्शः**

वाग्वैदग्ध्यं प्रायो लोके कवितेति मन्वते बहवः।
मानवतायाः स्पर्शात् सुरभि वचो वस्तुतः कविता।।

**(192) लक्ष्मीः**

पूर्वैरिह प्रवृत्तं लक्ष्मीः फलमानुषङ्गिकं मत्वा।
पार्यन्तिकमेव फलं वयन्तु मन्यामहे तदिह।।

**(193) मोहान्धः**

अन्धः केवलमासीन्नेत्राभावान्न हन्त धृतराष्ट्रः।
परमार्थतः सुतानां मोहेनान्धः स कोऽप्यासीत्।।

**(194) नेतारः**

प्राय इतो ये न्याय्यं समतिक्रम्य प्रयान्ति पन्थानम्।
बिभ्रति त एव सम्प्रति जनसामान्यस्य नेतृत्वम्।।

**(195) जातिभेदः**

निर्माणमीश्वरस्य त्वमसि यथा वस्तुतस्तथाऽहमपि।
विप्रस्त्वं शूद्रोऽहं जातः कथमावयोर्भेदः।।

**(196) अतिशयनम्रः**

नम्रेण भाव्यमिह परमतिशयनम्रेण नैव भाव्यमिह।
आस्कन्दन्ति हि पद्भ्यामतिशयनम्रं जना जगति।।

**(197) मनुष्येषु गणना**

हिंसोपद्रव एव व्यापारो यैरितो मतः स्वीयः।
हा हन्त हन्त, सम्प्रति तेऽपि मनुष्येषु गण्यन्ते।।

**(198) बाधा**

उद्घातिनी न केवलमस्माकं वर्त्मनः स्तृता भूमिः।
कण्टकभरिताऽप्येषा पदे पदे दृष्टिपथमेति।।

## (199) सौन्दर्य–दृष्टिः

सुन्दरमिति यद्वस्तु प्रतीतिमायाति यस्य दृष्टिमतः।
सौन्दर्यदृष्टिरन्तस्तत् तस्य स्फूर्तिमायाति।।

## (200) निष्क्रान्ताः सर्वे

प्रस्तूय भूमिकां स्वां विनिर्गता रङ्गतो जनाः सर्वे।
क्वचन शयीथा दीपांस्त्वमपि जगन्नाथ! निर्वाप्य।।

## (201) सान्ध्य–दीपः

इत आयाहि न वात्ये! परिवर्तय दूरतः स्वमध्वानम्।
कस्याश्चिदञ्चलान्तर्जागर्ति हि सान्ध्यदीपशिशुः।।

## (202) मूढतमाः

येषां प्रजागरोऽपि प्रतीयते काचन प्रसुप्तिरिति।
तेषां कीदृग् भविता प्रसुप्तिरिति चिन्त्यतां सुधियः।।

## (203) दुर्गतः

सौख्यं प्रदर्शयत्सु प्रत्येकं वित्तदुर्मदेष्वत्र।
प्रच्छादयेदिदानीमात्मानं दुर्गतः कुत्र।।

## (204) सन्तः

धन्यास्ते सत्पुरुषा यद्वदनेभ्यो विनिर्गता वाचः।
अन्येषां मधुमत्यो हृत्तापं प्रशमयन्ति लघु।।

**(205) उपेक्षा**

घटना सामान्येति त्वया न तावद् विचारितं किमपि।
त्वदुपवनस्य द्वारं प्राप्य निवृत्तो जगन्नाथः।।

**(206) मेघदूतः**

ग्रीष्मस्य कर्णभेदिनि विरते कोलाहले प्रतप्तस्य।
अहमश्रौषमकस्माद् ध्वनितं मृदु मेघदूतस्य।।

**(207) कुशलप्रश्नः**

चलितं येनाश्रान्तं व्याप्ते पथि जन्तुनाऽन्धतमसेन।
तं प्रति कुशलप्रश्नः, स्वयमवगच्छेः, कियानुचितः।।

**(208) मनोरथः**

म्रियसे परिभ्रमंस्त्वं मनोरथं सन्ततं स्वमधिरूढः।
विरमसि यदि नाद्यावधि सखे जगन्नाथ! वच्मि त्वाम्।।

**(209) दृप्तः**

स्वं सुन्दर इति मत्वा विद्वानिति चैव कश्चिदिह दृप्तः।
वद किन्नु मन्यमानः स्वमिह जगन्नाथ! दृप्तस्त्वम्।।

**(210) सुमनसः**

सुमनस एताः सर्वा न सुमनसः सर्वथा भवन्तीह।
एतासु बुद्धिमद्भिर्विमृश्य कार्यो न विश्वासः।।

## (211) शोकः

कवयः सहस्रमस्मिन् दृश्यन्ते जगति शोकसम्पन्नाः।
कस्यचिदेव तु सुकवेः शोकः श्लोकत्वमायाति।।

## (212) सौन्दर्यदृष्टिः

सौन्दर्यशास्त्ररचनां नैके सुधियो विधातुमर्हन्ति।
सौन्दर्यबोधनिपुणा कस्यचिदुपजायते दृष्टिः।।

## (213) पिपासा

पायं पायमतृप्ता जगतोऽस्मात् प्रस्थिता दिवं केचित्।
अधरे निजे पिपासामाधायेतो गता बहवः।।

## (214) विद्याया विक्रयः

स्वां विद्यां विक्रीय क्रीडन्ति नु ये जना विदेशीयाम्।
धेनोः पयसः स्थाने पिबन्ति ते वस्तुतो मदिराम्।।

## (215) सहगमनम्

कुत आयाति सुदूरात् कस्यचिदस्य श्रुतिं समाह्वानम्।
आगच्छाम्यहमपि रे तिष्ठ जगन्नाथ! सह गन्तुम्।।

## (216) परिवर्तनम्

आसीत् कदाचिदस्मिन् क्षेत्रे नगरं किमप्यसामान्यम्।
जनयन्ति तत्प्रतीतिं व्याकीर्णा इष्टकाखण्डाः।।

**(217) पश्चात्तापः**

व्यापारेषु स्वीया व्यर्थेष्वतिवाहिता मया दिवसाः।
किङ्कर्तव्यविमूढं स्वमनुभवन्नेष तिष्ठामि।।

**(218) विडम्बना**

परमं धर्ममहिंसामस्माकं मन्यमान इह देशे।
महती विडम्बना यद् गताऽस्ति हिंसा परां काष्ठाम्।।

**(219) मरुभूमिः**

विस्तारो मरुभूमेः समग्रमस्तित्वमेतदाभाति।
तदयं कश्चिन्नाम स्नेहो मृगतृष्णिकामात्रम्।।

**(220) प्रह्लादः**

कुत एव प्रह्लादस्तिष्ठेदनुभूतिगोचरीभूतः।
व्याप्तावस्मिन् काले हिरण्यकशिपुर्हिरण्याक्षः।।

**(221) प्रवाहपतिताः**

प्रायः प्रवाहपतिताः जगति समधिका जना विलोक्यन्ते।
द्वित्रा एव तरन्ति प्रवाहविपरीतयेह दिशा।।

**(222) कूटस्थाः**

सत्स्वप्यस्मान् परितः कोलाहलसङ्कुलेषु लोकेषु।
कूटस्था वयमास्म प्रतिक्रियायाञ्च निरपेक्षाः।।

**(223) परमान्नम्**

सुस्वादु न परमान्नं यस्मै रोचेत भारतीयाय।
शङ्कास्पदमिति मन्ये तस्याहं भारतीयत्वम्।।

**(224) बलवतामग्रे निर्बलानां स्थितिः**

स्थाप्यत इहाधिपत्यं ग्राहस्य कदाचिदथ च नक्रस्य।
मत्स्यादयो वराकाः सरोवरे ह्यासते कष्टम्।।

**(225) 'जङ्गलराजम्'**

आहु'र्जङ्गलराजं' प्रशासनं जगति नाम केचिदिह।
सत्त्वेष्वधिका ऊनान् यत्र सदैव प्रबाधन्ते।।

**(226) 'क्लिश्यत्यन्तरितो जनः'**

पृच्छ न मूढतमं जनमिह न च बुद्धेः परङ्गतं पृच्छ।
अन्तरितानेव जनान् कुशलक्षेमं परं पृच्छ।।

**(227) अन्तःस्रोतः**

अन्तःस्नेहस्रोतः शनैः शनैर्हन्त शुष्यदाभाति।
बाह्यानि न रमयन्ति क्षणमपि नश्चाकचिक्यानि।।

**(228) बालकृष्णाः**

नन्देनेवानन्दो दर्शं दर्शं मयाऽनुभूत इह।
खेलन्ति बालकृष्णा मम पुरतो धूलिधूसरिताः।।

### (229) गृहीतमौनः

आसीद् यो वाचालो निजवैदग्ध्यप्रकाशने लीनः।
स जगन्नाथः सम्प्रति गृहीतमौनः कथङ्कारम्।।

### (230) निद्राभङ्गः

आषाढस्य प्रथमो दिवसो मेघोऽपि नभसि सन्नद्धः।
सन्देशं प्रहिणोमीति गता निद्रा विचारयतः।।

### (231) सौन्दर्यम्

सौन्दर्यमाहुरेके शरीरगतमित्यदृष्टिसम्पन्नाः।
तत्त्वत एतत् तत्त्वं मन्ये यत्किञ्चिदान्तरिकम्।।

### (232) हृदयम्

क्रेतुमशक्यं बहुभिर्न रूप्यकैर्यदिह हन्त धनवद्भिः।
क्रीणन्ति तदिह हृदयं स्निग्धेनैकेन शब्देन।।

### (233) संसारः

क्रेतुः क्वचन च हानिः क्वचन च लाभो घटेत विक्रेतुः।
क्रयविक्रययोरेष प्रवर्तितो नाम संसारः।

### (234) प्रभावः

एकत उदयादुषसः समजायत झङ्कृतेव हृद्वीणा।
अन्यत उदभूत् काचित् स्वरलयकलितेव रागधुनी।।

## (235) धर्मयुद्धम्

शस्त्रास्त्राभ्यां किमपि प्रवर्तते नैव धर्मयुद्धमिह।
शत्रुभिराभ्यन्तरिकैर्वस्तुत एतत् तु सङ्घर्षः।।

## (236) अर्थ–सङ्ग्रहः

कष्टं कष्टमिदानीं प्रायः सर्वोऽर्थसङ्ग्रहे लीनः।
धर्मोपदेशकेष्वपि लक्ष्यत एवार्थगृध्नुत्वम्।।

## (237) धीमन्तः

लोकः प्रवर्ततेऽयं गतानुगतिकत्वमात्रमाश्रित्य।
केचन धीमन्तः परमिह कर्षन्ति स्वमध्वानम्।।

## (238) निर्वाणः

तमसाऽऽक्रान्ते लोके तथागत! क्वासि दृष्टिपथमेहि।
आलोकमण्डितं तेऽस्तित्वमये तावदुच्छिन्नम्।।
(प्रज्वालितस्त्वया यो दीपः किमु सोऽस्ति निर्वाणः)

## (239) यातयामः

वार्ताया विषय इह प्रवर्त्यतां कोऽपि भिन्न एतर्हि।
तस्य जगन्नाथस्य त्यज चर्चां यातयामस्य।।

## (240) चित्तविस्तारः

ज्ञाने विज्ञाने च प्राप्तः सँल्लक्ष्यते परां काष्ठाम्।
चित्तस्येदानीमपि नाभून्मनुजस्य विस्तारः।।

**(241) सौहार्दसंल्लापाः**

सँल्लापस्य न विषया निशि निःशेषा भवेयुरेकस्याम्।
सुहृदोः प्रवर्तनीयं सङ्गतयोरेभिरामृत्योः।।

**(242) कविखद्योतः**

कविसूर्याणामथवा कविचन्द्राणामितो गतः कालः।
अत्र जगन्नाथसमाः कविखद्योताः प्रकाशन्ते।।

**(243) अप्रत्याशितम्**

सकृदपि मद्गृहपरिसरमपि यः सम्मन्यते नहि स्प्रष्टुम्।
स उपेयान्मद्गृहमिति निवेदनीयं मया किमिव।।

**(244) अभिलषितानन्त्यम्**

सुन्दर इति दृश्येय क्षणमतिसम्पन्न इति च दृश्येय।
अभिलषितस्येदानीं काचिदिति श्रीर्न केषाञ्चित्।।

**(245) स्वमूलत उच्छेदः**

एते पतत्रिणः कुत उड्डीयोद्यानतोऽद्य यातारः।
ब्रुवते न हन्त पृष्टाः कुत एभिर्हन्त गन्तव्यम्।।

**(246) लोकस्यावज्ञा**

पूर्वं नावज्ञातो लोको रामेण राजतन्त्रेऽपि।
लोकोऽद्य लोकतन्त्रेऽवज्ञायत एव नेतृजनैः।।

**(247) तस्य स्त्रीत्वम्**

सर्वमसाविह पश्यति पश्यति तमनावृतञ्च कश्चिदिह।
एतेन कल्पयामो नहि स पुमान् किन्तु स स्त्रीति॥

**(248) नान्यः पन्थाः**

चक्षुष्मानपि पश्येन्मार्गं कस्तमसि सूचिभेद्येऽस्मिन्।
त्वमुपेया यदि नेह प्रदीपमादाय निजहस्ते॥

**(249) द्विधा स्थितिः**

स्वर्गोऽस्ति नास्ति वेति स्वर्गो मिलिताऽथवा न मिलितेति।
नैकेऽत्र यापयन्ति प्रवर्तमानं द्विधा क्रान्ताः॥

**(250) अन्त्या गतिः**

भूपतयो न कियन्तश्चिरनिद्रायां निलीय तिष्ठन्ति।
न च कियतां भस्मानि व्याकीर्णानीह पवनेन॥

**(251) उदारा जनाः**

हिंसोपद्रवनिरतैरनुदारैर्व्याप्त एव लोकेऽस्मिन्।
व्यथिताः केचिदुदारा जयन्ति सन्तश्च कारुणिकाः॥

**(252) कालगतिः**

गोमायव इव सम्प्रति ते गाव इवेह येऽप्यदृश्यन्त।
जनयति महदाश्चर्यं विपरीता हन्त कालगतिः॥

**(253) संयमिनो जागरा**

जागर्ति कश्चिदेको लोके नैकेषु य इह सुप्तेषु।
जडभरत इति कदाचित् कदाचिदुक्त: स बुद्ध इति।।

**(254) वसुधैव कुटुम्बकम्**

सन्तानानि निजानि स्वीया भार्येति यत्कुटुम्बमिति।
अनुदारा दृष्टिरियं कुटुम्बकं वस्तुतो वसुधा।।

**(255) युद्धाभ्यासा:**

युद्धाभ्यासा: सम्प्रति कस्मै लाभाय सम्प्रवर्त्यन्ते।
किन्नु वधाय समन्ताज्जगति मनुष्यैर्मनुष्यस्य।।

**(256)श्रीश्रीरविशङ्कर:**

श्रीरविशङ्करमेक्ष्य प्रवचनपरमेतदेव मन्ये यत्।
कारुणिकस्य भुवि स्यादवतारो बोधिसत्त्वस्य।।

**(257) करुणार्द्रभाव:**

आरार्तिक्यैर्नैव स्तुतिगानैर्नैव किमपि देवानाम्।
सिध्यति किञ्चित् किन्तु प्राणिषु करुणार्द्रभावेन।।

**(258) पाञ्जजन्यध्वनि:**

चक्रधर: सन्नवतर मुरलीं मुरलीधर! त्यजैतर्हि।
श्रुतिपथमानय भूय: प्रभो! ध्वनिं पाञ्चजन्यस्य।।

**(259) विनिपातः शतमुखः**

स्वप्ने तुङ्गहिमाद्रेः शृङ्गाण्यसकृन्मयाऽधिरूढानि।
विनिपात एव शतमुख इति जाग्रत एव मेऽनुभवः।।

**(260) प्रतीकारः**

यस्याभ्युदयाय मया प्रार्थितमाजन्मनः स्वमित्रस्य।
तेन स्वनिर्मितेऽस्मिन् गर्ते विनिपातितोऽद्याहम्।।

**(261) अनवधानता**

चपलामपि निजजिह्वामभिरक्षामोऽतिसावधानतया।
दुष्टैर्दन्तैर्दष्टेत्यनवहितान् धिक्करोत्यस्मान्।।

**(262) सुवर्णम्**

यस्याक्षराणि मन्ये न सुवर्णानीव केवलं भान्ति।
रूपं सुवर्णमिव मे निरीक्षमाणस्य तद् भाति।।

**(263) विपरीतोऽनुभवः**

पुष्पाण्यवचेतुमनाः पुष्पोद्यानं प्रविष्ट एषोऽहम्।
कण्टकविद्धकरो बत निर्गच्छामीत एतर्हि।।

**(264) विजयो न लब्धः**

जीवनयुद्धक्षेत्राद् यद्यपि नाहं पलायितोऽद्यापि।
सकृदपि तथापि विजयो हस्तगतो हन्त मे नाभूत्।।

## (265) आतङ्कः

प्रतिदिनमितस्तमोभिः प्रवर्धितः सर्वतोऽयमातङ्कः।
भगवानपि प्रविशति प्रभाकरो भीतभीत इव।।

## (266) जननी जन्मभूमिश्च

जननी च जन्मभूश्च स्वर्गादपि समधिके स्म कल्प्येते।
भारतदेशे द्वे अपि सम्प्रति समुपेक्षिते स्त इति।।

## (267) पद्मपत्रमिवाम्भसा

संसारे निरपेक्षा य आसते पद्मपत्रमिव शुचयः।
केचन त एव धन्या भस्त्रा इव तु श्वसन्त्यन्ये।।

## (268) दाराशुकोहः

अवरङ्गजीव ! दाराशुकोह एषोऽग्रजस्त्वदीयोऽहम्।
एकस्मिन् गृहकोणे मामप्याज्ञापय स्थातुम्।।

## (269) विचाराः

कस्मिंश्चिदपि विचारानारोपयितुं निजान्न काङ्क्षेऽहम्।
कांश्चन तदपि विचारान् प्रकटीकर्तुं निजांश्चेष्टे।।

## (270) जनानां द्वैविध्यम्

बहवः स्वैरिह कृत्यैस्तमांसि संवर्ध्य सम्प्रतिष्ठन्ते।
प्रज्वाल्य यान्ति दीपान् केचन शुचिभिर्निजाचरितैः।।

**(271) गङ्गायाः प्रसादनम्**

नारार्तिक्यैर्नापि स्तुतिगानैः शक्यते प्रसादयितुम्।
अन्य उपायश्चिन्त्यः प्रसादनायेह गङ्गायाः।।

**(272) भगीरथस्यापेक्षा**

पुनरायाहि भगीरथ! मालिन्येनातिमात्रखिन्नायाः।
आनीतायाः स्वस्या गङ्गाया दुर्दशां पश्य।।

**(273) रुदितं हसितञ्च**

रुदितं श्रीरामेण श्रीकृष्णेनेह सन्ततं हसितम्।
विषयेऽन्यस्य हि जन्तोरतिरिक्तं हन्त किं वाच्यम्।।

**(274) काव्यास्वादः**

अनुशीलयन्ति सुधियो ययेह शास्त्रं सतर्कया बुद्ध्या।
आस्वादयितुं शक्यं न सचेतोभिस्तया काव्यम्।।

**(275) धर्मस्य ह्रासः**

सत्सु मठाधीशेषु ध्वजमुत्तोल्य प्रचारनिरतेषु।
एतर्हि भारतेऽस्मिन् धर्मः प्रक्षीयमाण इव।।

**(276) ग्रन्थकारा**

अस्माभिरेव मन्ये निक्षिप्तो निर्मितासु सुदृढासु।
सीदति सुतरां धर्मो नैकासु ग्रन्थकारासु।।

### (277) द्रष्टा

शतकोटि ब्रह्माण्डं यः समभिव्याप्य तिष्ठति स्वैरम्।
मूर्तिषु च मन्दिरेषु च स नियमितः क्लिश्यति द्रष्टा।।

### (278) दुर्जनानां प्राबल्यम्

इह दशवदनाः कंसा अङ्गुलिमाला इहासते स्वस्थाः।
रामस्य न कृष्णस्य न बुद्धस्य न भारतं देशः।।

### (279) अनपोह्यं तथ्यम्

प्रस्थास्याम्यहमथवा त्वमितः पूर्वं क आवयोर्वेद।
प्रस्थास्यावो जगतोऽस्मादिति यत्तथ्यमनपोह्यम्।।

### (280) इतिहासविदामाचारः

महतामितिहासविदामयमाचारः कियान् समीचीनः।
प्राय उपेक्षाविषयं पराजिता हन्त नीयन्ते।।

### (281) जानकीहरणम्

साम्प्रतमपि दशवदना दधति नृणां हृत्सु सम्यगस्तित्वम्।
नित्यमपह्रियमाणाः श्रुतिपथमायान्ति वैदेह्यः।।

### (282) अन्योन्यस्य पूर्णत्वम्

स्त्रीति पुमानिति भाव्यं कदापि केनापि नेह भेदेन।
मिलितावन्योन्यमुभावन्योन्यं पूर्णतां नयतः।।

**(283) तीर्थध्वाङ्क्षाः**

तीर्थध्वाङ्क्षैः प्रायः सर्वाण्येवेह परिगतानि तीर्थानि।
काकोलूकं प्रायो दृक्पथमायाति सर्वत्र।।

**(284) सहचरः**

एकाकिनः कुतश्चित्पथि मे चलतः श्रुतिं समायाति।
तिष्ठ क्षणमायामि त्वया सुदूरं समं चलितुम्।।

**(285) शब्दखगाः**

नभ उत्पतितुं विकलाः शब्दखगा अवसरं प्रतीक्षन्ते।
उद्घाटय निजकस्य द्वारं हृत्पञ्जरस्य कवे।।

**(286) स्वाभाविको धर्मः**

नानाविधेषु जगतः केषुचिदारोपितेषु धर्मेषु।
एकं मनुष्यधर्मं श्रेष्ठं स्वाभाविकं मन्ये।।

**(287) मठाधिनाथाः**

केचन मठाधिनाथा आरूढा धर्ममेरुशृङ्गमपि।
सञ्चिन्वाना दृष्टाः सुवर्णमुद्राः स्वहस्ताभ्याम्।।

**(288) जनताया महत्त्वम्**

सिंहासनमिह जनता कञ्चित् सत्कारतोऽधिरोपयति।
गलहस्तेन च कञ्चित् सिंहासनतोऽवतारयति।।

**(289) जीवन-ग्रन्थः**

जीवनसंज्ञो ग्रन्थः पदे पदे ग्रन्थिभिः समाकुलितः।
ग्रन्थीः केचन सुजना धिया निपुणयेह निन्दन्ति।।

**(290) असुरक्षितत्वम्**

दुःशासनेषु भूयो गृहीतजन्मस्वितो दशास्येषु।
न सुरक्षिताः कुतश्चिद् द्रौपद्यो नापि वैदेह्यः।।

**(291) सुहृदः**

सानन्दं यैः सार्धं विरसा अपि यापिता मया दिवसाः।
न मिलन्ति हन्त सुहृदः क्व गताः सौहार्दनिधयस्ते।।

**(292) प्रतीक्षा**

इत आम्रपालिषु त्वां द्वारि स्थित्वा प्रतीक्षमाणासु।
उपशाम्यन्ति करस्था दीपाः स्नेहे सति क्षीणे।।

**(293) गृध्रः**

नीडारम्भो गृध्रैरुद्यानस्याङ्घ्रिपेषु समकारि।
स्वकुशलकामैः पतगैरन्यैरन्यत्र गन्तव्यम्।।

**(294) ग्रीष्मस्यानुभवः**

आजन्मनोऽनुभूतो ग्रीष्मो येनातपप्रतप्तेन।
तं प्रति वसन्तविषयः प्रश्नो भवतः कियान् न्याय्यः।।

## (295) विरसा दिवसाः

बृहतीषु न मे रमते चेतो न कथासु हन्त लघ्वीषु।
शृण्वन् नयामि दिवसान् तथापि विरसान् कथञ्चिदिमान्।।

## (296) रामश्च रावणश्च

प्रत्येकमेव जन्तौ वसतो रामश्च रावणश्च सदा।
प्राकट्यमाप्नुतस्तौ यथाक्रमं वा यथावसरम्।।

## (297) एकरात्रिवासः

एकां रात्रिमुषित्वा प्रस्थातव्यं प्रगे त्वया पथिक!
अनुमन्यते न पुर्यां स्थातुं रात्रिद्वयं कश्चित्।।

## (298) लाक्षागृहवासः

लाक्षागृहे निवासः कतिधा तुभ्यं प्रदत्त आत्मीयैः।
श्वसिषि जगन्नाथ! परं महदाश्चर्यं यदद्यापि।।

## (299) कामस्य क्रोधस्य च परवशः

कामेन क्रोधेन च हृदि यस्य स्थापितं स्वसाम्राज्यम्।
तस्य न रागद्वेषौ कदाचिदपि शान्तिमायातौ।।

## (300) मालिन्यम्

मलिना एव विचारा उत्पद्यन्ते सदैव हृदि मलिने।
न परिज्ञातुं सरलो जनोऽत्र शक्नोति मलिनहृदः।।

**(301) वीरः**

शक्नुयुरवरोद्धुमितो न महोदधयो न वा महागिरयः।
गन्तव्यं प्रति चलितौ चरणौ कस्यापि वीरस्य।।

**(302) पश्चात्तापः**

समयोचिता न भवतामुपदेशा यन्मया श्रुतिं गमिताः।
पङ्कनिमग्ना गौरिव तदहं सीदामि गुरवोऽत्र।।

**(303) अहमहमिका**

प्रत्येकमेव हस्तः समुद्गतः प्राप्तयेऽत्र यत्किञ्चित्।
अहमहमिकेव काचिल्लोकेऽस्मिन् दृष्टिपथमेति।।

**(304) तृष्णा**

तृष्णे! निपातयिष्यति पदयोर्मां कस्य कस्य कृपणस्य।
त्यज मां श्रान्त इदानीं क्वचिदेकः शयितुमिच्छामि।।

**(305) स्वधर्मः**

धर्मध्वजमुत्तोल्य प्रचलन्तो बहव एव दृश्यन्ते।
जीवन्ति केचिदेव स्वधर्ममधुनाऽऽत्मसात्कृत्य।।

**(306) कुरुक्षेत्रम्**

साम्प्रतमपि धारयति स्वमिहास्तित्वं महत् कुरुक्षेत्रम्।
धर्मक्षेत्रमिति न तत् कदाचिदपि शक्यमभिधातुम्।।

## (307) नमो मह्यम्

वागर्थप्रतिपत्त्या जगतीतः सर्वथा विरहिताय।
निरपत्रपाय कवये सहस्रकृत्त्वो नमो मह्यम्।।

## (308) मौनम्

शब्दानामेवार्था भवन्ति नैवेह केवलं जगति।
कानिचिदिह मौनान्यपि भवन्ति बह्वर्थवन्तीव।।

## (309) राजनीतिसरः

इह राजनीतिसरसि स्नातुमनेके विशन्ति सोत्साहम्।
स्वार्थपराञ्च प्रायः प्रवृत्तिमाधाय निर्यान्ति।।

## (310) पथिकस्य सौभाग्यम्

स्निग्धच्छायास्तरवो मिलन्ति यदि नाम केचिदुद्देशाः।
तत्सुमहत् सौभाग्यं चलतोऽध्वन्यध्वनीनस्य।।

## (311) वृद्धजनोपेक्षा

जागतिका व्यवहारा विधिना केन प्रवर्तयिष्यन्ते।
प्रतिगृहमेव प्रायो वृद्धेषूपेक्ष्यमाणेषु।।

## (312) विडम्बना

स्वेषामस्वीकृतयोऽसकृदुपलानीव हन्त मय्यपतन्।
स्वीकृतयस्तु परेषां मयि पुष्पाणीव समवर्षन्।।

**(313) पण्डितराजः**

न समर्पिताः सहस्रं कथं त्वयि स्युः स्वतो जगन्नाथाः।
पण्डितराज! कवीनामनितरसाधारणस्त्वमसि।।

**(314) तापमानः**

क्रोधाग्निः प्रत्येकं जन्तोर्हृदये यतः प्रदीप्त इव।
तस्मादेव पृथिव्याः प्रवर्धते तापमानोऽस्याः।।

**(315) आत्मीया स्थितिः**

विकृतं हसामि पश्यन्नादर्शे कालिदासनाम्नि स्वम्।
रोदिम्यहं विकृतमात्मन्यादर्शे हन्त पश्यन् स्वम्।।

**(316) निद्रादरिद्रः**

हासे परिहासे च प्रायो दिवसान् नयामि गोष्ठीषु।
रात्रिष्वेकस्तिष्ठन् रोदिमि निद्रादरिद्र इव।।

**(317) चरणैरवताडना**

कामं लक्षाधीशा वर्धन्तां जगति कोट्यधीशाश्च।
न परं भवन्तु निःस्वाश्चरणैरवताडनापात्रम्।।

**(318) भिक्षापात्रम्**

भिक्षापात्रं स्थास्यति यावद् भुवि हस्तयोर्मनुष्यस्य।
नहि लप्स्यते प्रतिष्ठां स्थापितमिह रामराज्यमपि।।

### (319) विपणौ निःस्वः

वणिजो हसन्ति विपणिषु मूल्यान्युद्घोष्य वस्तुनः स्वस्य।
जीर्णेन वाससाऽयं निःस्वो याति स्वमाच्छाद्य॥

### (320) प्रेम

यत्प्रेम हृदि विधात्रा भावः स्थायीति किमपि विन्यस्तम्।
हन्त नटैरिह तस्मिन् कृतोऽधिकारो दिनेष्वेषु॥

### (321) विश्वासः

विश्वास एव पूर्वं लोकस्यासीद् द्रढीयसी नौका।
हन्त निमज्जति लोकः सम्प्रति विश्वासरहितः सन्॥

### (322) संशयः

नहि केवलं परेषु स्वस्मिन्नपि संशयो मनुष्यस्य।
इह संशयेन सर्वं प्रतिभाति ग्रस्तमस्तित्वम्॥

### (323) ईश्वरः

अस्तित्वमेव साम्प्रतमीशस्यास्तीह संशयापन्नम्।
एकः स द्विर्वेति प्रश्नः कुत एव समुदेति॥

### (324) देशस्य विभाजनम्

देशो द्विधा विभक्तः समक्षमस्मासु हन्त पश्यत्सु।
क्षणमपि नस्तज्जन्यं विस्मृतिमायाति न व्यथितम्॥

## (325) विडम्बना

प्राचीनैरस्माकं प्रोक्तं यत् सत्यमेव जयत इति।
श्रूयत एतर्हि परं विजयः सुतरामसत्यस्य।।

## (326) 'जङ्गलराज्यम्'

सत्त्वेष्वधिका ऊनान् बाधन्ते शासने क्वचिद् यस्मिन्।
आहुर्जङ्गलराज्यं तच्छासनमेव केचिदिह।।

## (327) युद्धानां वैयर्थ्यम्

अद्यावधि साधितमिह मानवमात्रेण किं हितं युद्धैः।
असकृद् विचारणीयं सुधीभिरेतत् क्वचिन्मिलितैः।।

## (328) द्रढीयान्

प्रयतेथा न नमयितुं विनतं स्वयमेव तं जगन्नाथम्।
भज्येत यो द्विधाऽपि तु नमयितुमिह नैव शक्येत।।

## (329) स्वानुभवः

गीतेषु कस्यचिदिह स्वानुभवो लसति गीतकारस्य।
छन्दोव्याकरणादि तु घटते तत्रान्यथासिद्धम्।।

## (330) सहजमाकर्षणम्

नानालङ्कृति-ललिता नैवाकर्षन्ति काश्चिदाकृतयः।
आकर्षन्ति विनैवाभूषणमन्तः परं काश्चित्।।

**(331) छाया**

छायेव त्वामहमनुयास्यामीत्येव हन्त मामवदः।
अपि लक्ष्यत इह सम्प्रति मुञ्चन्ती मां मम च्छाया।।

**(332) गङ्गायाः पिपासा**

प्रशमयितुं स्वपिपासां गङ्गे! समुपागतोऽहमद्य त्वाम्।
पश्यामि हन्त मत्तोऽप्यधिकपिपासाकुलाऽसि त्वम्।।

**(333) कठिनी**

इह काठिन्यं कठिनि! त्यक्ताऽसीति व्रजेर्नमद्विषये।
कथमिव विना त्वयाऽहं संधारयितुं क्षमोऽस्तित्वम्।।

**(334) पराजयः**

त्वद्विजयस्य यदि स्यात् पराजयो नाम कोऽपि पर्यायः।
असकृन्मह्यं दत्त्वा तमनुग्राह्यस्त्वयैष जनः।।

**(335) गतानां दिवसानां स्मृतिः**

स्मृतिमुपगता गतास्ते विकलीकुर्वन्ति हन्त मां दिवसाः।
सममालपता येषु त्वया हसन्त्या मया हसितम्।।

**(336) विदग्धः**

अवलोकयतां नित्यं व्यवहाराननुचितान् स्वचक्षुर्भिः।
हन्त विदग्धानामपि सम्प्रति हृदयानि दग्धानि।।

**(337) मानवः**

नक्षत्राणां मध्ये प्रायः सर्वे पदं समीहन्ते।
तेषामप्युपरि त्वं मानव! निजमर्हसि स्थानम्।।

**(338) उल्लासानामभावः**

उल्लासाः पूर्वमिव त्वयि न जगन्नाथ! वासरेष्वेषु।
अपि हृदयेन पराजित इह त्वमसि वस्तुतो जातः।।

**(339) मौनम्**

आश्रयणीयं मौनं त्वया जगन्नाथ! भाषितं सुबहु।
बहुभाषिणे न लोकः, किमरे जानासि विश्वसिति।।

**(340) धर्मनौः**

धर्मं संसाराब्धेः पारं गन्तुं समाश्रयन्ति विदः।
केचन तमेव शिरसा वहन्ति सर्वत्र भारमिव।।

**(341) मुरारेस्तृतीयः पन्थाः**

प्रस्थानं नहि भिन्नं कदाचिदवलम्बते जगन्नाथः।
न तृतीयोऽस्य मुरारेरिव कश्चिद् विद्यते पन्थाः।।

**(342) सुकवयः**

कवितासु न सुकवीनां वागर्थावेव केवलं भवतः।
हसितानि च रुदितानि च निजानि निभृतं निबध्नन्ति।।

**(343) प्रस्थानम्**

नहि कश्चित् सन्देशः कस्मैचिन्नापि कश्चिदुपदेशः।
प्रस्थानादिह पूर्वं न मया सङ्केतितं किञ्चित्।।

**(344) मठाधीशाः**

तिष्ठन्त्यधिकृत्य मठान् गुरुगम्भीरोदरा मठाधीशाः।
उपभुञ्जते सुरालयनिवास-सौख्यानि लोकेऽस्मिन्।।

**(345) परगुणपरमाणुपर्वतीकरणम्**

नाहं क्षमः कदाचित् परमाणून् परगुणान् गिरीकर्तुम्।
परमाणवः परेषां गुणाः समुल्लासयन्ति नु माम्।।

**(346) शिक्षाविधिः**

शिक्षाया विधिरेष प्रवर्तमानोऽभिधेहि कोऽयमिह।
कक्षाभ्यो निर्गत्य च्छात्रा गायन्ति नृत्यन्ति।।

**(347) सङ्घर्षः**

तमसां प्रतीयमानोऽस्तित्वं बिभ्राण एष सङ्घातः।
योद्धुमुपक्रममाणोऽन्यतो लघीयान् प्रदीपोऽपि।।

**(348) अनुग्रहः**

नैकानि हृदि निरन्तरमनुभूयन्ते मयेह शल्यानि।
तान्युद्धर्तुमुदारस्त्वदनुग्रह एव साधीयान्।।

## (349) स्वार्थातीतः

स्वार्थः सर्वेषामपि सम्बन्धानां प्रसिद्ध आधारः।
सत्यप्येवं कश्चित् स्वार्थातीतोऽपि सम्बन्धः।।

## (350) सङ्गीतं गीतञ्च

अन्तर्यत् सङ्गीतं मधुमद् यद्गीतमन्तराभाति।
किञ्चित् कवेः कवित्वं तद्द्वयमेकीकृतं मन्ये।।

## (351) निक्षेपरक्षा

प्रस्थितवानसि केवलमेकं पुष्पं निधाय मम हस्ते।
रक्षिष्यामि कियन्तं कालमिदं केन विधिनेह।।

## (352) आग्रहः

मम सम्प्रदाय एव श्रेष्ठः समधिष्ठितश्च सत्यमिति।
कलहायन्तेऽन्योन्यं साम्प्रतमपि धार्मिकम्मन्याः।।

## (353) समुल्लेखः

जिज्ञासा हृदि विषये न जगन्नाथस्य काऽपि जागर्ति।
केचन तथापि विदधति तस्य समुल्लेखमधिगोष्ठि।।

## (354) अर्थपरिवर्तनम्

प्रेमस्नेहादीनामर्थः परिवर्तितो दिनेष्वेषु।
स्थानं गृहीतमेषामीर्ष्याद्वेषादिभिर्जगति।।

**(355) मृताः शब्दाः**

मय्याखव इव शब्दा दुर्गन्धय आसते मृता बहवः।
छन्दःपञ्जरमध्ये कस्तैर्वा स्थापितैर्लाभः।।

**(356) प्रश्नवैयर्थ्यम्**

आतप एव समन्ताद् यस्यास्तित्वेन हन्त सम्पृक्तः।
मूढोऽसि पृच्छसि त्वं तं वार्तां चन्द्रिकाविषयाम्।।

**(357) श्रोतुमिच्छा**

रचना सुबहोः कालात् त्वया जगन्नाथ! न श्रुतिंगमिता।
कामप्येकां मधुरां त्वद्वदनाच्छ्रोतुमिच्छामः।।

**(358) सुदुर्लभोऽवसरः**

आलापेषु सुहृद्भिर्मूढ जगन्नाथ! कुरु न सङ्कोचम्।
ये यास्यन्ति पुनस्ते नायास्यन्तीह मिलितुं त्वाम्।।

**(359) असुरक्षा**

प्रत्येकमुपवनानि व्याधैरेतर्हि कृतनिवासानि।
न सुरक्षितमस्माकं क्वचिद् द्विजानामिहास्तित्वम्।।

**(360) आशङ्का**

कृतवानस्मि स्वीयं गङ्गातटवर्तिनि द्रुमे नीडम्।
चिन्ताकुलोऽस्मि निपतेत् प्रावृषि गङ्गाजलौघेन।।

## (361) विद्यावतां दृष्टिः

सद्ग्रन्थेषु न निपतति निपतति पदयोर्न हन्त वाग्देव्याः।
द्रविणेष्वेव तु निपतति सम्प्रति विद्यावतां दृष्टिः।।

## (362) पीडितं हृदयम्

कविताया निर्माणे भवितव्यं पीडितेन हृदयेन।
अयमनुभवो द्रढीयान् कवितानिर्माणनिपुणानाम्।।

## (363) अर्थः

प्रायः सर्वेऽनर्था अर्थमधिश्रित्य सम्प्रवर्तन्ते।
अर्थोपार्जन एव प्रवृत्तमेतज्जगत् तदपि।।

## (364) लोको जगन्नाथश्च

ज्ञातुं शक्तो लोको न जगन्नाथं, न सोऽपि लोकज्ञः।
हन्त दवीयस्त्वमतो लोक-जगन्नाथयोर्मध्ये।।

## (365) द्वन्द्वम्

न ज्ञातमास्तिकैरिह सत्यं न च नास्तिकैरपि ज्ञातम्।
उभयोरपि प्रशान्तं तथापि नाद्यावधि द्वन्द्वम्।।

## (366) भारत-पाकौ

स्वस्वाधिकारविषये जम्मू-कश्मीर-राज्यमधिकृत्य।
भारत-पाकौ सुबहोः कालात् सततं कृतद्वन्द्वौ।।

**(367) विरोधाभासः**

क्वचिदुपशमयन्त्यग्निं क्वचिच्च संवर्धयन्ति विरहाग्निम्।
कोऽपि विरोधाभासः संल्लक्ष्यत एषु जलदेषु।।

**(368) आन्दोलितमस्तित्वम्**

आजन्मन आमृत्योर्जन्तोः प्रत्येकमेतदस्तित्वम्।
संसाराब्धौ नौरिव सन्ततमान्दोलितं भाति।।

**(369) मनुष्यत्वम्**

न स्थास्यति हिन्दुत्वं न मुस्लिमत्वं न चापि बौद्धत्वम्।
स्थास्यति केवलमेकं यत्किञ्चिदिदं मनुष्यत्वम्।।

**(370) हठः**

त्रिस्त्वामाहूयाहं प्रस्थास्ये द्वारतस्तवासिद्धः।
आहूतोऽपि सहस्रं न निवर्तिष्ये न जानीथाः।।

**(371) सुहृदुपदेशः**

बाधानुभवः क्रियते नैकैर्यत्र त्वया प्रयातेन।
न जगन्नाथ! कदाचित् स्थाने तस्मिन् निधेहि पदम्।।

**(372) घनश्यामः**

न घनच्छायो वृक्षो न सरः किमपि स्तृतं प्रसन्नाम्बु।
आतपतप्तेन मयाऽपेक्ष्यत एको घनश्यामः।।

## (373) मितञ्च सारञ्च

नाहं मूकः कश्चिन्न च प्रकृत्याऽस्मि कोऽपि वाचालः।
स्वानुभवांस्तु विवक्षुर्मितेन सारेण वचसाऽहम्।।

## (374) घनश्यामः

स्पर्शः स्वस्मिंस्तस्य प्रवाह इव विद्युतः समनुभूतः।
समुदेति मय्यनन्तरमेष घनश्याम इव कोऽपि।।

## (375) विपणयः

नगरस्य प्रत्येकं गृहा विपणयोऽभवन् दिनेष्वेषु।
वणिजः प्रतीक्षमाणा ग्राहकमध्यासते खिन्नाः।।

## (376) वाग्देव्याः प्रसादः

मन्ये प्रसादकल्पा शब्दाः प्रत्येकमेव वाग्देव्याः।
अन्तर्निहिता अर्थास्तेषां खलु शोभनो गन्धः।।

## (377) स्नानजन्यं नैर्मल्यम्

श्रीमद्भागवताब्धौ सकृदपि सुधिया न येन सुस्नातम्।
तस्य सु-धीरपि सुतरां बिभृयान्मन्ये न नैर्मल्यम्।

## (378) परोपदेशे पाण्डित्यम्

स्वयमात्मसात्कुरु त्वं पूर्वं धियमात्मना स्वधर्ममयीम्।
तदनन्तरमस्मभ्यं कुर्या धर्मोपदेशमिमम्।।

**(379) कविनटाः**

कविषु नटेष्विव बहवो न विश्वसन्तीह सम्प्रति प्रायः।
न वयं नटाः स्म इति ये कवयोऽभाषन्त तेऽद्य कुतः।।

**(380) धन्याः पुत्राः**

त्वत्पुत्रास्ते धन्या सिक्ताऽऽसीयैरिह स्वरुधिरेण।
मातर्धरित्रि! केचिद् वयमिह पुत्रेष्वधन्येषु।।

**(381) अविश्वसनीयः**

प्रत्येष्यति को लोके कवे जगन्नाथ! तावकीं वाचम्।
वाताधिका हि कवयो भाषन्तेऽसत्यमेवेति।।

**(382) सौख्यम्**

कस्य समर्थस्यापि श्रूयत इह जगति सौख्यमामृत्योः।
सुख-दुःख-जय-पराजय-लाभालाभास्तु सर्वस्य।।

**(383) समभावः**

आतप-चन्द्रिकयोरिव कश्चित् सुख-दुःखयोर्मतः स्वादः।
स्वीकुर्वन्ति द्वे अपि समभावेनैव तत्त्वज्ञाः।।

**(384) कालो न यातो वयमेव याताः**

हासे चानन्दे च स्वानि दिनानीह यापितान्यभवन्।
पश्चात्तापं हृदि मे दिनानि यातानि जनयन्ति।।

### (385) प्रणतिपात्राणि

अत्र मठाधीशत्वं येषां सिद्धं सुधर्मधुर्याणाम्।
तेभ्यो नमोऽस्तु तेषां नमोऽस्तु सु-गतानुगतिकेभ्यः।।

### (386) स्वार्थविरहिताः

स्वार्थं विना परेषां सन्ततकल्याणकृत्यलीनानाम्।
सद्गुणवतां जनानामहमध्वन्यध्वनीनोऽस्मि।।

### (387) शाश्वतिको विरोधः

काकोलूकं क्वचन क्वचिदहिनकुलं तथाऽश्वमहिषञ्च।
शाश्वतिकस्योदाहृदि सहस्रमुदितं विरोधस्य।।

### (388) सरितः

शुष्यन्तीनां सरितां श्रुतवानसि कच्चिदार्तचीत्कारम्।
अभ्यस्तोऽसि श्रोतुं प्रवहन्तीनां सुहसितानि।।

### (389) विपरीता मतिः

यदशिष्टत्वममन्यत तद् दिवसेष्वेषु हन्त शिष्टत्वम्।
पूर्वेभ्यो विपरीता मतिर्नवानां हि मे भाति।।

### (390) भामिनीविरहः

विमृशामो वयमासीस्त्वन्निर्माणे कियांच्छ्रमो धातुः।
एकपदे त्वं भामिनि! मत्पुरतो मृत्युना नीता।।

### (391) ग्रन्थाः

ग्रन्था विविधविषयकाः प्रकाशमायान्ति जगति भूयांसः।
ग्रन्थाध्ययनाभिरुचिः प्रतिभाति क्षीयमाणेव।।

### (392) स्वार्थः

सत्यं किं किमसत्यं न राजनीतौ महत्त्वमाधत्ते।
सिध्यति येन स्वार्थः स एव तत्रास्ति सिद्धान्तः।।

### (393) वाचंयमः

वाचंयमः परेषां वचःसु न स्यां कदाचिदिति काङ्क्षे।
काङ्क्षे न मदोन्मत्तो भवितुं कश्चिन्न लक्ष्मीवान्।।

### (394) विद्या

उत्पादयेन्मदं यद् वैदुष्यं तन्नु वस्तुतो भारः।
विद्या सैव हि विद्या दद्याद् या सर्वथा विनयम्।।

### (395) श्रीनिकेतने निर्भरत्वम्

यदि निर्भरत्वमेकं जगतीह श्रीनिकेतने सिध्येत्।
उत्पद्येत स्वर्गापवर्गयोस्तर्हि कथमीहा।।

### (396) अस्तित्वम्

तस्यास्तित्वमधिश्रितमेतन्मे दृश्यमानमस्तित्वम्।
स्वास्तित्वात् स नहि स्यान्मन्ये यत्किञ्चिदपि भिन्नः।।

**(397) नृत्याभ्यासः**

पदयोर्न नूपुराणां पर्याप्तं बन्धनं सुनृत्याय।
अभ्यासेन तु भाव्यं सुचिरं भरतानुसारेण।।

**(398) इत्वराः**

जगतीत्वरेषु पूर्वं सुतरां ख्यातिं गतेषु नैकेषु।
बाणादीनां जाने द्वित्राणामेव नामानि।।

**(399) गोपीनाथः**

कुरु मथुरायां वासं निवसाधिद्वारकं कदाचिद्वा।
गोपीनाथ! न दूरे त्वं गोपीभ्योऽर्हसि स्थातुम्।।

**(400) स्वान्तस्थः**

रात्रिन्दिवं य एको निगडित इव हन्त तिष्ठति स्वान्तः।
नेदीयान् वा स स्यात् स दवीयान् वा न तच्चिन्त्यम्।।

**(401) दस्युकथाः**

प्रणयकथा ग्रामीणैर्येष्वश्रूयन्त ते गता दिवसाः।
दस्यूनामेव कथास्तेभ्यो रोचन्त एतर्हि।।

**(402) जगन्नाथः**

नैकेषामिह सुहृदां श्रुतिमानीतास्त्वया कथावार्ताः।
क्वास्ते वद स वराको यस्य जगन्नाथ इति नाम।।

**(403) द्वन्द्वम्**

संयोगात् सद्घटितं पतत्रिणोर्यद्द्वयोरिह द्वन्द्वम्।
को जानीयादशुभे विघटितमेतन्मुहूर्ते स्यात्।।

**(404) अस्वास्थ्यम्**

प्राय: स्वस्थास्तनुभिर्दृश्यन्ते बहव एषु दिवसेषु।
प्रकटीभवति मनोगतमस्वास्थ्यं प्राय एतेषाम्।।

**(405) स्वस्थो न लङ्केश्वर:**

स्वस्थोऽदृश्यत रामो निवसन्नपि कानने तपस्वी सन्।
न परं वसन् दशास्य: सुवर्णमय्यां स लङ्कायाम्।।

**(406) अनाथ:**

नाथानां गणनायां परिगणिता: स्यु: शतं जगन्नाथा:।
न परं क्वचिदपि गण्य: कश्चिदनाथो जगन्नाथ:।।

**(407) कर्तव्यपरायण:**

विरतव्यापारेण क्वचिदेकान्ते स्थितं न मनुजेन।
प्रासङ्गिका गिरीणां गुहासु न ह्यत्र कृतवासा:।।

**(408) गङ्गा**

यत्र प्रवहति गङ्गा तत्र मतं पावनत्वमनिवार्यम्।
दिवसेष्वेषु गत: खलु शङ्कास्पदतां स सिद्धान्त:।।

## (409) अस्तित्वस्य सार्थक्यम्

प्रत्येकं परमाणुशु तव नाम स्यात् पिनद्धमस्माकम्।
अस्तित्वस्यास्य ततो यत्किञ्चित् स्यान्नु सार्थक्यम्।।

## (410) तपःसिद्धिः

नेह तपस्यपि सिद्धिं यावज्जीवं जनो व्रजेत् कश्चित्।
कश्चिद् विना तपस्यामधिगच्छति सिद्धिमाशु जनः।।

## (411) निराकरणम्

विगतरसा ये चास्मिन् हन्त च ये सन्ति पूतिपर्युषिताः।
ते निःसरन्तु शीघ्रं न यातयामाश्च तिष्ठन्तु।।

## (412) सौजन्यम्

विस्मरणीयस्त्यागो जटायुषो नास्य रामकार्यार्थे।
सौजन्यं सम्पातेरपनेयं स्मृतेर्नापि।।

## (413) राजनीतिक्षेत्रम्

इह राजनीत्यभिख्यं क्षेत्रं प्रविविक्षुभिर्नु तैर्भाव्यम्।
ये नैपुण्यं बिभ्रति शकुनिरिव द्यूतविद्यायाम्।।

## (414) मनस्विनः

प्रायो मनस्विनः स्वं प्रकटीकुर्वन्ति नैव चित्तस्थम्।
तिष्ठत्यनेन तेषां गौरवमव्याहतं जगति।।

### (415) चन्दनभारवाही खरः

कश्चित् खरमिह पृच्छति चन्दनवाहं न चन्दनस्य गुणान्।
आजन्मनो विदितवान् यो न किमपि भारमतिरिच्य।।

### (416) त्वरा

त्वरमाणं त्वां त्राणे द्रौपद्या मोक्षणे गजेन्द्रस्य।
श्रुतवानस्मि परं त्वं विलम्बसे हन्त मद्विषये।।

### (417) जगन्नाथः

न जगन्नाथः कविरिति कश्चिदुपेत्य प्रकाशमभिदध्यात्।
अभिधातव्यं शनकैः कोणे स्थित्वा न कैश्चिदिह।।

### (418) नेतृत्वम्

ज्ञातं येन न भारतमपि न ज्ञाताऽस्य संस्कृतिर्येन।
तेन जनस्य न कार्यं नेतृत्वं भारतीयस्य।।

### (419) पदावली

जयदेवस्येवास्य न कान्ता च सुकोमला च मधुरा च।
तदपि जगन्नाथस्य तु पदावलीं श्रोतुमाकाङ्क्षे।।

### (420) विश्वनाथः

आर्येतरा यदि त्वां द्रष्टुं स्प्रष्टुञ्च हन्त नार्हन्ति।
कथय त्वमेव कस्मै प्रयोजनायासि विश्वेशः।।

**(421) भक्तानां हृदयानि**

प्रज्वालयन्ति दीपान् सहस्रमेते निशि त्वदायतने।
हन्त तमश्छन्नानि त्वद्भक्तानां तु हृदयानि।।

**(422) दीपशिखा**

बालकमिति कवयन्तं कमपि जगन्नाथ! नावमन्यस्व।
तस्मिन् भवेज्ज्वलन्ती लघीयसी काऽपि दीपशिखा।।

**(423) मेघस्य प्रतीक्षा**

रामगिरिस्थः कश्चिद् यक्षः कान्तावियोगसन्तप्तः।
आषाढस्य प्रथमे प्रतीक्षमाणो दिने मेघम्।।

**(424) देवायतनम्**

देवायतनं परितो विपणय आसन्ननेकशः पूर्वम्।
विपणीभूतं प्रायो देवायतनं दिनेष्वेषु।।

**(425) वाणिज्यम्**

प्रवचनमपि समजायत लोके वाणिज्यमेषु दिवसेषु।
स्वमनोरञ्जनमात्रं कीर्तनमित्यध्यवस्यन्ति।।

**(426) कृष्याजीवः**

श्रमजलपृषन्ति देहे कृष्याजीवस्य यानि जायन्ते।
तैर्गङ्गाप्यात्मानं मन्येऽभिलषेत् पवित्रयितुम्।।

### (427) सूत्रधारः

नेपथ्यान्तः स्थित्वा सर्वमिदं यः सदा प्रवर्तयति।
नाट्यप्रयोगकुशलैः स उच्यते सूत्रधार इति।।

### (428) छाया

अस्तित्वं न बिभर्ति च्छाया जगतीह यदपि किञ्चिदपि।
स्वमनुसरन्तीमेकः पथि तां बहु मन्यते तदपि।।

### (429) नीरव एकान्तः

सङ्गीतमपि न मह्यं कथञ्चिदपि रोचते दिनेष्वेषु।
तिष्ठन्नहमेकाकी नीरवमेकान्तमाकाङ्क्षे।।

### (430) लक्ष्यस्य वेधः

शरसन्धानं क्रियते निजे निजे धनुषि सर्वधानुष्कैः।
वेधं लक्ष्यस्य परं कुरुते कस्यापि निपुणस्य।।

### (431) प्रचारः

सिद्धं प्रवर्तमाने युगे प्रचारस्य किमपि माहात्म्यम्।
लोके प्रवर्तमानः प्रचारमाश्रित्य धर्मोऽपि।।

### (432) अर्थकरी विद्या

अर्थकरीषु प्रथमं पुत्रक! विद्यासु सम्प्रवर्तस्व।
तत्पश्चात् कुरु पाठं गीतारामायणादीनाम्।।

## (433) प्रासङ्गिकाः शब्दाः

प्रेम-प्रणय-स्नेहाः शब्दा विगतस्य सन्ति कालस्य।
प्रासङ्गिकास्तु कोप-द्वेषासूयादयः सन्ति।।

## (434) प्रासङ्गिकः कथाप्रसङ्गः

चर्चा शोभां भजते कथाप्रसङ्गेषु रामचन्द्रस्य।
प्रासङ्गिकस्तु लोके रावण एवेह लङ्केशः।।

## (435) शब्दानां नैरर्थक्यम्

सौहार्दं सौभ्रात्रं सौजन्यं त्रय इमे श्रुताः शब्दाः।
रामायणादिषु स्युः क्वचित् प्रयुक्ताः पुराणेषु।।

## (436) परिभाषाबन्धनम्

परिभाषापञ्जरके बधान कवितां न काव्यमर्मज्ञ!
अवसरमस्यै देहि व्योम्न्युन्मुक्ते समुड्डयितुम्।।

## (437) आमन्त्रणम्

आमन्त्रणं पिकेभ्यो दीयत आमन्त्रणञ्च काकेभ्यः।
कालोऽयं सम्प्राप्तः पचेलिमानां रसालानाम्।।

## (438) अनपेक्षितः कथाप्रसङ्गः

पुनरारभेत कश्चित् कथाप्रसङ्गं न तं पुरोऽस्माकम्।
शतधा दलदिव येन श्रुतमात्रेण स्वहृद् भवति।।

### (439) पुनर्न भवेत्

द्रौपद्याः कस्याश्चिन्न चीरहरणं पुनः कुतोऽपि भवेत्।
वैदेह्याः कस्याश्चिन्न पुनर्निर्वासनञ्च भवेत्।।

### (440) पिपासा

जागर्ति दुर्निवारा तथाऽधिहृदयं भृशं पिपासैका।
क्षणमपि निद्राति न या सम्मनुते निद्रितुं न च माम्।।

### (441) पञ्जरकम्

न मया चिन्तितमासीत् पञ्जरके यापितोऽत्रभवितास्मि।
पतगं निर्माय विधे! लिख तद्भाग्ये न पञ्जरकम्।।

### (442) तृष्णा

तृष्णे! खलीकृताऽस्मि त्वया दयस्व त्यजाशु मत्पिण्डम्।
प्रणिपातैर्मम भालो नीचानां पादयोर्घृष्टः।।

### (443) सङ्गीतमर्मज्ञः

यस्य स्वर-लय-तालाः सिद्धिं प्राप्ता न हन्त किञ्चिदपि।
ब्रुवते तदनुगतास्तं केचन सङ्गीतमर्मज्ञम्।।

### (444) चातुर्यस्य लाभः

काका उड्डयमानाः फलानि गृह्णन्ति वृक्षमुपरिष्टात्।
विनिवर्तन्ते च शुका अवसन्नाः किञ्चिदप्राप्य।।

**(445) युगधर्मः**

प्राप्तोऽयं युगधर्मस्तिरस्क्रियन्तेऽधुना सुपात्राणि।
भुक्तोच्छिष्टा जीवा अभिनन्द्यन्ते महास्रग्भिः।।

**(446) अस्माकं भागः**

एतावानस्माकं भाग इति व्याहरन् स्वरेणोच्चैः।
सर्वोऽपीह स्वगृहाद् भुशुण्डिमादाय निर्यातः।।

**(447) महातरुः**

पतनावधि समुपेतान् सन्तर्पितवान् य आत्मनः सुफलैः।
अस्माभिः सोऽदृश्यत महातरुर्भूमिसादद्य।।

**(448) नटाः**

नेपथ्यान्निर्यान्ति स्वं रूपं ये निशासु परिवर्त्य।
न सुधीरपि रङ्गगतान् तानिह शक्तः परिज्ञातुम्।।

**(449) सुधियः**

सम्यगलङ्कृतवन्तो जगदेतद् ये निजैर्गुणैरमलैः।
अनलङ्कृता अतिष्ठन्नामृत्योस्ते स्वयं सुधियः।।

**(450) सेतवः**

कामं निर्मीयन्तां नदीषु विततासु सेतवः सुदृढाः।
दूरगतेषु जनानां हृदयेष्वपि सेतुभिर्भाव्यम्।।

## (451) कालक्षेपः

विक्रीडितमतिमात्रं शार्दूलस्य स्म रोचते मह्यम्।
सम्प्रति गच्छति कालः क्रीडनकैर्मृण्मयैः कैश्चित्।।

## (452) रासभः

यस्मै रोचेत द्वयमिह नहि साहित्यमथ च सङ्गीतम्।
स्यात् पूर्वस्मिन् जन्मनि रासभयोनौ स उत्पन्नः।।

## (453) पथिकृतः

पूर्वैर्नः पथिकृद्भिर्निर्दिष्टा विधय इह निषेधाश्च।
अस्माभिर्ज्ञातव्यः सदसद्व्यवहारयोर्भेदः।।

## (454) अशान्तिः

न पृथिव्यामिह शान्तिर्न च शान्तिर्हन्त काचिदाकाशे।
विद्धि नितान्तमशान्तं समग्रमस्तित्वमेतर्हि।।

## (455) मतिमतां मौनम्

तर्के ये खलु सिद्धाः क्रीता दासीव बुद्धिरिह येषाम्।
मृत्योः पश्चात् किमिति प्रश्ने तेऽप्यासते मूकाः।।

## (456) मूलकोपदंशः

गीतासूपनिषत्सु च मतिर्बिभर्त्यभिनिवेशमस्माकम्।
इह मूलकोपदंशः स्वाध्यायस्त्वेतदतिरिच्य।।

**(457) कुरुक्षेत्रम्**

धर्मक्षेत्रमिदानीं जातं सर्वात्मना कुरुक्षेत्रम्।
दु:शासनं हि यस्मिन् धृतराष्ट्रस्यैव मन्यन्ते।।

**(458) गृध्राः**

गृध्रैः प्रसह्य यदवधि कृतोऽधिकारः समग्र उद्याने।
साचिव्यमतिगरीयस्तदवधि काकेषु सम्प्राप्तम्।।

**(459) पुण्यात्मा**

यस्मिन् सुमहति वृक्षे भूताः प्रेता वसन्ति निर्विघ्नम्।
मूलं तस्य कदाचिन्नाध्यास्ते कोऽपि पुण्यात्मा।।

**(460) असंस्कृता मतिः**

बाल्ये स्थितस्य न मतिः श्रीगुरुचरणेषु संस्कृता यस्य।
तस्मै ददाति विनयं कथञ्चिदाप्ता न विद्याऽपि।।

**(461) गृध्राः**

गृध्राः किमिमे वृद्धाः कलहायन्ते न किञ्चिदन्योन्यम्।
एषु नखानखि मन्ये संस्कारस्यैव परिणामः।।

**(462) सुधियः**

सिद्धान्ते व्यवहारे सुमहद् यस्यान्तरं स्फुटीभवति।
तस्य जनस्य न वचसि प्रामाण्यं मन्वते सुधियः।।

**(463) आस्तिक्यबुद्धिः**

न वयं दार्शनिका इव तर्केषु प्रौढिमाश्रिताः केचित्।
वर्तामहे जगत्यामाश्रित्यास्तिक्यबुद्धिमिमाम्।।

**(464) कालनेमयः**

राष्ट्रद्रोहे लिप्ताः प्रच्छन्नाः कालनेमयो य इह।
सममार्जवं न कुटिलैस्तैर्नीतिर्नाथवौचित्यम्।।

**(465) स्मितम्**

सौहार्दस्य न कश्चित् स्मितमिह सङ्केत इत्यवेहि सखे!
कुटिला अपि दृश्यन्ते स्मयमाना एषु दिवसेषु।।

**(466) चाकचिक्यम्**

अभिभूता ये सद्यो बाह्येनैवेह चाकचिक्येन।
अन्धतमसमाभ्यन्तरमसमर्थास्ते परिज्ञातुम्।।

**(467) दृग्भङ्ग्यः**

भणितीनां भङ्ग्य इव स्फुरन्ति भङ्ग्यो दृशामनेकविधाः।
ता वर्षन्ति शरा इव कुसुमानीव क्वचिच्च जने।।

**(468) सौन्दर्यम्**

सौन्दर्यं नैतावत् प्रच्छाद्यं येन तन्न दृश्येत।
उद्घाट्यं नैतावद् येन तदाकर्षणं नश्येत्।।

**(469) अन्तर्देशः**

आत्मानं परितो मे पुष्पोद्यानं वसन्तसंस्पृष्टम्।
अन्तर्देशस्तु मम ग्रीष्मपिशाचेन सङ्क्रान्तः।।

**(470) गुरूणां निर्देशः**

एकेनास्मद्गुरुणा पिहितौ कर्णौ निशम्य मत्काव्यम्।
अन्येनोक्तं काव्ये न जगन्नाथ! प्रगल्भस्व।।

**(471) आशाबन्धः**

बाह्यादस्माज्जगतो लाभं प्रति सर्वथा निराशोऽहम्।
त्वां प्रत्याशाबन्धः प्रभो! न शिथिलीकृतोऽद्यापि।।

**(472) विवेकभ्रष्टः**

न जगन्नाथो मार्गात् केवलमेष च्युतोऽस्ति जगतीह।
भ्रष्टः स विवेकादपि दृढमित्याभासतेऽस्माकम्।।

**(473) आश्वस्तिः**

कियती तस्य स्वीकृतिरुपलब्धा स्यात् पुरःस्थितेन मया।
नोत्पद्यत ईषदपि स्वे चेतसि काचिदाश्वस्तिः।।

**(474) हसितम्**

शृणु 'मीरये'ह रुदितं रुदितं चेतः कबीरदासेन।
अभिलषसि तमुपलब्धुं मूढ जगन्नाथ! हसितेन।।

## (475) अहमहमिका

अहमहमिकया ग्रस्ते न युगेऽस्मिन् क्वचन सम्भवो न्याय:।
तस्मिन् महिष्यधीना यष्टिर्यस्यास्ति हस्तगता।।

## (476) स्वजनानां स्मरणम्

क इह स्वजनानामपि दिवङ्गतानां सहाश्रुभि: स्मरति।
पार्श्वे कस्य स्वोदरभरणासक्तस्य समय इह।।

## (477) 'एकस्य तिष्ठति कवेर्गृह एव काव्यम्'

आसीदस्ति न भविता त्वत्पद्यानां महत्त्वमेतेषाम्।
विद्धि जगन्नाथ! तव स्थास्यन्तीमानि गृह एव।।

## (478) देवगवी

हठ एव कश्चिदेषां भाषास्वन्यासु विद्यमानासु।
अवलम्बन्ते कवितानिर्माणे यन्नु देवगवीम्।।

## (479) त्वमेव सर्वत्र

यत्र वयं गच्छाम: स्थितस्त्वमुपलभ्यसे नु तत्रैव।
किमपि जगन्नाथ! कृते कुरु रिक्तं स्थानमस्माकम्।।

## (480) गतानुगतिकत्वम्

जनसामान्यस्यास्थां वयमपि मन्यामहे स्वत: सुबहु।
परमन्त: शङ्कत इव गतानुगतिकत्वमाकल्प्य।।

**(481) श्रान्ताः**

धीमानस्येकस्मिन् त्वमिह जगन्नाथ! तिष्ठसि स्थाने।
धावं धावं सततं वयन्तु सुतरां समे श्रान्ताः।।

**(482) प्रायः सम्प्रति कवयो न श्रद्धापात्रम्**

कविरिति परिचाय्य स्वं त्वया जगन्नाथ! साधितं न हितम्।
न कवीनामेतर्हि श्रद्दधते वाचि लोकेऽस्मिन्।।

**(483) चतुराः**

चतुराश्चातुर्येण स्वे कर्मणि सिद्धिमाप्नुवन्तीह।
एतावता न सुधियो विजयमितो मन्वते तेषाम्।।

**(484) मृत्युः**

सम्प्रति विदन्ति कतिचिन्मृत्युं पन्थानमेकमतिसरलम्।
नैकैः खलु काठिन्यैर्जीवितमिह वस्तुतो ग्रस्तम्।।

**(485) आकारयिता**

आकारयति सुदूरात् कश्चित् त्वां हन्त किन्न शृणुषे त्वम्।
आकारयिता कः स्यादिति जिज्ञासुर्जगन्नाथः।।

**(486) सौजन्यादि**

सौजन्यादीनि जनाः सम्प्रति दोषेषु केऽपि गणयन्ति।
येष्वेते लभ्यन्ते प्रायस्तिष्ठन्ति ते निःस्वाः।।

## (487) सार्थक्यम्

सार्थक्याय न चिन्ताऽस्तित्वस्यास्येह कस्यचिज्जगति।
साफल्यमस्य बहवो वित्तायत्तं हि मन्यन्ते।।

## (488) मार्गनिर्देशः

मार्गस्यापठिता इह निर्देशं कुर्वते सुपठितेभ्यः।
गङ्गा प्रवहति साम्प्रतमिहार्णवादुत्तराभिमुखी।।

## (489) मनुष्यत्वम्

कश्चिच्छरीरदृष्ट्या मनुष्य एषोऽस्मि भौतिकः पिण्डः।
यत्किञ्चिदेतदस्मिन् निभालनीयं मनुष्यत्वम्।।

## (490) मोहान्धः

धृतराष्ट्रस्यान्धत्वं नासीत् खेदावहं तथान्येषाम्।
मोहान्धत्वं खेदं यथा जनयति स्म हृद्देशे।।

## (491) अभिनवं कवित्वम्

ध्वन्यालोकादथवा चन्द्रालोकान्न कश्चिदालोकः।
सिध्येत्क्वचिदुपयुक्तोऽभिनवस्य कृते कवित्वस्य।।

## (492) प्रदर्शनरहिताः

केचिद् विचारसिद्धा निवसन्त्यद्यापि पर्णशालासु।
प्रायः प्रचारसिद्धाः प्रासादेषु स्वपन्ति सुखम्।।

## (493) नीरक्षीरविवेकः

मानसवासिषु जगतोऽस्मादुच्छिन्नेषु राजहंसेषु।
नीरक्षीरविवेकः स गुणोऽप्यतिमात्रमुच्छिन्नः।।

## (494) अनुशोकः

न कविषु परिगणनार्हं सचेतसो मन्वते जगन्नाथम्।
गोष्ठीषु परमभावं तस्य प्रायोऽनुशोचन्ति।।

## (495) युगधर्मः

अन्योन्यं विद्वेषः सञ्जातः कोऽपि नाम युगधर्मः।
साधयति राजनीतिः स्वार्थं चतुरा तमुद्दीप्य।।

## (496) तेऽपि कवयः

रसभावालङ्काराः स्पृशन्ति येषां वचांसि नहि किञ्चित्।
तेऽपि कवीनां कोटौ परिगण्यन्ते दिनेष्वेषु।।

## (497) पित्रे मरणम्

अविचार्य पूर्वमेषा पितस्त्वया राक्षसाय दत्ताऽहम्।
इति सकृदपि यदि पुत्री ब्रवीति पित्रे नु तन्मरणम्।।

## (498) अनुग्रहावलम्बः

क्व गभीरोऽयं जलधिः क्वाशक्तत्वञ्च मामकीनमिदम्।
अवलम्बो यदि न स्यादनुग्रहस्ते न तीर्णः स्याम्।।

**(499) सन्तप्तानां शरणम्**

आगन्तास्याकाशे गर्जंस्तर्जन् कदा घनश्याम!
सन्तप्तानां शरणं वस्तुत एकस्त्वमस्माकम्।।

**(500) श्रवणेच्छा**

हृदि यस्य श्रवणेच्छा पौनःपुन्येन यदि न समुदेति।
सङ्कोचं तद् वक्तुं कवित्वमित्यनुभवन्ति बुधाः।।

**(501) मृन्मयी सृष्टिः**

कामं जीवितमास्तां सुकवीनां कल्पनेति मन्येऽहम्।
रमयति चेतस्तेषां सुमृन्मयी सृष्टिरेषाऽपि।।

**(502) मनुष्यत्वम्**

स्वस्यां लघुतायामपि सुमहद् यदिह प्रतीतिपथमेति।
आपत्स्वपि यत्किञ्चित् स्मयमानं तन्मनुष्यत्वम्।।

**(503) नोपलब्धः**

अन्विष्ट उन्मदेषु य इतो जगन्नाथ इत्वरेष्वपि यः।
स परं समानधर्मसु न क्वचिदस्माभिरुपलब्धः।।

**(504) निरपत्रपाः**

यैः शब्दैः श्रुतमात्रैरपत्रपामनुभवन्ति हृदि सन्तः।
निरपत्रपाः प्रशस्तीरवाप्तुमिच्छन्ति तैरेव।।

**(505) प्रावृड्गीतानि**

आयातेयं प्रावृट् न स आयातः प्रियो घनश्यामः।
सखि! नोत्सहेऽद्य गातुं गीतानि प्रावृषेण्यानि।।

**(506) साहित्याकाशाजिरम्**

उच्छिन्नेषु पृथिव्याः कवितामानससरोमरालेषु।
साहित्याकाशाजिरमधुना निःश्रीकतां जातम्।।

**(507) एकः प्रचल**

न त्वां कश्चिच्छृणुयाद् यदि वापेक्षेत यदि न कोऽपि त्वाम्।
निर्गच्छाध्वन्येकः प्रचल जगन्नाथ! निश्चिन्तः।।

**(508) कवित्वम्**

नैकेभ्यो जन्मभ्योऽर्जितस्य पुण्यस्य यत् फलं सुमहत्।
जगतीह वस्तुतस्तत् कस्यचिदुदियात् कवित्वमिति।।

**(509) भक्तः**

यस्मै रामादिपरं कथाप्रवचनादि नाम रोचेत।
मन्य इदम्प्रथमतया भगवद्भक्तेषु मान्यः सः।।

**(510) संवादः**

नहि केनापि विवादः समं विसंवाद इह न केनापि।
संवाद एव सिध्येत् सर्वैः सममित्यभीष्टं नः।।

**(511) मानवतायाः कृते कलङ्कः**

हिंसाप्रवृत्तिरेषा मानवतायाः कृते कलङ्क इति।
कारुणिकत्वं क्व गतं क्व गतं करुणार्द्रचित्तत्वम्।।

**(512) नटाः**

अभिनीयन्ते केवलमितो नटैर्हन्त हसितरुदितानि।
पीडाया नाभिनयो भाव्यं हृदि पीडयाऽवश्यम्।।

**(513) असुरक्षा**

जनमानसं समन्तान्नक्रग्राहादिभिः समाक्रान्तम्।
असुरक्षित एतर्हि प्रायः प्रतिभाति सर्वोऽपि।।

**(514) व्याध–दृष्टिः**

प्रत्येकं नीडेषु व्याधस्यास्तीव दृग् विनिपतन्ती।
हृदयं प्रकम्पमानं प्रत्येकं नीडशयितस्य।।

**(515) मृत्युः**

जीवितमाक्रान्तं स्याद् यद्येवं मृत्युना कठोरेण।
क इह क्षणमपि जन्तुर्जीवितुमिच्छेद् विदग्धोऽपि।।

**(516) तडितः**

सन्दर्शयन्ति तडितः स्निग्धाः कस्मैचिदेत्य पन्थानम्।
विनिपातयन्ति शरणं निपत्य कस्यापि दुर्वृत्ताः।।

**(517) जनसामान्यः**

हासस्यानन्दस्य च सिध्येदौचित्यमिह कथङ्कारम्।
स्वमनुभवति हृद्देशं जनसामान्योऽपि यदि भग्नम्।।

**(518) प्रतीक्षा**

आगच्छाम्यहमग्रे गच्छन्तं त्वां सुशीघ्रमनुगच्छन्।
इत्युक्त्वाऽप्याद्यावधि नायातः स प्रतीक्षेऽहम्।।

**(519) आशादीपः**

उपरि प्रासादानां सन्ध्यायां प्रज्वलत्सु दीपेषु।
हृद्गत आशादीपो हन्त निमीलन्निवाभाति।।

**(520) मूकीभूतः**

पूर्वं यो वाचालः सुतरामासीदसौ जगन्नाथः।
कथमिव मूकीभूतः सँल्लक्ष्यत एषु दिवसेषु।।

**(521) पुत्री**

स्मयमानामाबाल्याद् यामहमद्राक्षमात्मनस्तनयाम्।
श्वशुरगृहेऽश्रुस्नातां तां द्रष्टुं नैव शक्नोमि।।

**(522) क्व स्नातव्यम्**

मानसमपि नाकर्दममकर्दमान्यपि न सन्ति तीर्थानि।
सरितश्च काकपेयाः क्व गतैः स्नातव्यमस्माभिः।।

## (523) त्याज्यः स देशः

शिष्टा अनादृताः स्युः समादृता यत्र किञ्च दुष्टाः स्युः।
त्याज्यः स आशु देशः श्मशानमिति मन्यमानेन।।

## (524) श्रीमद्गुरुचरणाः

शुद्धान्तःकरणानां सन्तप्तेभ्यः प्रदत्तशरणानाम्।
श्रीमद्गुरुचरणानां कृते प्रणामाः शतं सन्तु।।

## (525) निरपेक्षः

उपहर्तुं सर्वस्वं यस्मै दाता करद्वयेन स्यात्।
निःस्वो न स गृह्णीयात् प्रणिपाताः सन्तु नस्तस्मै।।

## (526) संसारः

दर्शं दर्शं हसितं श्रावं श्रावञ्च हन्त रुदितमिह।
ज्ञातं न मया किञ्चिज् ज्ञातं संसार इत्येव।।

## (527) दम्पती

दम्पत्योरेतर्हि प्रभिन्नपथयोः प्रभिन्नदृष्ट्योश्च।
तिष्ठत्यसिद्धमेव प्रायः सुतरामभिन्नत्वम्।।

## (528) सङ्गीतम्

नहि कश्चित् संवादः स्वरलयतालेषु लक्ष्यते यस्मिन्।
तदियात् कर्णप्रियतां कथमिव सङ्गीतमेतर्हि।।

**(529) सामञ्जस्यम्**

सामञ्जस्यं नैव स्वरलयतालेषु यद् दिनेष्वेषु।
सङ्गीतं स्यात् कथमिव कर्णामृतमर्थवत् स्वादु।।

**(530) नवः**

प्राचीनमनवरुध्य स्वं स्थापयितुं नवो नहि प्रभवेत्।
सत्यप्येवं किमपि स्वीकारार्हो नवोऽपि स्यात्।।

**(531) विफलं जन्म**

रुदतामश्रूणि मया हन्त न विनिवारितानि नयनेभ्यः।
अतिरिच्योदरपूर्तिं किं कृतमागत्य जगतीह।।

**(532) कठिनी**

नैके कथाप्रसङ्गा विवशीकुर्वन्ति रोदितुं पठिताः।
आदिकवे! वाल्मीके! त्वत्कठिनी वस्तुतः कठिना।।

**(533) मुग्धः**

धूर्तेषु वञ्चकेषु व्याप्तेष्विह हन्त जगति सर्वत्र।
यदि वञ्चितः स मुग्धो न तदाश्चर्यं जगन्नाथः।।

**(534) पिच्छिलः पन्थाः**

अस्तित्वाख्यं मन्ये पन्थानं पिच्छिलं नु यत्किञ्चित्।
अस्खलितेन कदाचिन्मन्ये स्यात् केनचिन्न गतम्।।

**(535) देशं कञ्चिद्**

शिबिकावाहाः शिबिकामादायैतर्हि ते गृहं प्राप्ताः।
नेष्यन्ति त्वां देशं कश्चिद् विश्रम्य विश्रम्य।।

**(536) अस्वास्थ्यम्**

प्रायो य इतो मिलिता अस्वस्था एव हन्त ते मिलिताः।
अस्वास्थ्यमेव मन्ये जातो धर्मो युगस्यास्य।।

**(537) अन्धाः**

यैर्न ज्ञातो मार्गस्तेऽस्माकं मार्गदर्शका जाताः।
अन्धेनेवेदानीमन्धा इव नीयमानाः स्मः।।

**(538) निमज्जतोन्मज्जता**

जाता बहवो दिवसा अवशिष्टास्त्वङ्गुलीषु गणनीयाः।
स्थितमिह संसाराब्धौ निमज्जतोन्मज्जतेव मया।।

**(539) सख्यम्**

इह जगति राजनीतिः साधितवत्यद्य हिंसया सख्यम्।
नरसंहारा मन्ये दुष्परिणामो नु तस्यैव।।

**(540) दंशाः**

आरोपयन्ति दंशान् सर्पा इव दुर्जनाः समे सततम्।
क्षतविक्षतमाभाति स्वस्य वर्पुहन्त राष्ट्रस्य।।

## (541) विषवृक्षाः

उद्याने विषवृक्षा यैरिह संवर्धिताः स्वहस्ताभ्याम्।
सन्ततयः खलु तेषां म्रियन्त एतर्हि भुक्तफलाः।।

## (542) खर्जूराः

उद्याने खर्जूराः पदे पदे रोपिता यदस्माभिः।
सुस्वादूनि रसालान्यपेक्षणीयानि तत्किमिव।।

## (543) पिपासा

उदिता चराचराणामधिजिह्वं दुःसहा पिपासैका।
तर्पय जलधर! जलधेः सर्वान् पानीयमानीय।।

## (544) रामचन्द्रः

प्रज्वलितो वर्षेभ्यो यस्मिन् गेहे न दीप एकोऽपि।
तस्मिन्नुदियात् कच्चित् क्षणद्वयं रामचन्द्रोऽपि।।

## (545) आनन्दोच्छलितः

क्वचिदेकान्ते नय मां नद्यास्तीरे महीधरप्रान्ते।
आनन्दोच्छलितोऽहं वसामि गोपैः समं नृत्यन्।।

## (546) आन्दोलनम्

रात्रिन्दिवमद्राक्षं समुद्रमान्दोलितं स्वनेत्राभ्याम्।
तादृशमेवानुभवन्नान्दोलनमस्मि हृदि किञ्चित्।।

### (547) सख्यम्

य इतः समानशीलव्यसनाः सन्तोऽपि गृध्नवश्चेत् स्युः।
मन्ये तेषां मध्ये स्थायित्वं नाप्नुयात् सख्यम्।।

### (548) अयं मे हस्तो भगवान्

जगतीह कोऽपि भगवान् प्रत्यक्षो मानवस्य हस्तोऽपि।
अर्हति यो निर्मातुं नानाश्चर्याणि वस्तूनि।।

### (549) व्रणाः

वपुषि व्रणा गभीरा अप्युपशाम्यन्ति हन्त कालेन।
हृदि वाग्वज्रकृतास्ते किन्त्वामृत्योर्न शाम्यन्ति।।

### (550) बन्धुत्वम्

त्रिष्वपि जगत्सु मन्ये व्याप्तं स्यान्नाम यस्य बन्धुत्वम्।
रामः स एव कृष्णः स एव बुद्धः स एवेह।।

### (551) वृद्धः

कुरु मा कुर्विति वृद्धः सततं दुःखाकरोति यूनोऽस्मान्।
नेतुमिमं प्रेषयिता कदा नु दूतान् निजान् यमराट्।।

### (552) मनुष्यत्वम्

वेदं बाइबिलं वा कुराणमथवा शुभं गुरुग्रन्थम्।
उत्पद्यत एकान्ते पठति मनुष्ये मनुष्यत्वम्।।

**(553) प्रस्थानदिनम्**

प्रस्थानस्य विनिश्चितमेकं सर्वस्य यत् कृतेऽस्ति दिनम्।
शोचसि वृथैव किन्तत् स्वपिहि जगन्नाथ! निश्चिन्त:।।

**(554) रामचरितमानसम्**

तुलसीदासस्य शुभं रामचरितमानसं समाकर्ण्य।
भवति मनसि मम लब्धो भवजलधौ कर्णधार इति।।

**(555) मदो मे व्यपगत:**

कविरहमित्यन्वभवं पूर्वाननधीत्य कालिदासादीन्।
इदमनुभवामि सम्प्रति मम सोऽनुभवो विलीन इति।।

**(556) शृङ्खलानुभव:**

स्वातन्त्र्यार्थे लब्धोऽस्माभिर्विजय: कियान्नु सङ्ग्रामे।
अद्याप्यनुभूयन्ते पदेषु न: शृङ्खलध्वनय:।।

**(557) आषाढस्य प्रशमदिवस:**

आकाशाजिरमध्ये न दृश्यते सञ्चरन् घनश्याम:।
आषाढस्य प्रशमं यात्येष प्रशमदिवसोऽपि।।

**(558) शोक: श्लोकत्वमागत:**

कस्त्वं स्वरमतिमधुरं य: कण्ठे कोकिलस्य निदधासि।
कस्त्वं येनादिकवे: शोक: श्लोकीकृत: सहसा।।

## (559) वाणी बाणो बभूव ह

कस्त्वं येन प्रतिभा कवय उपहृतेह कालिदासाय।
कस्त्वं येन च वाणी लोकेऽस्मिन् बाणतां नीता।।

## (560) भारः

भारमिव स्थापयितुं स्वशिरसि कमपीह नाहमाकाङ्क्षे।
शिरसि न कस्याप्येष स्वयं न भारो बुभूषामि।।

## (561) गुणः

कस्मैचिदपि स्वीयो न राजहंस! त्वया गुणो दत्तः।
हन्त त्वयैव सार्धं गुणस्त्वदीयः स उच्छिन्नः।।

## (562) करुणा

ईश्वर आस्तां कश्चित् करुणावरुणालयो यतः कामम्।
मानव! तवापि हृदयात् करुणास्रोतस्विनी वहति।।

## (563) अतिवादिनः

अतिवादिभिरिह कैश्चिद्द्वित्रैर्वा पञ्चषैरनात्मज्ञैः।
धर्मक्षेत्रमिदानीं हन्त कुरुक्षेत्रतां नीतम्।।

## (564) उपदेशाः

विद्यां वितरितुमिह ये समागतास्ते समे गता गुरवः।
स्मरणेऽपि वयमशक्तास्तेषामुपदेशवचनानाम्।।

**(565) गरुडः**

उड्डयमाने दूरं गगने गरुडे गरुत्मति प्रबले।
अपि काममुड्डयन्तामन्ये क्षुद्रा गरुत्मन्तः।।

**(566) एको धर्मः**

यदि मानवत्वनामा धर्मो जगतीह कश्चिदेकः स्यात्।
वैरविरहितः सर्वोऽप्यजातशत्रुः कदाचित् स्यात्।।

**(567) छायावसरः**

आतपतप्तेभ्य इतश्छायावसरः क्वचित्प्रदातव्यः।
आतपतापोऽप्युचितश्छायायां विहितवसतिभ्यः।।

**(568) वाणिज्यम्**

विपणिषु यद्वाणिज्यं कस्यचिदपि तन्न भवति खेदाय।
खिद्यत एव तु चेतस्तदाकलय्येह तीर्थेषु।।

**(569) भक्तिः**

ईश्वरविषया मन्ये भक्तिर्भक्तस्य हृद्गतो भावः।
तामेव केचिदद्य प्रदर्शयन्तः प्रसिध्यन्ति।।

**(570) विशिष्टः कविः**

कामं न जगन्नाथः कविर्विशिष्टः कुतोऽपि मन्येत।
सामान्यः कविरित्यपि नहि मन्यन्तेऽभ्यसूयन्तः।।

**(571) श्रीमद्भागवतम्**

हृद्भ्यो ये रोचन्ते हरिभक्तेभ्योऽपि तेऽत्र रोचन्ते।
श्रीमद्भागवतं पठ हरिभक्तिर्येन तव सिध्येत्।।

**(572) समानधर्मा सहचरः**

सुबहोः कालात् कश्चित् प्रतीक्ष्यमाणोऽत्र सहचरो मिलति।
स्याच्चेत् समानधर्मा यदि स ततः किन्नु वक्तव्यम्।।

**(573) वार्धक्यम्**

कोऽपि न पृच्छति कुशलं कोऽप च नोपेति भाषितुं किञ्चित्।
नाज्ञासिषं यदेवं यापयितास्मीह वार्धक्यम्।।

**(574) वसन्तजन्यः क्लेशः**

कोऽपि बिभेति ग्रीष्मात् कोऽपि हिमर्तोश्च पीडितो भवति।
हन्त वसन्ते प्राप्ते क्लिश्यति सुतरां जगन्नाथः।।

**(575) कच्चरम्**

त्वामद्य ये त्वदीया बहु मन्यन्ते सदा च सेवन्ते।
कच्चरमिव ते प्राप्ते काले निःसारयिष्यन्ति।।

**(576) भूमेः स्पर्शः**

सुमनस एता मन्ये दवीयसो भूमिमागताः स्वर्गात्।
भूमेः स्पर्शादेव व्याप्तः सद्गन्ध एवासु।।

## (577) वर्षाणां वैफल्यम्

वर्षास्वपि न मयूरा दृश्यन्ते काननेषु नृत्यन्तः।
गर्जन्ति नापि मेघा वितताकाशाजिरे मत्ताः।।

## (578) श्रीमद्भागवतम्

सन्ति ग्रन्था नैके महागुरूणामितो गरीयांसः।
श्रीमद्भागवतं मां समधिकमाकर्षति प्रायः।।

## (579) श्रीकृष्णः शरणं मम

नाहं कश्चिद् भक्तः करे न माला न कण्ठिका कण्ठे।
श्रीकृष्ण एव कश्चिद् गोपालो मामकं शरणम्।।

## (580) समाधानम्

निदधासि प्रत्येकं हस्ते यस्मिंस्त्वमेव तरवारिम्।
तस्मिन् प्रसूनमेकं निधाय कुर्मः समाधानम्।।

## (581) गुरुः शिष्यश्च

स्वगुरोरिहोपदेशान् शिष्याः सञ्चारयन्ति विश्वस्मिन्।
स्वकुटीर एव लीनो गुरुः स्वशिष्यान् समाधत्ते।।

## (582) प्रवचनम्

हृदि यस्य द्वेषाख्यः सन्ततमुच्छ्वसिति कोऽपि कृष्णाहिः।
स्वमहिंसामवलम्ब्य प्रवचनमारप्स्यते स श्वः।।

**(583) आलापः**

येनेच्छाम्यालपितुं दूरस्थेनापि तेन सम्भाषे।
दूरस्थया त्वया सममालापः केन विधिना स्यात्।।

**(584) 'ताज'-भवनम्**

स्वमहिष्यै सम्राजा शाहजिनानेन सम्प्रदत्त इह।
'ताज'–भवनमिति वस्तुत उपहारः प्रणय–कुसुमस्य।।

**(585) प्रेम**

प्रेम्णो नामग्रहणं कोऽप्यपराधोऽस्ति दण्डनीय इह।
स्थानान्निर्यान्त्यस्माद् ये नाम प्रेम कुर्वन्ति।।

**(586) वंशी**

वंशीषु न वंशीधर! जडासु कश्चिद् गुणो नु मुखरासु।
आकर्षणस्य हेतुः संयोगो यस्त्वदधरेण।।

**(587) नीराजना**

केवलमभ्यसनेन प्रसादनीया अजस्रमस्माभिः।
रामायणादयो न ग्रन्था नीराजनासाध्याः।।

**(588) मार्जारः**

उद्याने कृतवसतिषु खगेषु निर्माय नीडमात्मीयम्।
कश्चिद् कुतश्चिदागान्मार्जारोऽवसरमालक्ष्य।।

**(589) कोलाहलः**

शृणुमः सुगाननिपुणैर्यदिदानीं गीयमानमिह कैश्चित्।
कोलाहलेन भरितं तत् कुरुते कर्णमुद्विग्नम्।।

**(590) अज्ञातः कश्चित्**

शिबिकामादाय समं शिबिकावाहैश्चतुर्भिरागत्य।
नेष्यति पितुर्गृहान्मां रुदतीं श्वः कश्चिदज्ञातः।।

**(591) हृदयसमन्वयः**

नहि मे स्वरेण न च मे लयेन मिलितौ स्वरो लयश्च तव।
परमन्योन्यं मिलितं हृदयाभ्यामावयोः सततम्।।

**(592) उपेक्षिता**

याता हन्त शताब्दिस्तिष्ठत्यद्याप्युपेक्षिता नारी।
नहि तावत् कल्याणं नेत्रेऽस्या यावदश्रूणि।।

**(593) त्वरा**

काऽपि त्वरेह सम्प्रति सर्वानप्यस्ति बाधमानेव।
एतन्नहि तात्पर्यं जन इह सर्वः शनैश्चरतु।।

**(594) दीपसहस्रम्**

कामं दीपसहस्रं प्रवाह्यतां केनचित् त्रिपथगायाम्।
प्रज्वाल्यन्तां कतिचिन्निःस्वानां पर्ण–शालासु।।

**(595) शैशवं! क्वासि**

शैशव! निवृत्य सकृदपि कदाचिदायाहि कुत्र यातमसि।
सह सहचरैः रजःसु क्रीडितुमिच्छामि निर्द्वन्द्वः।।

**(596) आतपतापः**

छायासुखमन्वभवन् धनपतयो ये स्थिताः स्वहर्म्येषु।
तैरप्यातपतापः कृषकेणेवेह सोढव्यः।

**(597) वृद्धसेवा**

सुविनीतैरिह युवभिर्देयं साहाय्यमाशु वृद्धेभ्यः।
तेषामाशीस्तेभ्यो वितरिष्यति नूनमानन्दम्।।

**(598) उदारचरिताः**

लघुचेतोभिर्भारतमस्माकं सर्वतो जनैर्व्याप्तम्।
क्वचिदप्युदारचरिता गवेष्यमाणा न लभ्यन्ते।।

**(599) आर्जवम्**

अद्याप्यार्जवनामा गुणो महीयानितो मनुष्यस्य।
न तथापि तस्य मन्ये कोऽप्युपयोगोऽस्ति जगतीह।।

**(600) गृध्रगोमायू**

स्थित एकतोऽस्ति गृध्रः प्रतीक्षमाणोऽन्यतश्च गोमायुः।
वेद विधातैव शवे कस्य कियद् भागधेयमिति।।

## (601) विश्वासपात्रम्

विश्वसनीयत्वमितः कुतो जनानां प्रकामकुटिलानाम्।
अन्तर्भृतगरलानामुपरि स्मयमानवदनानाम्।।

## (602) भगवान् जगन्नाथः

आषाढमासि शुक्ले पक्षे 'पुर्यां' तिथौ द्वितीयायाम्।
गर्भगृहान्निर्गच्छति रथयात्रार्थं जगन्नाथः।।

## (603) आतङ्कः

नान्योन्यं भाषन्ते नाप्यन्योन्यञ्च केऽपि शृण्वन्ति।
किं घटितं यदियं पूर्मूकीभूतेव बधिरेव।।

## (604) उपेक्षा

उपदिश्य 'मोहनो'ऽगादगादितः 'कृष्णमूर्ति'राभाष्य।
कस्य श्रुतमस्माभिः श्रवणाभिमुखेन चित्तेन।।

## (605) पश्चात्तापः

पूजा स्वस्यैव कृता यापितमिह खादता च पिबता च।
तस्य पुरः कथमेतद् विधीयतामुन्नतं स्वशिरः।।

## (606) शास्त्रकाव्ययोरभ्यासः

शास्त्रं न पाणिनीयं स्वस्वाध्यायस्य गोचरं जातम्।
अभ्यस्तं बत किञ्चिन्न कालिदासस्य साहित्यम्।।

**(607) पन्था:**

छायाद्रुमा: सरांसि च लब्धा लब्धानि केन पथिकेन।
शान्तानुकूलपवन: शिवश्च कस्याभवत् पन्था:।।

**(608) प्रतीक्षा**

नूनं त इतो धन्या करावलम्बस्त्वयाऽर्पितो येभ्य:।
अन्येऽपि दृङ्निपातं प्रतीक्षमाणास्तव द्वारि।।

**(609) सत्याग्रही**

नचिकेतस्त्वं धन्यो यमराडार्द्रीकृतस्त्वया येन।
सत्याग्रहिषु प्रथमस्त्वमेव, नास्त्यत्र सन्देह:।।

**(610) करुणार्द्रचित्त:**

अभिनेतारो लोके बहवो दृश्यन्त एव करुणार्द्रा:।
कस्यचिदेव हि चित्तं यथार्थतो भवति करुणार्द्रम्।।

**(611) भारतस्य भाग्यविधातार:**

कुत्र गतास्ते सम्प्रति भारतभाग्यस्य ये विधातार:।
हन्त स्वतन्त्रमपि सद्भारतमाभाति परतन्त्रम्।।

**(612) सङ्गीतम्**

वीणायास्तन्त्रीभ्योऽथ वादकस्याङ्गुलिभ्य उद्भवति।
स स्वरविशेष इह यं सुधिय: सङ्गीतमित्याहु:।।

**(613) सूक्ष्मेक्षिका**

मुण्डे मुण्डे प्रायोऽनुभूयते यद्यपीह मतिभेदः।
सूक्ष्मेक्षिकैव सिध्यति तथापि तस्मान्मनुष्यस्य।।

**(614) सत्यम्**

यद्यपि न सत्यमण्वपि कस्यचिदनुभूतिगोचरं भवति।
प्रायस्तथापि सर्वे स्वायत्तं मन्वते तदिह।।

**(615) मठाधीशाः**

सिंहासनमधिरूढाः क्व मठाधीशा न ते विराजन्ते।
देवा येषां मन्येऽङ्गुलिनिर्देशेन नृत्यन्ति।।

**(616) कविता**

कवितामन्विष्यामि स्वामहमस्मिन् स्थले क्वचिल्लीनाम्।
अत्रैव नूपुरस्य क्वणितमिवाभाति कर्णपथम्।।

**(617) सङ्ग्रहः**

सङ्ग्रह एवेदानीं सिद्धान्तः सर्वसम्मतो जातः।
विस्मृतिपथमानीता लोके त्यागस्य चर्चाऽपि।

**(618) वाग्ग्मित्वम्**

यद्यपि मितेन वचसा सारेण च सिद्ध्यतीह वाग्ग्मित्वम्।
केचित् तथापि सुधियो वाग्विस्तरमेव मन्यन्ते।।

**(619) 'मेघदूतस्य' पात्रम्**

प्रावृषि जलदे गर्जति वने मयूरं निरीक्ष्य नृत्यन्तम्।
नृत्यति यस्य न हृदयं स न पात्रं 'मेघदूतस्य'।।

**(620) अत्यन्ताभावः**

काले प्रवर्तमाने हृत्सु जनानां दृषत्त्वमाप्तेषु।
प्रायोऽत्यन्ताभावः समजनि करुणार्द्रचित्तानाम्।।

**(621) सचेतसः**

वागर्थप्रतिपत्तिः स्पृशति न यं नापि नवनवोन्मेषः।
न कवित्वमाद्रियन्ते सचेतसस्तस्य गोष्ठीषु।।

**(622) संवेदनम्**

वागर्थयोर्न तिष्ठति नालङ्कारेषु नापि वृत्तेषु।
तिष्ठति कविता मन्ये संवेदनवत्सु हृदयेषु।।

**(623) धरा जननी**

उड्डयमानेन मदादवधूता या मया धरा जननी।
विश्राम्यामि श्रान्तस्तस्या एवाङ्क एतर्हि।।

**(624) नकारः**

स जगन्नाथो यद्यपि न प्रतिभातीह कश्चिदवधूतः।
हन्त तथापि नकारः श्रुतिपथमायाति तस्य मुखात्।।

**(625) उत्साहः**

शिथिलयति देहसन्धीन् यथा यथा मामकान् जराकुटिला।
मन्ये तथा तथैव द्रढयति चैतन्यमुत्साहः।।

**(626) ईश्वरः**

सौन्दर्यस्य स एको मूलस्रोतो यमीश्वरं प्राहुः।
सौन्दर्यान्यन्यानि च तस्य च्छायानुकारीणि।।

**(627) अस्तित्वम्**

त्वच्छब्देन मदीयं गुञ्जितमाभाति शून्यमस्तित्वम्।
त्वद्गन्धस्य स्पर्शात् सुरभि प्रतिभाति मेऽस्तित्वम्।।

**(628) उद्यानस्य द्वारम्**

न पिधेह्युद्यानस्य द्वारं विफलं मदागतं कर्तुम्।
मामुपयाति सुगन्धः सुहृदिव मिलितुं तव द्वारि।।

**(629) अनुग्रहः**

हेतुं विनैव वर्षति तस्य स्वजनेष्वनुग्रहः कश्चित्।
ज्ञानं वैराग्यञ्च द्वे अपि तदनुग्रहस्य फलम्।।

**(630) निर्माणे मार्मिकः**

स्वं स्वं काव्यज्ञत्वं सुधियः प्रतिपादयन्ति गोष्ठीषु।
नादृश्यत तासु परं निर्माणे मार्मिकः कोऽपि।।

### (631) जनसामान्यस्य हृदयम्

महती भगवदनुग्रहसिद्ध्िः प्रतिभाति मद्विचारेण।
जनसामान्यस्य हृदि स्थानं यदि नाम लभ्येत।।

### (632) लज्जा

नैसर्गिकमाभूषणमिह लज्जामामनन्ति नारीणाम्।
एतावताऽबलेति प्रतिपत्तव्या न केनापि।।

### (633) विजयध्वजः

कामं धावन्त्वेते विजयध्वजमुन्नमय्य रथ्यासु।
वयमपि धाविष्यामो विजये सत्येवमेव पुनः।।

### (634) आतपतापः

यस्मिन् पथि चलितोऽस्म्यहमातपतापस्य तत्र साम्राज्यम्।
न स्निग्धच्छायातरुरारादायाति दृष्टिपथम्।।

### (635) सत्यवादिनः

क्षणमपि सत्यं येषां स्वप्नेऽपि स्पृशति नेह रसनाग्रम्।
हा हन्त! सत्यवादिषु त एव गण्यन्त एतर्हि।।

### (636) गुणा दोषाश्च

गुणवत्स्वपि लभ्यन्ते केचन दोषाश्च दोषवत्सु गुणाः।
केचन गुणाधिका इह केचन दोषाधिकाश्चेह।।

**(637) महान्तः**

अर्हन्ति स्थातुमितो राज्ञां सिंहासनेभ्य उच्चैर्ये।
ते यापयन्ति दिवसान् विगतेच्छाः पर्णशालासु।।

**(638) शयितम्**

पर्यङ्केशु महार्हेष्वपि शयितं व्याकुलीकरोतीह।
कण्टकवत्यां भूमावपि भवतीतः सुखं शयितम्।।

**(639) कालसम्मार्जनी**

परितः कच्चरजालं दुर्गन्धि व्याकुलीकरोतीह।
सम्मार्जनी झटिति तन्निवारयेदेव कालाख्या।।

**(640) मृगः**

प्रच्छन्नोऽहं मृग इव यतस्ततः काननेऽद्य विचरामि।
मृगयव एते कतिचिन्मामन्विष्यन्त आयान्ति।।

**(641) स्वान्तःसुखम्**

स्वान्तःसुखमद्यावधि वच्मि यथार्थं न हन्त वेदाहम्।
क्वचिदपि तुलसीदासान् लभेय यदि नाम पृच्छेयम्।।

**(642) 'चरैवेति'**

धावं धावं श्रान्तो मन्दं मन्दञ्च चलितुमिच्छामि।
भूयो भूयः 'श्रुत्या' यदिहाभिहितं 'चरैवेति'।।

**(643) शुनःशेपः**

आजीगर्तिर्नासीदेकः कश्चित् सुतः शुनःशेपः।
विक्रीता न कियन्तः पितृभिः स्वार्थे शुनःशेपाः।।

**(644) नैराश्यम्**

जीवितुमेकः साम्प्रतमाधारो नाम काचिदाशेह।
सिध्यति कदाचिदेतत् सुखाय शान्त्यै च नैराश्यम्।।

**(645) अप्रत्याशितम्**

प्रत्यय उदेति कश्चित् साम्प्रतमपि हन्त नान्तरस्माकम्।
प्रातरुपस्थित एष स्मयमानो द्वारि नस्त्वमसि।।

**(646) भस्मासुरः**

आतङ्कवादनामा भस्मासुर एष कोऽपि जागर्ति।
स्वप्रश्रयदातारं प्रथममसौ भस्मसात्कुरुते।।

**(647) प्रत्युपकारः**

कः स्यात् पृथिवि! कृतानां प्रत्युपकारस्तवोपकाराणाम्।
प्रत्युत वयमेव स्मस्तव हेतुर्दुःस्थितेरधुना।।

**(648) कविता**

कविता जगतीह बलादपहर्तुं शक्यते न केनापि।
वस्तुत एषा कमपि द्रुतमुपसृत्य स्वयं वृणुते।।

**(649) सङ्कोचः**

सभ्येतराणि वदनान्नास्माकं निःसरन्ति वचनानि।
जानीमो यत् केचन तेषामेवेह पात्राणि।।

**(650) पश्चात्तापः**

पारावतशिशुरेको दिन एकस्मिन् मदन्तिकं प्राप्तः।
रक्षितुमपारयं तं नाहतमन्धञ्च हा धिङ्माम्।।

**(651) भौतिकपिण्डम्**

मानव एष न कश्चिद् भौतिकमिह पिण्डमात्रमुच्छिष्टम्।
अनभिव्यक्तः सुतरामभिव्यनक्ति स्वमेतस्मिन्।।

**(652) बोधिसत्त्वाः**

क्व दयानन्दः स्वामी क्व परमहंसः स रामकृष्णश्च।
उत्पद्यन्ते न पुनः पुरातना बोधिसत्त्वास्ते।।

**(653) रक्तबीजाः**

अर्हति को निर्भीकः स्थातुमितः प्रकटरक्तबीजेषु।
उत्पन्नेषु समन्ताल्लोकं दन्दह्यमानेषु।।

**(654) उद्धारः**

अतिरिच्योदरपूर्तिं किं कृतवान् संसृतौ त्वमागत्य।
भविता संसाराब्धेर्न जगन्नाथ! त्वदुद्धारः।।

## (655) विजययात्रा

मिलिते पराजयानां शते मिलेद्वा मिलेन्न विजयो मे।
विजयायैषा यात्रा प्रवर्तनीयैव सोत्साहम्।।

## (656) आर्जवम्

आर्जवमस्ति कदाचित् कुटिलेषु न जगति काचिदपि नीतिः।
प्रस्तरखण्डस्योत्तरमितस्तदपि दीयते पुष्पैः।।

## (657) आदर्शः

केचिद् गुणा अपि स्युः स्मरणीया रावणस्य चरितेऽपि।
नार्हति तदपि स भवितुं रामवदस्माकमादर्शः।।

## (658) भिन्नरुचिर्हि लोकः

रामायणमादिकवेस्तुलसीदासस्य रामचरितं वा।
'तस्य कृते तन्मधुरं यस्य मनो यत्र संलग्नम्।।'

## (659) कृपा

वर्षिष्यस्यस्मासु प्रतीक्षमाणाः कृपां तवास्म वयम्।
वर्षति साऽनुक्षणमिति न ज्ञातं तावदस्माभिः।।

## (660) प्रतिफलम्

येषां क्षणमधरेषु स्मितमानेतुं मया कृतो यत्नः।
मयि ते प्रकटितवन्तो रोषं स्फुरिताधराः प्रायः।।

## (661) परिवर्तनम्

आसन् शिरःसु येषां हीरकजटितानि हेममुकुटानि।
तेऽद्य भ्रमन्ति भिक्षापात्राण्यादाय रथ्यासु।।

## (662) आश्चर्यम्

प्रेम्णः पाठो यैरिह नाभ्यस्तो जीवने कदाचिदपि।
ते दृश्यन्ते प्रायो गायन्तः प्रेमगीतानि।।

## (663) अभावानुभवः

अनुभूतोऽनुक्षणमिह तस्याभावो विना प्रतीकारम्।
आसीद् यस्यास्तित्वं सुगन्धि सौन्दर्यभरितञ्च।।

## (664) बन्धनपाशः

नायं बन्धनपाशो धर्मो नामेति मामकः पक्षः।
यो मुक्तयेऽस्ति सिद्ध्येत् स कथं बन्धाय लोकस्य।।

## (665) सनातनो धर्मः

धर्मः सनातनो यः स एष मान्यो नहीतरः कश्चित्।
इत्युपदिशेत् स कश्चिद् व्यासः पुनरेत्य बुद्धश्च।।

## (666) असुरक्षा

असुरक्षा नगरेषु ग्रामेश्वपि चातिमात्रमसुरक्षा।
असुरक्षितमस्तित्वं नासीदीदृङ् मनुष्यस्य।।

**(667) विवेकिनामभाव:**

स जगन्नाथोऽपि कवि: काव्यं तस्यापि काव्यमित्याहु:।
अपि सञ्जातोऽभाव: सम्प्रति सदसद्विवेकवताम्।।

**(668) सारस्वत: कोष:**

उत्प्रेक्षितुमिह कश्चित् क्षमो यदपि नैव नूतनं वस्तु।
सारस्वतस्य सिद्धं तदपि न कोषस्य रिक्तत्वम्।।

**(669) प्रतीक्षा**

याता हन्त कियन्तो मासा: संवत्सराश्च दिवसाश्च।
यमिह प्रतीक्षमाण: स्थितोऽस्मि सोऽद्यापि नायात:।।

**(670) साहित्यम्**

साहित्यं यत्किञ्चिन्निर्माणाधीनमेषु दिवसेषु।
शब्दाडम्बरमात्रं पुञ्जीभूतं पलालमिव।।

**(671) स्वातन्त्र्यम्**

मह्यं देह्युत्पतितुं सत्वरमाकाशमेकमुन्मुक्तम्।
पिञ्जरगतेन कालात् सुबहोरिह यापितं मयका।।

**(672) वनराजत्वम्**

पञ्चास्ये पञ्चत्वं प्राप्ते वन्येषु जन्तुषु प्राय:।
अहमहमिकेव सम्प्रति वनराजत्वस्य लाभार्थम्।।

## (673) सामरस्यम्

उच्चैर्नीचैरिति यो दुराग्रहो मनसि कश्चिदस्माकम्।
सामाजिकस्य सुतरां स बाधकः सामरस्यस्य।।

## (674) स्वप्नभङ्गः

स्वातन्त्र्योत्तरकाले भविता किमपीह रामराज्यमिति।
भग्नः परिलक्ष्यत इव महात्मनो गान्धिनः स्वप्नः।।

## (675) वैकल्यम्

जगतो व्यवहारा मां विकलीकुर्वन्ति हन्त पश्यन्तम्।
रोदिम्यन्तः केवलमुपर्यतितरां हसन्नस्मि।।

## (676) करुणार्द्रा

मम कवयतः कदाचिच्छृङ्गारालिङ्गितेव मतिरासीत्।
सम्प्रति कथं न जाने करुणार्द्रार्द्रेव सञ्जाता।।

## (677) विस्मृतिः

किमपि मया विस्मृतमिह किमिति प्रभवामि हन्त न स्मर्तुम्।
ग्रन्थेष्वन्विष्यामि क्षणमन्विष्यामि शय्यासु।।

## (678) निरुद्देश्यम्

स जगन्नाथः क्वास्ते परिभ्रमन् यत्र कुत्र नगरे यः।
प्रातः सायमदृश्यत चतुष्पथेष्वपि च रथ्यासु।।

**(679) सान्त्वनम्**

कालेऽप्यनागते तव वयमिह लोकोत्तरत्वमुल्लिख्य।
त्वां मानसवास्तव्यं चर्चिष्यामः प्रतिष्ठस्व।।

**(680) प्रणयजालम्**

विलपामि क्षणमेष क्षणं हसामि प्रमत्त इव कश्चित्।
श्रूयत एषा भवति स्थितिः प्रणयजाल–पतितानाम्।।

**(681) वञ्चितः**

सरलतया स्वप्रकृतेः पदे पदे वञ्चितोऽसि जगतीह।
त्वद्वृत्तमाकलितवानारम्भादन्तपर्यन्तम्।।

**(682) स्मरणम्**

तव रे स्मरन् गुणौघान् स्मारं स्मारं निजांश्च दोषौघान्।
दिवसान् स्वानवशिष्टान्, पारं नय, नेतुमिच्छामि।।

**(683) कनीनिका**

उद्घाटितया कामं प्रेक्षस्व दृशाऽऽगतान् जनानन्यान्।
अपि मां प्रेक्षेथास्त्वं दृशो निजायाः कनीनिकया।।

**(684) शरसन्धानम्**

प्रच्छन्ना य इहासन् सर्वेऽनुगता दशाननस्याद्य।
मन्ये ते रामं प्रति शरसन्धानोद्यताः सन्ति।।

**(685) सहानुभूतिः**

सम्भावनीय इह कः सहानुभूत्योपसृत्य जगतीह।
नगरेषु ग्रामेषु च सर्वः प्रायो रुदन्नस्ति।

**(686) क्रौञ्चाः**

आदिकवे! पश्य पुनर्द्वारात् स्वस्याश्रमस्य निर्गत्य।
आक्रोशन्तः क्रौञ्चाः सहचरविरहादितः सन्ति।।

**(687) तथागतः**

विचरन्त्यङ्गुलिमालाः सहस्रशोऽद्यापि काननाभ्यन्तः।
तानवरोद्धुं कश्चित् तथागतो नागतो भगवान्।।

**(688) धर्मध्वजाः**

धर्मः श्रेयान् पन्थाः सुखाय शान्त्यै च सर्वलोकस्य।
धर्मध्वजाः परं तं प्रकुर्वते कण्टकाकीर्णम्।।

**(689) साधवः**

साधव इति ये स्रग्भिः प्रमाणयन्तीह ये जटाभिश्च।
तेषु द्वित्रा एव स्युर्मन्ये साधवः केचित्।।

**(690) भुवो भारः**

भारो भुव इति वृद्धा युवभिः कैश्चिन्मदादुपेक्ष्यन्ते।
तेषामपि भवितेदृग् दशेति विमृशन्ति हन्त न ते।।

## (691) विचारगोष्ठी

आश्रीयते न तर्कः प्रतिवादस्यापि यत्र नावसरः।
अर्हति सा नहि भवितुं विचारगोष्ठी विचारवताम्।।

## (692) व्यवहारः

आ जन्मनोऽनुभूतं येषु स्वत्वं दिनेषु यातेषु।
व्यवहारः खलु तेषां हन्त परेषामिवेदानीम्।।

## (693) शिव शिव शिवानां कलकलः

कण्ठीरवस्य यस्मादश्रूयत भीषणो रवो गहनात्।
कलकल एष शिवानां तस्मादायाति कर्णपथम्।।

## (694) गन्तव्यम्

दूरमितो गन्तव्यं मयेति जाने परं न जानेऽहम्।
केन पथा गच्छेयं स्वमाप्नुयां येन गन्तव्यम्।।

## (695) पञ्जरस्थः खगः

उत्पश्याम्याकाशं परमुत्पतितुं न हन्त शक्नोमि।
अभिलषितं म्रियमाणं खगस्य मे पञ्जरस्थस्य।।

## (696) आभरणानि

अधरे कोऽप्यनुरागः कज्जलमक्ष्णोः सदुज्ज्वलं वासः।
सरलान्याभरणानि क्व गतान्येतानि नारीणाम्।।

**(697) विनयः**

विनयः सर्वगुणानां मन्य श्रेष्ठोऽस्ति मानवस्य गुणः।
जितमिह सदैव हृदयं सता विनीतेन सर्वस्य।।

**(698) स्मितस्यार्थः**

सर्वस्यापि शृणोषि स्मयमानो भाषसे न किञ्चिदपि।
प्रभवामस्ते ज्ञातुं न जगन्नाथ! स्मितस्यार्थम्।।

**(699) गजराजः**

उच्चैः स्वरेण कामं श्वानः प्रविलोक्य नाम बुक्कन्तु।
राजपथे गजराजो धीरं पश्यन् शनैर्याति।।

**(700) पङ्कः**

मन्ये क्व चन्दनं खलु मन्ये क्व च पङ्क एष मलिनतरः।
ननु पङ्क एव जनयति तत् पङ्कजमिन्दिरावासम्।।

**(701) मातर्भूमे!**

यास्यसि गोरूपधरा मातर्भूमे कदा त्वमतिखिन्ना।
विनिवेदयितुं दुःखं शयितं क्षीराम्बुधौ विष्णुम्।।

**(702) स्वयंसिद्धः**

अनुकार्यस्यानुकृतिं चातुर्येणैव साधयन्ति नटाः।
अनुकार्याणि भवन्ति प्रायः स्वयमेव सिद्धानि।।

## (703) सुखदु:खे

येभ्य: समकल्पयमिह सुखञ्च शान्तिञ्च हन्त संसारे।
दु:खञ्चाशान्तिञ्च स्वेभ्यस्तेभ्य: स्थितोऽनुभवन्।।

## (704) मनुष्यत्वम्

निर्मित एष मनुष्यो वन्द्यस्तावत् स कोऽपि निर्माता।
वन्द्यास्तेऽपि मनुष्ये यैरन्विष्टं मनुष्यत्वम्।।

## (705) विक्रय:

सङ्गीतं विक्रीतं त्वयेह साहित्यमपि च विक्रीतम्।
सम्प्रति सुखं शयीथा विक्रीयात्मानमप्यत्र।।

## (706) सौहार्दम्

वाङ्मात्र एव तिष्ठति सौहार्दं नानुभूयतेऽत्र हृदि।
शत्रूयन्ते सुहृद: प्राय: परिणाम एतस्य।।

## (707) करुणार्द्रचित्त:

स्यादथ स बोधिसत्त्व: स्यादजमेरस्थित: स चिश्ती वा।
मानवमात्रं प्रति य: समजनि करुणार्द्रचित्त इह।।

## (708) सौन्दर्यम्

द्यावाभूम्योर्यदिदं मानवमात्रस्य यच्च सौन्दर्यम्।
द्रष्टुं द्वयमपि शक्यं बाह्येन न केवलेनाक्ष्णा।।

## (709) चमत्कारः

गरुडं मशकीकुरुते नयति गरुडतां क्षणेन मशकमपि।
एष नियन्तुर्जगतस्तस्येच्छायाश्चमत्कारः।।

## (710) स्निग्धः

प्रायो जागर्म्येष प्रातर्मधुकूजितेन विहगस्य।
स्निग्धस्त्वमेव मन्ये जागरयस्येवमुपसृत्य।।

## (711) अनुर्वरम्

जातमनुर्वरमधुना हृदयक्षेत्रं जनस्य सर्वस्य।
स्मयमानोऽपि न कश्चिद् दृक्पथमायाति तावदिह।।

## (712) उपहृतिद्वयम्

तेनेश्वरेण मन्ये भवन्ति दत्तानि सर्ववस्तूनि।
द्वयमुपहृतिर्विशिष्टा सौन्दर्यञ्च स्वरो मधुरः।।

## (713) कच्छपः

संगोप्य सर्वतः स्वं कच्छप इव शान्त एष तिष्ठामि।
स्थापयितुं प्रयतन्ते तप्ते मां सैकते केचित्।।

## (714) सूत्रधारः

निपतन्तु मत्प्रणामाः क्व सूत्रधारं विहाय तं जगतः।
योऽदृश्यः सन् सततं सर्वमिदं सम्प्रवर्तयति।।

**(715) श्रीगुरुचरणाः**

श्रीचरणेषु गुरूणां प्रणिपाताः सर्वदैव विलसन्तु।
वर्षन्त्याशिष इव नः शिरःसु मृदुरेणवस्तेषाम्।।

**(716) अभिलाषाः**

अभिलाषाः क्वचिदपि रे यात प्रविहाय चित्तमस्माकम्।
युष्माकं प्रेरणया धावं धावं वयं श्रान्ताः।।

**(717) शान्त्यभावः**

भ्रामं भ्रामं सर्वत एतावत् समनुभूतवानस्मि।
मधुशालासु न शान्तिर्न च शान्तिर्धर्मशालासु।।

**(718) असतो मा सद्गमय**

असतः सदिह गमयितुं तमसश्च ज्योतिरर्थितं बहुधा।
अद्यावधि नेह मया सदधिगतं त्वच्च न ज्योतिः।।

**(719) गुरोर्महिमा**

स्वं स्वं गुरुमभिवाद्य स्वं स्वं गेहं जनाः प्रतिष्ठन्ते।
स्वेन महिम्नाऽध्यास्ते गुरुर्मदीयस्तु मामेव।।

**(720) गुरुः**

गुरुरित्येव न मान्यो नोपदिशेद् यदि स तर्कमाश्रित्य।
गुरवोऽन्यथा भ्रमन्तो बहवो रथ्यासु दृश्यन्ते।।

**(721) सन्देशहरः**

केचित्प्रकाशमिव तं समभाषन्तेह किमपि पश्यन्तः।
स्वे सन्देशहरे स्वां स्फुटामकार्षीत् क्वचित् स गिरम्।।

**(722) माता भूमिः**

कालः स नातिदूरे भूर्मातापस्नुता यथापूर्वम्।
यस्मिन्नभिवर्षन्ती भविता न प्रस्रवेणेयम्।।

**(723) पुष्पकरण्डकम्**

पुष्पैर्भरितमपश्यं करण्डकं मह्यमर्पितं यदिह।
नाज्ञासिषं यदन्तः प्रसुप्तभुजगं परीक्षिदिव।।

**(724) राजनीतिरथ्या**

स्वं स्वं वर्णमपेक्ष्य प्रवर्तते राजनीतिरेतर्हि।
वस्तुत एका रथ्या काचिदियं स्वार्थसङ्कीर्णा।।

**(725) आन्तरिका रिपवः**

परितो राष्ट्रमिदानीं प्रतीक्षमाणा न केवलं रिपवः।
राष्ट्राभ्यन्तरपीमे सन्ति विघटनार्थमुद्युक्ताः।।

**(726) करावलम्बः**

लब्धः पदे पदे यः करावलम्बो मया पुरा त्वत्तः।
दुर्लभतरः स जातः कथं न जाने दिनेष्वेषु।।

**(727) हिंसा 1**

राज्यं कदाचिदासीत् करुणाया मानवस्य हृद्देशे।
तमधिष्ठिताऽस्ति दास्याः पुत्रीदानीं तु हिंसैव।।

**(728) हिंसा 2**

न समर्थितेह हिंसा सन्देशहरेण यदपि केनापि।
तेषां गतानुगतिका अवलम्बन्ते तदप्येनाम्।।

**(729) स्निग्धा दीपाः**

भरिताः स्नेहेनेमे दीपा मह्यं विशिष्य रोचन्ते।
ये तिष्ठन्ति समीपे सुहृद इवाक्षीणि सिञ्चन्तः।।

**(730) गङ्गा**

नीराजनया गङ्गा शक्या कर्तुं नहि प्रसन्नेह।
आश्रीयन्तामुचिताः केचिदुपायास्तदन्येऽपि।।

**(731) काव्यम्**

श्रुतमात्रमेव चेतः सचेतसां यद् विकासमानयति।
मन्ये तदेव काव्यं सगुणालङ्कृत्यदोषञ्च।।

**(732) भोजनवासोगृहाः**

प्रत्येकमेव मनुजो भोजनवासोगृहेभ्य उद्युङ्क्ते।
लाभेऽन्येषां न परं प्रायः सतृप्तिमाप्नोति।।

**(733) सुमनसः**

द्वाभ्यामेव सुमनसां सुमनस्त्वं सिध्यतीह सुगुणाभ्याम्।
सौन्दर्यं गुण एको गुणो द्वितीयः सुगन्ध इति।।

**(734) स्वानुभवः**

वैदुष्यमथ कवित्वं द्वयमपि यत्नो न मे प्रमाणयितुम्।
अल्पीयोभिः शब्दैः स्वानुभवो व्यक्तिमानीतः।।

**(735) पराजयोऽपि विजयः**

युद्धं प्रवर्तितं यैः सद्भिर्विगतज्वरैर्जगत्यस्मिन्।
तेषां पराजयोऽपि क्वचिद् विजयरूप एव स्यात्।।

**(736) जन्तवः**

येषां प्राप्ते काले प्रकटीभूता नखाश्च दन्ताश्च।
जन्तुभ्यः खलु तेभ्यः सद्भिरवहितैः सदा भाव्यम्।।

**(737) राजहंसः**

कस्मैचिदपि न दत्तो गुणः स्वकीयः स राजहंस! भुवि।
सहजातः स इदानीं सह यातो रे त्वया हन्त।।

**(738) स्वार्थपरायणाः**

स्वार्थे केचन निरता मनसि नृणां ते घृणां समुत्पाद्य।
उप्त्वा विषवृक्षं ते कामयमाना रसालत्वम्।।

**(739) शकुन्तला कादम्बरी च**

न गवेषिताऽपि लब्धा शकुन्तला कालिदास! ते क्वचन।
कादम्बरी न लब्धा क्वचन मया बाणभट्ट! तव।।

**(740) परम्परा**

अस्माकं न कदाचित् परम्पराया विरोध उद्देश्यम्।
तस्याः पुनर्विचारः प्रतिभाति न किं समीचीनः।।

**(741) प्रेम्णः सन्देशः**

रामेण च कृष्णेन च पूर्वैरन्यैश्च नाम जगतीह।
प्रेम्णो यः सन्देशो दत्तः स तु विस्मृतोऽस्माभिः।।

**(742) मयूरः**

त्वाम्प्रति विधिना मन्ये न कृतो न्यायो मयूर! निर्माय।
विक्रीणन्ति व्याधास्त्वत्पक्षान् यन्निहत्य त्वाम्।।

**(743) लोकद्रुहः**

कस्मै लाभायेमे दन्दह्यन्ते प्रसह्य लोकममुम्।
निर्माणं यस्येमे निर्माणं तस्य लोकोऽपि।।

**(744) शिबिकावाहाः**

अधिरोहति यः शिबिकां कोऽपि मनुष्यः परं विचित्रमिदम्।
तेऽपि मनुष्या इह ये वहन्ति शिबिकां निजैः स्कन्धैः।।

**(745) खगाः**

नैकैः स्थितमुद्याने स्वं स्वं निर्माय नीडमम्बरगैः।
कूजितमतीव मधुरं काले प्राप्ते समुड्डीनम्।।

**(746) स्मृतीनां गतागतम्**

अहमनुभवन् स्मृतीनां गतागतं नित्यमेव कासाञ्चित्।
रोदिमि सह त्वयैव त्वयैव सह किञ्च विहसामि।।

**(747) कविर्विद्वांश्च**

विदुषा सतेह शक्यं सफलतया कवयितुं न केनापि।
कविना किमप्यवश्यं मन्ये विदुषाऽपि भाव्यमिह।।

**(748) स्मृतिः**

अस्माज्जगतो जाने सर्वं स्वीयं विहाय गन्तास्मि।
मन्ये मया समं स्यात् स्मृतिस्त्वदीया सहायैका।।

**(749) स्वरचितानि**

शृणु तत्तदस्य वदनादेष जगन्नाथ आह यद् यदिह।
भविता न वैष भविता श्रावयितुं श्वः स्वरचितानि।।

**(750) वाणिज्यम्**

प्रतिपथ्यं प्रतिनगरं प्रतीक्षमाणाः किलासते वणिजः।
लोकस्य व्यवहारे सर्वत्रैवास्ति वाणिज्यम्।।

**(751) कुज्झटिका**

दूरादप्याभासो नालोकस्यास्ति केन गन्तव्यम्।
तिष्ठति कुज्झटिकाग्रे न्याय्यं पन्थानमाच्छाद्य।।

**(752) जिजीविषा**

शक्नोति स्म न कथमपि यामिह मृत्युः क्षणं पराजेतुम्।
जीवितुमिच्छैवैका मन्ये प्रबला मनुष्यस्य।।

**(753) अन्धतमसम्**

एतावदन्धतमसं प्रबलीभूतं कुतश्चिदेतर्हि।
तेन हि युद्धाद् बिभ्यति भानुमतो भानवोऽपि समम्।।

**(754) उड्डयनम्**

स्वादूनि न रोचन्ते फलानि मे किमपि पञ्जरस्थाय।
उड्डयनमीप्सितं मे गरुत्मतो गगन उन्मुक्ते।।

**(755) जनपदवध्वः**

जनपदवध्वो यद्यपि विदन्ति न भ्रूविलासमत्यन्तम्।
मदयति तथापि चेतस्तासां सामान्यदृक्पातः।।

**(756) स्मृतेर्विषयः**

नामाक्षराणि कामं न शिलापट्टे मम प्रतिष्ठेरन्।
मन्नाम त्वन्नाम्ना स्मृतिपथ उदियाज्जनस्य समम्।।

## (757) गुणहीनः

शास्त्राण्याकलितानि न ननित्यविधयोऽप्यनुष्ठिता भवता।
केन गुणेन भवन्तं वदतु जगन्नाथ! मन्येम।।

## (758) अधमर्णः

वस्तुत इह राष्ट्रं प्रति न कोऽधमर्णः प्रतीतिमायाति।
तेऽक्षम्या येषां हृदि न भाव एषोऽप्युदेति मनाक्।।

## (759) मूर्खः

शास्त्राण्यधीत्य मूर्खा भवन्ति ये सन्ति तेऽत्र मन्न्यूनाः।
एष जगन्नाथस्तु प्रथमस्तादृक्षु गणनीयः।।

## (760) कल्याणम्

अध्येतव्या गीता अध्येतव्यं कुराणशास्त्रमपि।
को जानीयात् कस्माद् वचनात् कल्याणमिह सिध्येत्।।

## (761) अभक्तिभेदः

भगवद्वचनं गीता भगवद्वचनं कुराणशास्त्रमपि।
द्वयमप्येतत् प्राज्ञैरभक्तिभेदेन मननीयम्।।

## (762) संवेदनशून्यत्वम्

संवेदनशून्यत्वं कियन्मनुष्यस्य हन्त जातमिह।
रुग्णं प्रति नहि काचित् सहानुभूतिर्दिनेष्वेषु।।

### (763) सङ्केतः

अवभासत एवार्थो वाग्देवी हंसवाहनेत्यत्र।
वाहन उलूक इह यल्लक्ष्म्याः कोऽप्येष सङ्केतः।।

### (764) हंसप्रकृतयः

क्व गता हंसप्रकृतय इतो जनाः सद्विवेकसम्पन्नाः।
स्थेयं ध्वांक्षप्रकृतिषु कियन्तमिह कालमस्माभिः।।

### (765) यौवनमदः

यौवनमदः करोति प्रायो यूनः सदध्वनो भ्रष्टान्।
कतिपय एव युवानः पदमपि तस्मान्न विचलन्ति।।

### (766) सेकः

शाखासु च पत्रेषु च सेकस्यास्तीह कोऽयमारम्भः।
मूले भवति हि सेको नूनं पोषाय वृक्षस्य।।

### (767) द्रढीयान्

सुदृढः स्वाध्यवसाये नानाबाधासु विद्यमानासु।
यः स्यात् स एव भुङ्क्ते फलं सुमधुरं स्वविजयाख्यम्।।

### (768) हर्षोल्लासः

सत्यपि चेतसि खिन्ने येषां हर्षो मुखे समुल्लसति।
जगति महात्मानस्तेऽथवा नटा नाट्यधर्माणः।।

**(769) विसङ्गतिः**

किं वा विधेर्विधानं किं वैषा शासनस्य दुर्नीतिः।
खादन्नन्यो म्रियते बुभुक्षयाऽन्यो जनो म्रियते।।

**(770) दुर्व्यवस्था**

अस्याः कः स्याद्धेतुश्चिन्त्या विद्वद्भिर्व्यवस्थेयम्।
नगराभिमुखाः प्रायो दृश्यन्ते ग्रामवास्तव्याः।।

**(771) व्यथा**

आत्मन एव व्यथया व्यथिताः स्मः साम्प्रतं न केवलया।
परमस्मान् व्यथयन्ति व्यथा इमा जागतिक्योऽपि।।

**(772) सुधियामनुभवः**

वीणाया वा नादं रसनाया नूपुरस्य वा क्वणितम्।
सुधियोऽनुभवन्ति समे सदा प्रसादात् सरस्वत्याः।।

**(773) युद्धम्**

अस्यास्त्यस्तित्वस्य प्रकृतिर्युद्धं प्रवर्तमानमिति।
युध्यस्वेति तथाहि श्रीभगवानाह गीतासु।।

**(774) सङ्गीतम्**

प्रीतिश्चेतसि मन्ये सङ्गीतात् काऽपि जायते सद्यः।
व्यथयति सङ्गीतमपि श्रुतिगोचरतां गतं सततम्।।

## (775) अर्धसत्यम्

इदमित्थमिति न शक्यं विषये सत्यस्य किञ्चिदभिधातुम्।
यत्किञ्चिदिहाभिहितं तत्प्रतिभात्यर्धसत्यमिति।।

## (776) लोकः

लोकोत्तरत्वमास्तां महानुभावस्य कश्चिदनुभावः।
अस्मन्मते तु लोको लोकाभ्यन्तर्गतो मान्यः।।

## (777) दण्डादण्डि

दण्डत्रयमिह केचिद् केचिद् गृह्णन्ति दण्डमेकमिह।
दण्डादण्डि न तेषु प्रवृत्तमित्येतदाश्चर्यम्।।

## (778) उद्यानम्

विहगैर्यत्र न कूजितमुड्डीयोड्डीय नागतं न गतम्।
नीडानि निर्मितानि न तत् तावत् कीदृगुद्यानम्।।

## (779) अभिनन्दनम्

उद्घाटिता गवाक्षास्त्वयि सम्प्राप्ते भवन्ति नगरस्य।
समकालमेव चलति त्वयि वर्षन्ति प्रसूनानि।।

## (780) अभावः

गोष्ठ्याः किमपि च्छिन्नं न जगन्नाथेन निर्गतेन ततः।
केचित् तस्याभावं शोचेयुर्नापि शोचेयुः।

**(781) नैराश्यम्**

सुहृदमिवाहं यदपि त्वामालिङ्ग्यायुरात्मनो व्यनयम्।
नैराश्य! तदपि गच्छ क्वचन त्यज मामकं पिण्डम्।।

**(782) मनुष्यत्वम्**

सत्स्वपि दोषेष्वस्मिन् किमपि मनुष्येऽस्ति यन्मनुष्यत्वम्।
तदभिलषन्त्युपलब्धुं मन्ये सुरलोकवास्तव्याः।।

**(783) स्वरसामान्यम्**

तव शब्दैर्मम शब्दा नैवापन्नाः कदाचिदेकत्वम्।
अनुभूतः श्रुतवद्भिस्तेषु समानः स्वरः कश्चित्।।

**(784) वंशीस्वरः**

वृन्दावनस्य सीमामुल्लङ्घ्याद्यापि भवति कर्णगतः।
वंशीस्वरस्त्वदीयः परिभ्रमन् भाति विश्वस्मिन्।।

**(785) धनुष्टङ्कारः**

तव धनुषष्टङ्कारो भूयः श्रूयेत किं स लोकेऽस्मिन्।
येन श्रुतमात्रेण प्राणा रजनीचरैस्त्यक्ताः।।

**(786) बहवो गन्तारः**

येन पथाऽगच्छस्त्वं नोद्वह गर्वं यदेक एषोऽहम्।
त्वत्तः पूर्वमगच्छन् जनाः सहस्राधिकास्तेन।।

**(787) ज्योतिः**

व्याप्नोति स्म ज्योतिस्समग्रमस्तित्वमेव यत् पूर्वम्।
उद्वेजकस्तदधुना तिष्ठति धूमः परिव्याप्य।।

**(788) देवस्य पश्य काव्यम्**

नवतामुपेयिवानिव कमपि चमत्कारमादधान इव।
देवस्य काव्यबन्धो न म्रियते नापि जीर्यति च।।

**(789) रसालः**

स्वादून्यपि गृह्णन्ति न फलानि केचिन्मम श्मशानभुवः।
किमिव विचिन्त्य विधातः! कृतवानसि मां रसालमिह।।

**(790) उद्यानम्**

हंसा उड्डीय गता गता मयूरा यतस्तथोड्डीय।
सन्त्युद्याने तस्मिन् सम्प्रति गृध्राश्च घूकाश्च।।

**(791) रावणः**

कामं दशाननेऽपि क्षीणः स्पर्शोऽस्तु मानवत्वस्य।
कथमपि तेन न शक्यं व्यपोहितुं तस्य रक्षस्त्वम्।।

**(792) समकालम्**

प्रातः शृणुत सुदूराद् ध्वनितं देवालयेषु घण्टानाम्।
'मस्जिद' शिखरेभ्यश्चाजान-नमाजध्वनिं शृणुत।।

**(793) स्वप्नदर्शी**

बाधा काचिदपीयं न मनुष्यं सर्वथैव रोद्धुमलम्।
अस्ति मनुष्यस्यैषा प्रकृतिर्यत् स्वप्नदर्शित्वम्।।

**(794) ग्रामवधूटी**

स्वेनाञ्चलेन सायं सन्ध्यादीपं गृहस्य रक्षन्ती।
प्रतिकक्षं प्रविशन्ती ग्रामवधूटी मनो हरति।।

**(795) शिष्यस्तेऽहं**

आधुनिका न वदन्ति स्वगुरुं शिष्यं कदाचिदुपसृत्य।
'त्वामहमिह प्रपन्नः शिष्यस्ते शाधि माञ्चेति।।

**(796) सुमनसः**

या भाजनं कदाचिन्न तिरस्कारस्य नाप्युपेक्षायाः।
न बिभर्त्यौचित्यमितः पदाहतिस्तासु सुमनःसु।।

**(797) प्रयाणवेला**

विहगद्वयमिव नीडे निलीयमानं प्रयाणवेलायाम्।
परिकल्प्य लोचनद्वयमिह तस्याः खिन्न एषोऽहम्।।

**(798) कामना**

आकाशान्तं यावत् कोऽपि गरुत्मानिव द्रुतं स्पृशतु।
निवसन् स्वनिर्मितेऽहं नीडे नितरां प्रसन्नोऽस्मि।।

**(799) प्रार्थना**

कुरु मां निरीहमेवं त्वामपि याचे क्वचिन्न येनाहम्।
श्रान्ताविमाविदानीं मम पाणी याचमानस्य।।

**(800) सङ्कीर्णा दृष्टिः**

सङ्कीर्णेवेदानीं दृष्टिस्तस्यां स नास्ति विस्तारः।
तत्तु स्वप्नः कश्चिद् वसुधैवैषा कुटुम्बमिति।।

**(801) मानसे ग्राहः**

हंसो विहरन्नासीद् यस्मिन्निव मानसे मनुष्यस्य।
तस्मिन् सम्प्रति कश्चिद् ग्राहः खलु गाहमान इव।।

**(802) वीणावादिनी**

झङ्कारः क्षणमात्रं श्रुतिगोचरतां गतं कुतश्चिदिव।
आघट्टनां नखाग्रैः काऽपि ददानेव वीणायाम्।।

**(803) सुधियः**

दुःखं सुधियः स्वीयं सहमानाः स्वेन जगति दृश्यन्ते।
विलपन्ति न शोचन्ति न, न च जनयन्ति प्रतीकारम्।।

**(804) नूतनवस्तुन उत्प्रेक्षा**

पूर्वकवीनां वचसां छाया मम दुर्लभा न वचनेषु।
शक्ता वयमुत्प्रेक्षितुमितः कथं नूतनं वस्तु।।

## (805) नग्नाः

नग्ना इत्युच्यन्ते न समर्था निर्गता निजावरणात्।
नग्ना स्मः केषाञ्चिद् दृश्यावरणावृताश्च वयम्।।

## (806) आध्यात्मिकं सुखम्

स्वार्थेष्वेव निमग्ना बहवो निजदु:खदु:खिताः सन्ति।
आध्यात्मिकं लभन्ते सुखमिव परमार्थसंल्लग्नाः।।

## (807) लोकः

लोकोत्तरं न साम्प्रतमपेक्षितं नाप्यलोकसामान्यम्।
लोकः स एष यस्मिन् मानवनारायणो वसति।।

## (808) भेदः

मुण्डे मुण्डे यद्यपि मतिभेदः सर्वतोऽपि जागर्ति।
हृत्सु न तथापि भेदः सद्भावस्नेहभरितेषु।।

## (809) अस्तित्वम्

देवा अपि यस्य कृते स्पृहयन्ति स्वर्गलोकवास्तव्याः।
पापस्य नैष कश्चित् परिणामोऽस्तित्वमस्माकम्।।

## (810) विडम्बना

दर्शं दर्शं यस्य स्मयमानं सौम्यमास्यमातिष्ठम्।
सोऽनलमिवोद्गिरद्भ्यामक्षिभ्यामस्ति मां पश्यन्।।

## (811) व्यथाकथा

नान्यं जनं स्वकीयां व्यथाकथामुत्सहे निवेदयितुम्।
निजहृद्गतैव सैषा जीर्णा स्यादित्यभिप्रेतम्।

## (812) द्वे भाषे

प्रणयस्य न भाषामिह साम्प्रतमवगन्तुमर्हतीह जनः।
हिंसाया द्वेषस्य प्रासङ्‌गिकतां गते भाषे।।

## (813) स्वनिश्चयः

उद्घातिनी प्रदत्ता मह्यं चलितुं त्वयाऽधुना भूमिः।
निजचरणयोः प्रघट्टैरेनां सुगमां करिष्यामि।।

## (814) मौनम्

वाग्व्यवहारा मन्ये शब्दैरेवेह न प्रवर्तन्ते।
मौनमपीह कदाचित् तेषामायाति साधनताम्।।

## (815) जाड्यम्

न सनातन्याऽस्माकं स्वपरम्परया क्वचिद् विरोधोऽस्ति।
यत्किञ्चिदत्र जाड्यं तेन तु वैमुख्यमस्माकम्।।

## (816) क्व धीरास्ते

विचलन्ति स्म न्याय्यात् पथो न ये पदमपि क्व धीरास्ते।
व्याप्तेनान्यायेन व्याकुल इह दृश्यते लोकः।।

**(817) प्राणसञ्चारः**

उद्यानानि सरांसि च दृश्यन्ते सर्वतोऽपि शुष्यन्ति।
प्राणिषु भविता विधिना केनेह स्नेहसञ्चारः।।

**(818) मानम्**

न पुराणस्येह वयं प्रशंसका निन्दका न नूत्नस्य।
गुणदोषावेव मतौ ग्राह्यत्याज्यत्वयोर्मानम्।।

**(819) मनुष्यत्वम्**

सर्वेष्वेव नु सुलभं यदा मनुष्यस्य यन्मनुष्यत्वम्।
दृष्टेःशुचिताया इह तदभावाद् दुर्लभं जातम्।।

**(820) कवित्वम्**

उपदेशस्त्वद्वदनात् सुबहोः कालादिह श्रुतोऽस्माभिः।
किमपि जगन्नाथ! निजं कवित्वमपि नः श्रुतिं गमय।।

**(821) रामचरितमानसम्**

स्वाध्यायस्तुलसीकृतरामचरितमानसस्य मन्येऽहम्।
स्वाध्यायः प्रत्येकं भारतवसतेर्जनस्येह।।

**(822) युद्धम्**

यदपि मनुष्यस्यास्य प्रकृतिर्युद्धं न सर्वथा जगति।
तदपि स विवशो योद्धुं भुवि जीवननाम्नि सङ्ग्रामे।।

**(823) ग्रन्थस्य समाप्तिकालः**

स्वास्तित्व-ग्रन्थस्य प्रायोऽध्यायाः समाप्तिमुपयान्ति।
सम्प्रति कोऽपि नवीनोऽध्यायः स्थानं कुतो लभताम्।।

**(824) हिंस्रत्वम्**

हिंस्रत्वमेव येषां धर्मस्तेऽपीह केचिदुपयुक्ताः।
ग्राहस्याप्युपयोगः कोऽप्युपयोगोऽपि गृध्रस्य।।

**(825) वनराजः**

हिंस्र इति न निन्द्यत्वं लभते सिंहः कुतोऽपि जगतीह।
तस्मिन्नेवाद्यापि प्रतिष्ठितं विपिनराजत्वम्।।

**(826) स्नेहः**

स्नेहो नट इव मन्ये नानारूपाणि जगति गृह्णाति।
भवति क्वचित् स माता क्वचित् प्रिया क्वचिदपत्यञ्च।।

**(827) रत्नम्**

भ्रष्टं क्वचित् पृथिव्यां मम पाणेः किमपि रत्नमासीस्त्वम्।
अद्यावधि भ्रमामि त्वामन्विष्यन्नहं जगति।।

**(828) उदाराः**

अनुदारेऽस्मिंल्लोके भ्रामं भ्रामं स्थितोऽस्म्यहं श्रान्तः।
इह वर्तन्त उदारा इति द्रढीयांश्च विश्वासः।।

## (829) अदृष्टपूर्वा आकृतिः

एकाऽऽकृतिः स्मृतौ मे प्रायः समुदेत्यदृष्टपूर्वेव।
प्रभवामि न निर्णेतुं त्वमेव सा वा त्वदन्येति।।

## (830) शिरोवेदना

स्वातन्त्र्यं बाधन्ते वृद्धा इति तेषु कश्चिदपवादः।
प्रायस्तरुणा वृद्धान् शिरसः पीडेति मन्यन्ते।।

## (831) चमत्काराः

जगतीह न जायन्ते पदे पदे वस्तुतश्चमत्काराः।
जायन्तां ते कामं सुकवीनामेव कवितासु।।

## (832) विश्वसनीयत्वम्

स्वार्थपरेऽस्मिंल्लोके स्वजनेष्वपि सत्पथाद् विचलितेषु।
विश्वसनीयत्वमहन्यहनि लघु क्षीयमाणमिव।।

## (833) स्नेहः

येषां हृत्सु स्नेहः स्वभावतः सततमुच्छलन्नासीत्।
उपलभ्यन्ते प्रायस्ते न दिनेष्वेषु कुत्रापि।।

## (834) गन्धः

गन्धाः समे सुमनसां भुवो गुणा एव नात्र सन्देहः।
आध्यात्मिकः स गन्धः शीलगुणो मानवस्य मतः।।

## (835) कृत्रिमम्

हसितं कृत्रिममस्य व्यवहारा अपि च कृत्रिमा अस्य।
कृत्रिममेवेदानीं मनुष्यमात्रस्य कृत्स्नमपि।।

## (836) युगस्य प्रभावः

प्रतिवेशिनोऽपि विषये चिन्तित इह नाभिलक्ष्यते कोऽपि।
कस्मिन् युगे विधातर्जीवामः किं त्वया विदितम्।।

## (837) आशिषः

श्रुतिसुखकराः किमासन् ता भवतामाशिषोऽस्मदुच्छिष्टाः।
अनुकूलं नाद्यावधि याभिः फलितं यदस्मासु।।

## (838) सान्त्वनम्

भ्रमराः प्राप्ते काले पुनरायास्यन्ति तिष्ठ निश्चिन्तः।
बन्धो रसाल! तेषामागमनञ्च प्रतीक्षस्व।।

## (839) उपस्थितिः

अन्तिकगतामपि त्वां नाहं पश्यामि साम्प्रतं दृग्भ्याम्।
किन्त्वनुभवामि सुरभिं त्वदुपस्थितिरन्तरन्तरिमाम्।।

## (840) नग्नत्वम्

मतिभेदे सति यद्यप्यश्लीलत्वं न शक्यमभिधातुम्।
न तथाप्यर्हति सद्भिर्नग्नत्वं किमपि मान्यत्वम्।।

## (841) कुज्झटिका

यद्यप्येषोऽवसरः क्षणमात्रं क्वापि नैव विश्रान्तेः।
कुज्झटिकाच्छन्ने पथि तथापि दिक्काऽवलम्ब्याऽत्र।।

## (842) अप्रमाणम्

गन्तव्यस्य न विषये स जगन्नाथः प्रमाणमिति सिद्धम्।
भ्रामं भ्रामं य इतो गन्तव्यादस्ति विच्छिन्नः।।

## (843) श्रीरामः

श्रीरामो येन गतस्तदेव वर्त्मावलम्बनीयं मे।
अतिरिच्य श्रीरामं गन्तव्यं भवितुमर्हति कः।।

## (844) वैराग्यम्

वैराग्यं सौभाग्यात् कस्यचिदुपजायते जगत्यस्मिन्।
नैकैरस्य विरक्तैः साधितमतिमात्रमेव हितम्।।

## (845) सहानुभूतिः

अद्यापि यत्र तत्र प्रबला निष्पीडयन्ति बलरहितान्।
केचिदितः प्रयतन्ते तेषां पीडां निराकर्तुम्।।

## (846) ऐक्यम्

प्रबला भवन्ति मिलिता बलेन रहिता अपीति तथ्यमिदम्।
स्फुटतां प्राप्तमिदानीं नान्यायः स्याच्चिरस्थायी।।

**(847) समुद्रः**

उत्तिष्ठति निपतति च प्रबलैर्भङ्गैरयं महानब्धिः।
स्वप्रियजनाद् वियोगः कृतेऽस्य समभूदसह्य इव।।

**(848) प्रबलः**

तावत् पीठासीनाः स्वं स्वं तिष्ठन्ति पीठमध्यास्य।
उत्तारयति न यावत् प्रबलस्तान् कश्चिदाकृष्य।।

**(849) सौन्दर्यम्**

सौन्दर्यस्याकलने द्रष्टॄणां दृष्टिभेद उल्लसति।
इदमित्थमिति न शक्ता वक्तुं सौन्दर्यशास्त्रज्ञाः।।

**(850) सामर्थ्यम्**

एभ्योऽवसरो देयो नभ उत्पतितुं स्वतः स्वतन्त्रतया।
पक्षत्योरेतेषां सम्प्रति सामर्थ्यमुत्पन्नम्।।

**(851) स्वातन्त्र्यम्**

स्वातन्त्र्यस्य ज्ञातुं स एव शक्नोति किमपि माहात्म्यम्।
कारागारनिगडितः सहते यो यातनां नित्यम्।।

**(852) खण्डितं स्वतन्त्रञ्च**

सौभाग्यं दौर्भाग्यं द्वयमपि तस्मिन् दिने समुत्पन्नम्।
खण्डितमपि स्वतन्त्रं समजनि यस्मिन् दिने राष्ट्रम्।।

**(853) विपन्नाः**

देशे सम्पन्नानां कियती संख्येति गणनयाऽलमिह।
वस्तुत एतच्चिन्त्यं सन्ति विपन्नाः कियन्त इति।।

**(854) लोकः**

सिंहासनाधिरूढं कुरुते लोको यमादरेण समम्।
दिन एकस्मिन् कुरुते विवशं तस्मात्तमवतरितुम्।।

**(855) अवसरः**

अवसररूपेण त्वं मदन्तिकं नैकधा समायातः।
नाशक्नुवं ग्रहीतुं त्वामिति दोषो ममैव न ते।।

**(856) सन्धिः**

देवालयस्य येषां न सहन्ते स्पर्शमर्चकाः स्म पुरा।
तैः सह देवाः सन्धिं प्रवर्तयन्ते दिनेष्वेषु।।

**(857) पण्डिता मूढाश्च**

प्रायो न पण्डितानां द्वेषोऽन्योन्यं समाप्तिमाप्नोति।
यस्मै द्रुह्यन्ति समं पिबन्ति तेनैव मधु मूढाः।।

**(858) धर्मग्रन्थाः**

धर्मग्रन्था द्वेषं जनयन्त्येते बहिर्दृशाऽधीताः।
अन्तर्दृशा तु पठिता प्रेमोपदिशन्ति तेऽन्योन्यम्।।

**(859) सामर्थ्यम्**

उदरं पूरयितुमितो बुभुक्षितस्यास्ति मे न सामर्थ्यम्।
इच्छामि किमपि कष्टं तस्याभिव्यक्तिमानेतुम्।।

**(860) चाकचिक्यम्**

प्रायः सम्प्रति बालाः सम्मुग्धाः सन्ति चाकचिक्येन।
कुर्यात् प्रवृत्तिरेषाऽन्धानिव तान् हन्त गर्तगतान्।।

**(861) तावद्द्वितीयं**

दुःखाकुरुते स्मास्मान् कापि पिपासैव पूर्वमतिमात्रम्।
सम्प्रत्यस्मानेषा प्रबाधमाना बुभुक्षाऽपि।।

**(862) दानोत्साहः**

क्षणमपि न जनः कश्चित् कस्मैचित् स्वं प्रदातुमुत्सहते।
जायाऽपि नेह पत्ये न पतिश्चाप्यत्र जायायै।।

**(863) दुःशीलः**

दुर्गन्ध एव वपुषस्तस्य प्रसरन् प्रतीयते सततम्।
अश्वत्थामेव जनो यो दुःशीलः क्वचिद् याति।।

**(864) प्रस्थानम्**

प्रस्थानं कृतवन्तः स्वं स्वं गन्तव्यमनु समे पूर्वे।
प्रस्थानस्यावसरः कदाचिदस्माकमप्यायात्।।

**(865) परिवर्तनम्**

परिवर्तनमिह कीदृङ् न मयूराः काननेषु लभ्यन्ते।
काका बलिमुपभोक्तुं नगरेष्वपि नोपतिष्ठन्ते।।

**(866) चाकचिक्यम्**

यद्यपि परितः स्वमहं मनोहरं चाकचिक्यमेवेक्षे।
न मनस्तथापि मामकमभिसर्तुं तावदुत्कण्ठम्।।

**(867) बोधिसत्त्वाः**

अतिशयकरुणार्द्रहृदो न बोधिसत्त्वाः कुतोऽपि लभ्यन्ते।
अर्हन्ति येऽनुभवितुं पीडामिह जीवमात्रस्य।।

**(868) क्रौर्यम्**

क्रूरोऽजन्येतावानद्य मनुष्यो मनुष्यविषय इह।
क्रौर्यस्यास्य परिणतिं जानन्नपि हन्त दुष्प्रसहाम्।।

**(869) अनुजाः**

दर्शं दर्शं विद्याविनयविरहितानहं निजाननुजान्।
लज्जितमात्मानमितः कृतापराधञ्च पश्यामि।।

**(870) उद्यानम्**

व्याघ्रा एव स्वगृहान्निर्मायोद्यान आसते यदि चेत्।
तस्मिन् विरचय्य खगाः कथन्नु निवसन्तु नीडानि।।

**(871) प्रस्थानावसरः**

गतमुड्डीयोड्डीय क्वापि मरालैः समैर्निजाद् देशात्।
सम्प्रति समे मयूरास्त्वरितं प्रस्थातुमिच्छन्ति।।

**(872) वैक्लव्यम्**

त्वत्प्रस्थानानन्तरमितस्ततः पर्यटन् महीमासम्।
जीर्णारण्य इवास्यां नान्वभवं स्थैर्यमेकत्र।।

**(873) उद्घोषः**

साधारण्यां मम दृशि साहित्यं नास्ति शान्तिसन्देशः।
उद्घोषः परमेतत् कस्यचिदिह पाञ्चजन्यस्य।।

**(874) वैवश्यम्**

यस्य स्पर्शो न मया पूर्वं सोढः कथञ्चिदप्यत्र।
लग्नश्छायेवाहं तेन समं सञ्चरन्नस्मि।।

**(875) चातुर्यम्**

रङ्गे प्रदर्शयेयुः कियदपि रामत्वमात्मसात्कृत्य।
स्फुटतामेति नटानां नान्यच्चातुर्यमतिरिच्य।।

**(876) स्तुतिगानम्**

स्तुतिगानेन परेषां कालक्षेपो मया कृतो यदपि।
तदपि निजोदरपूर्तेः साधनतां तन्न नीतमिह।।

**(877) विश्रामस्थानस्याभावः**

दूरादपि दूरतरं दृष्टिर्यावत् प्रयाति, पश्यामि।
तप्तं सैकतराशिं छायावृक्षस्य चाभावम्।।

**(878) यातयामाः**

व्यवहारेषु समन्ताल्लोके परिवर्तितेषु लोकस्य।
परिगण्यन्ते प्रायो मादृश इह यातयामेषु।।

**(879) भारः**

स्वशिरःस्थेन समेऽपि क्लिश्यन्तः सन्ति हन्त भारेण।
कः कुर्यादिह चिन्तां परस्य भारं लघूकर्तुम्।।

**(880) सुमनसः**

जगतीह कतिपयेभ्यो न सुमनसः सर्वथैव रोचेरन्।
एतावता किमुचितं तासामवताडनं चरणैः।।

**(881) न्याय्यः पन्थाः**

प्रतिरोधस्य न रूपं हिंसा ध्वंसोऽथवेह कीदृगपि।
प्रायो न्याय्यः पन्था नालम्ब्यत एषु दिवसेषु।।

**(882) मतिभेदाः**

आगत्येहास्माभिर्नैके विधयः श्रुता निषेधाश्च।
मतिभेदेषु यथावन्निर्देष्टुं नैव शक्यास्ते।।

**(883) सहाया:**

यान् मत्वेह सहायानध्वनि चलितं मया प्रसन्नेन।
तेऽग्रे गन्तुमनर्हा मध्येऽध्वन एव विच्छिन्ना:।।

**(884) सन्देश:**

चतसृभ्योऽपि न दिग्भ्य: साम्प्रतमायाति कोऽपि सन्देश:।
स्थानादुपरितनाद्वाऽधिगत: स्यात् कश्चिदिति मन्ये।।

**(885) तमांसि**

चिररात्राय प्रबलै: स्थितमातपमुल्लसन्तमधिकृत्य।
बलहीनेभ्योऽस्मभ्यं तमांसि विरसानि दत्तानि।।

**(886) नीडम्**

भ्रान्तं सुबहु भ्रान्तं सुबहु च मनसीदमिष्टमाधाय।
मामकमप्यस्यां भुवि नीडं स्यादेकमुद्याने।।

**(887) जीवनधारणम्**

जीवनधारणमस्यामपि भुवि भविताऽतिकठिनमिति सत्यम्।
अनुभूतं नहि पूर्वैर्न च विदितं किञ्चिदस्माभि:।।

**(888) निवृत्त:**

अयथार्थाऽपि मदीया तद्विषये वर्तते मति: सुदृढा।
दूरं गत: स्मृते मयि नूनं भविता निवृत्त इति।।

**(889) भारतीयत्वम्**

यद्यपि भिन्ना वर्णा भिन्ना धर्माश्च सम्प्रदायाश्च।
भिन्ने तथाप्यभिन्नं यत्किञ्चिद् भारतीयत्वम्।।

**(890) द्वेषः स्पृहा च**

एष न मार्गस्थ इति द्विषन्ति केचिद् भृशं जगन्नाथम्।
कर्षति नवं स वर्त्मेत्यपरे स्पृहयन्त्यमी तस्मै।।

**(891) गतानुगतिकत्वम्**

प्रायो गतानुगतिकाः परिगण्यन्तेऽत्र बुद्धिरहितेषु।
सुतरां महाजनानां गतानुगतिकत्वमिह शस्तम्।।

**(892) दृष्टिपरिवर्तनम्**

आसीत् पूर्वं दृष्टिः सुकवीनामुज्ज्वलेषु सौधेषु।
ग्रामटिकासु निपतति प्रायः सैतर्हि मलिनासु।।

**(893) विपन्नाः**

श्रीकलितेषु स्मितमिह सुखिनामास्येषु सन्ततं स्फुरतु।
दृश्यन्तां सुखलाभात् स्मयमाना दुःखिनोऽप्यत्र।।

**(894) स्वीयं मनः**

शुष्कं पर्णमिव त्वामुड्डयितुं यत्करोति विवशमिदम्।
दमितं न जगन्नाथ! त्वया मनः स्वीयमद्यापि।।

**(895) कृतघ्नः**

संस्कृतमाश्रित्येह त्वया जगन्नाथ! जीविका लब्धा।
सुरभारतीं त्यजंस्त्वं महत् कृतघ्नत्वमाचरसि।।

**(896) स्वातन्त्र्यम्**

खण्डितमभून्न भारतमजनि हृदयमेव खण्डितं नस्तत्।
नायादिह सार्थकतां मन्ये स्वातन्त्र्यशब्दोऽपि।।

**(897) काचित्**

आयास्यति गर्जन्ती बद्दलिकेवेह जातु वर्षन्ती।
आर्द्रीकरिष्यतीयं ग्रामटिकां लोचनैः सह नः।।

**(898) सन्देशहरः**

कालं कियन्तमेते प्रतीक्षामाणा वयं नु तिष्ठामः।
सुचिरात् सन्देशहरो न तव समायात एकोऽपि।।

**(899) मनोरञ्जनाभावः**

यस्यां किमपि कथायां हासस्य स्यात् कुतोऽपि न स्थानम्।
साऽस्य जगन्नाथस्य श्रोतव्या केन विधिना स्यात्।।

**(900) प्रसादस्य भाजनम्**

क्रीडिष्यसि त्वमस्मान् क्रीडनकीकृत्य रे कियत्कालम्।
किञ्चिद् विधेहि भाजनमस्मान् स्वस्य प्रसादस्य।।

**(901) वृद्धः**

नास्त्येषामुपयोगस्तिष्ठन्त्वेकत्र कोण एकस्मिन्।
एवमुपेक्षाविषया वृद्धाश्चिन्त्या दिनेष्वेषु।।

**(902) धर्मजडाः**

येषां भवन्ति विधयः पदे पदे पूर्णतो निषेधाश्च।
धर्मजडैस्तैः साकं समन्वयः स्यात् कुतोऽस्माकम्।

**(903) अश्वत्थामा**

अश्वत्थाम्नः कस्मै चिरजीवित्वं फलाय जगतीह।
दुष्कीर्तिर्दुगन्धो यस्यास्तित्वेन सम्पृक्तौ।।

**(904) पुश्पोद्यानम्**

आसीत् पुष्पोद्यानं विहारयोग्यं यदेतदस्माकम्।
कण्टकिभिस्तदिदानीं पदे पदे पादपैर्भरितम्।।

**(905) आननानि**

चेतांस्याकर्षन्ति स्मयमानान्याननानि मुग्धानाम्।
उद्वेजयन्ति दृष्टान्यतीव तान्येव कुटिलानाम्।।

**(906) हस्तः**

यदसम्भवं विधातुं तत्सम्भवमुद्यतो मनुष्यस्य।
जयति स विजयध्वज इव समुन्नतो दुर्दमो हस्तः।।

## (907) सहिष्णुत्वम्

वात्याऽऽन्दोलयति त्वां तुषारपातोऽसकृच्च पीडयति।
सहनक्षमत्वमेतद् वृक्ष! कथय शिक्षितं कस्मात्।।

## (908) हिंसा

श्रीरामकृष्णयोर्यदि बुद्धमहावीरयोश्च देशेऽस्मिन्।
हिंसाऽस्तित्वं बिभृयात् किमु तन्महते न खेदाय।।

## (909) याच्ञा

याचितुमिह यत्किञ्चित् पुरतः कस्यापि चेत् प्रवर्धेताम्।
क्षणमप्येतौ पाणी मंस्ये तस्मिन् दिने मरणम्।।

## (910) पिपासा

भूमिः पिपासितेयं पिपासितं हन्त चैतदाकाशम्।
विधिना केन पिपासे! शाम्यस्यस्माकमधरगता।।

## (911) पुत्राभावः

पुत्रीकृतेषु मन्ये मदुपवनस्यैव सत्सु वृक्षेषु।
पुत्राभावः सेत्स्यति कदाचिदपि मे न खेदाय।।

## (912) दशाननाः

मध्येऽपि धार्मिकाणामुपलभ्येरन् दशानना नैके।
कण्ठार्पितरुद्राक्षा ललाटलसितत्रिपुण्ड्राश्च।।

### (913) स्मितम्

हेतोरेकस्य तव स्मितस्य दिवसान् शतं मया रुदितम्।
कस्यचिदिदमपि पुरतः कथितं न त्वदतिरिक्तस्य।।

### (914) रम्याणि रूपाणि

मुग्धेनैव स्मितमिह न जगन्नाथ! त्वयाऽधिगतमेतत्।
छलयन्ति त्वादृशमिह रम्याण्येतानि रूपाणि।।

### (915) सङ्कल्पः

न समुल्लसितस्यैते प्रमाणमिह चेतसः समुल्लासाः।
दारिद्र्यस्य निवृत्त्यै सङ्कल्पो विस्मृतोऽस्माभिः।।

### (916) कविता

सुमनोराशिरिवेयं वर्षति कविता कदाचिदिह लोके।
मन्ये सैव कदाचिद् वर्षति शस्त्रास्त्ररूपेण।।

### (917) वक्तव्यम्

तेषामार्द्रार्द्राणामनिमेषाणाञ्च चक्षुषामासीत्।
यत्किञ्चिद् वक्तव्यं नापारयमेष तज्ज्ञातुम्।।

### (918) अनुदारं हृदयम्

उच्चैः पदं समधिका सम्पदपत्यादिसंभवं वेश्म।
सत्स्वेष्वनुदारे हृदि विफलं सर्वमप्येतत्।।

**(919) पक्षिणौ**

शाखाद्वये वसावो वृक्षस्यैकस्य पक्षिणावावाम्।
कश्चन भेदः सिद्ध्यत्यनेन न ह्यावयोर्मध्ये।।

**(920) भेदकः**

भ्रात्रोर्मध्ये भेदं जनयेत् समुपेत्य नाम यः कश्चित्।
त्याज्यः प्रियोऽपि दुष्टः स स्याद् यदि नाम धर्मोऽपि।।

**(921) आदर्शः**

भवतीह मान्य एको जनसम्मर्दस्य कश्चिदादर्शः।
नार्हति जनसम्मर्दः कस्यचिदादर्शतां गन्तुम्।।

**(922) अर्थः पुरुषार्थः**

संख्यायां चत्वारः परिगण्यन्ते पुरा स्म पुरुषार्थाः।
परमार्थतस्तु सम्प्रति केवलमर्थो हि पुरुषार्थः।।

**(923) लालाटिकः**

लालाटिका मदीया मामुपयान्ति स्म ये पुरा नित्यम्।
ताननुचरामि सम्प्रति तेषां लालाटिको भूत्वा।।

**(924) नटाः**

स्थास्यन्त्यादर्शत्वं गता नटा हन्त यावदित एते।
सेत्स्यति नहि कल्याणं कलौ युगेऽस्मिन् मनुष्यस्य।।

## (925) प्रणयस्य भाषा

अर्जितमतीव दाक्ष्यं त्वया जगन्नाथ! नैकभाषासु।
भाषा प्रणयस्य परं न शिक्षिता भाग्यहीनेन।।

## (926) शुद्धिः

श्रीमद्भागवतस्य श्रीमद्रामायणस्य वा पाठात्।
सत्यं वदामि, शुद्धिर्नाभून्मलिनस्य मन्मनसः।।

## (927) महाजनत्वम्

येन महत्त्वेन जनो महाजनत्वं जगत्यवाप्नोति।
मन्वानास्तदकिञ्चित्करमिति सम्प्रत्युपेक्षन्ते।।

## (928) चरणाङ्काः

कांश्चिद् यांश्चरणाङ्कान् पथि दर्शं दर्शमग्रतोऽगच्छम्।
मम दौर्भाग्याधिक्याददृश्यतां ते गताः सद्यः।।

## (929) अक्षुण्णं वर्त्म

क्षुण्णे वर्त्मनि चलिताश्चलन्ति बहवस्तथा चलिष्यन्ति।
अक्षुण्णे चल वर्त्मनि सामर्थ्यं चेत् त्वयि स्वस्मिन्।।

## (930) असहायः

श्रान्तौ चरणावस्तं गच्छति सूर्यस्तमांसि वर्धन्ते।
गन्तव्यञ्च दवीयः साम्प्रतमसहाय एषोऽहम्।।

**(931) हनूमान्**

नायाति श्रोतुमना रामकथासु प्रवर्तमानासु।
दिवसेष्वेषु हनूमान् मन्ये परिवृत्य रूपं स्वम्।।

**(932) बालः कृष्णः**

अवलोक्य सूरदासं पथि भ्रमन्तं स्वयष्टिमादाय।
उपतिष्ठिते न बालः कृष्णः साहाय्यदानाय।।

**(933) लोकसामान्यः**

शान्तो य एव दृश्यत उपर्युपरि जगति लोकसामान्यः।
उत्तिष्ठत्यस्यान्तः किमपि सहस्त्रं तरङ्गाणाम्।।

**(934) उद्यानम्**

न विभक्त आतपो नः, न विभक्ता चन्द्रिका न विहगाश्च।
केन विभाजितमेतत् सुन्दरमुद्यानमस्माकम्।।

**(935) अभिन्नौ**

तक्षशिला यद्युभयोर्यद्युभयोर्नानकस्य जन्ममही।
यद्युभयोरिह 'चिश्तीं' नाभिन्नौ स्वः कथन्तर्हि।।

**(936) दिल्ल्युद्यानम्**

भूयो ध्वस्तं वृक्षैर्लताप्रतानैर्विजृम्भितं भूयः।
उद्यानस्य हि भिन्नो दिल्ल्याख्यस्येतिहास इह।।

**(937) स्मृतिमारुहन्ति**

शालीनं सङ्गीतं शालीना गीतकाव्यबन्धाश्च।
स्मृतिमारुहन्ति मम ते गानसुनिपुणाः सुकवयश्च।।

**(938) जीवनप्रवर्तनम्**

अन्या दृगेव काचन दृष्टिर्लोकोत्तरा कलादृष्टिः।
इह जीवनप्रवर्तनमेका मन्ये कलासु कला।।

**(939) एकत्वम्**

येषां कृत्रिम एव व्यवहारः कृत्रिमञ्च सौहार्दम्।
स्वाभाविकमेकत्वं तैः सह शक्यं न साधयितुम्।।

**(940) क्षणाः**

गीतेषु नेह चित्तं रमते नापीह हन्त गीतासु।
स्मृतिमायान्ति त एव क्षणास्त्रियामासु नीतासु।।

**(941) क्रूरग्रहः**

अग्रे जीवनचक्रं सारयितुं ये शुभा ग्रहा मिलिताः।
क्रूरग्रहस्य तेषु क्रूरा दृष्टिर्निपतिताऽभूत्।।

**(942) अकिञ्चित्कराः**

अनपेक्षणीयमग्रे दर्शं दर्शं सदैव घटमानम्।
मौनिभिरेवास्माभिः स्थेयमकिञ्चित्करैर्नूनम्।।

**(943) कविता**

कविता शब्दसुमनसां स्रङ्मात्रं सर्वथा नहि ग्रथितम्।
चेतोहरस्तदीयः कश्चन कविता सुगन्धोऽपि।।

## (944) उपदेशकत्वम्

उपदेशकत्वमधुना प्रायो बिभ्रति त एव देशेऽस्मिन्।
चेतसि येषामन्यद् भवति च येषां वचस्यन्यद्।।

## (945) जगन्नाथः

यासि प्रयाग–नगरं याहि जगन्नाथमपि च मिलितासि।
सुबहोः कालाद् विषये तस्य नहि ज्ञातमस्माभिः।।

## (946) न निशि न च दिने

जाग्रति निशि कुमुदिन्यो दिने च कमलानि सन्ति विकसन्ति।
न निशि दिने न च सोऽहं जाग्रद् विकासश्च तिष्ठामि।।

## (947) मतिः

अनिवार्यं धर्मस्य स्वीकार्यत्वं न किञ्चिदप्युचितम्।
विषयेऽस्मिन् स्वाधीना प्रत्येकं मानवस्य मतिः।।

## (948) सुखाकरोति

त्वच्छ्रुतिगोचरतां गत एश मदीयो यदीह सन्देशः।
इत्येव साम्प्रतं मां सुखाकरोतीत्यहं जाने।।

## (949) चिन्ताभरः

स्वस्यैव चिन्तनीयं संवृत्तं यावदेतदस्तित्वम्।
कस्यान्यस्य जनोऽयं बिभृयाच्चिन्ताभरं तावत्।।

**(950) सत्पुरुषाः**

क्व गतास्ते सत्पुरुषा ये सुतरामार्तबन्धवोऽभूवन्।
अन्येषाञ्च हिताय स्वार्थत्यागश्च यैर्विहितः।।

**(951) महती हानिः**

आजन्मन आमृत्योर्भ्रान्तिष्वेव प्रवर्तमानासु।
महती हानिस्तद् यदि यापितमस्तित्वमेतत् स्यात्।।

**(952) हठवादः**

अस्माकमेव सम्प्रति कोऽप्यधिकारो न तावदन्येषाम्।
इति हठवादो मन्ये जगति दुःखं नु केषाञ्चित्।।

**(953) विधातुर्दृष्टिः**

येषामिह कुसुमानां निर्गन्धित्वं दुनोति नो चेतः।
प्रतिभाति तेषु दृष्टिर्विधातुरतिमात्रसङ्कीर्णा।।

**(954) उपदेशदानम्**

उपदेशदानरूपं किमपि परेभ्यो न कार्यमस्माकम्।
अस्मादध्यवसायाद् विरम जगन्नाथ! वच्मि त्वाम्।।

**(955) भारतम्**

आसीत् स कृतेऽस्माकं मिश्रितयोर्हर्षशोकयोः कालः।
भारतमभवद् यस्मिन् स्वतन्त्रमपि खण्डितञ्चापि।।

## (956) मेघदूतम्

प्रत्यासन्ने नभसि प्राप्तैः श्यामैर्नवाम्बुदैर्नभसि।
स्वयमुपगत्यात्मानं व्याचष्टे मेघदूतमिव।।

## (957) स्वोदरपूर्तिः

ऐदम्प्राथम्येन स्वोदरपूर्तिं समीहते जन्तुः।
आवश्यकताऽन्येषां लभते स्थानं द्वितीयमिह।।

## (958) व्योमकेशः

कस्यचिदागामिन इव महतः प्रलयस्य कोऽपि सङ्केतः।
केशा उद्गच्छन्ति व्योम्नीव व्योमकेशस्य।।

## (959) सौभ्रात्रम्

भ्रात्रोर्मध्ये सिध्येदन्योन्याशङ्कया विभाजितयोः।
यत्किञ्चित् सौभ्रात्रं तद्विषये किन्नु वक्तव्यम्।।

## (960) दीपः

भाव्यं बहिर्ज्वलद्भिर्दीपैर्व्याप्ते निरन्तरे तमसि।
भाव्यं ज्वलताऽप्यन्तः केनचिदेकेन दीपेन।।

## (961) शब्दाः

निक्षिप्तास्तव केचिच्छ्रुतिशष्कुल्योर्मयाऽधुना शब्दाः।
स्मृतिपथमागच्छेयुः क्षणे कदाचित् तवैकस्मिन्।।

**(962) हासा:**

यस्मिन् सद्मन्यासन् व्याकीर्णा यत्र तत्र तव हासा:।
नीरवतेव व्याप्ता तस्मिन् काचिद् घनीभूता।।

**(963) द्विधा**

प्राय: प्रत्येकं मे दिनमेवं हन्त यापितं भवति।
रोदितुमिच्छाम्यन्तर्हसितुं प्रयते तथापि बहि:।।

**(964) अद्भुतनिर्मिति:**

सुखमालिङ्गति विहसन् दु:खं य: स्वागतीकरोति रुदन्।
विध्यद्भुतनिर्मितये मनुष्यनाम्ने नमस्तस्मै।।

**(965) अवरोध: सङ्कोचाश्च**

अवरोधास्त्वां परित: सम्मन्यन्ते न तावदागन्तुम्।
मामपि चलितुं त्वाम्प्रति सम्मन्यन्ते न सङ्कोचा:।।

**(966) हस्ता:**

प्रस्तरखण्डा यैरिह हस्तै: सञ्चूर्य धूलिसान्नीता:।
तैरिह हस्तै: प्रस्तरखण्डा देवत्वमानीता:।।

**(967) कलभा:**

अस्मास्वेव द्वित्रा गजराजत्वं क्रमेण लप्स्यन्ते।
कलभा इति नोपेक्ष्या वयमेते जन्तुभिर्वन्यै:।।

**(968) गङ्गा**

मलिनेति त्वां गङ्गे! शोचन्नपि पापभाग् भवाम्येषः।
स्नातोऽपि त्वयि न परं स्वमनुभवामीह सुस्नातम्।।

**(969) चित्राणि**

चित्राण्याश्चर्यं ते काम'मजन्ता'गतानि जनयन्तु।
मम हृद्गुहागतानि तु सन्ति विचित्राणि चित्राणि।।

**(970) 'नभः पतन्त्यात्मसमं पतत्रिणः'**

जगतीह प्रयतस्व त्वमपि जगन्नाथ! दृष्टिमाधेहि।
सर्वे पतन्ति विहगा नभसि स्वस्वानुसारेण।।

**(971) कर्तव्यम्**

अस्मद्वचांसि यद्यपि न श्रवसोः प्राप्नुयुस्तवाभ्यर्णम्।
निजकर्तव्यधियेदं तथापि विनिवेदितं किञ्चित्।।

**(972) वात्या**

इत आयान्ती वात्या प्रतीयते नीडवासिनः! शृणुत।
उच्छेदो वृक्षाणामप्युद्यानस्य सम्भाव्यः।।

**(973) नटाः**

आप्ताः प्रमाणमासन् पूर्वं सर्वे यथार्थवक्तारः।
दिवसेष्वेषु नटा अपि गण्यन्तेऽस्माकमाप्तेषु।।

**(974) अप्रासाङ्गिक उल्लेखः**

सम्प्रति कथाप्रसङ्गो विविधानां वाजिनां प्रशस्तानाम्।
उपहसनीयो न स्यात् खरस्य किमु तावदुल्लेखः।।

**(975) अनिवार्यत्वम्**

तिष्ठति न कश्चिदस्मान् प्रतीक्षमाणः कुतोऽपि जगतीह।
एतेनेव ज्ञेयं कियदनिवार्यत्वमस्माकम्।।

**(976) स्वर्गः**

स्वर्गं भुवमानेतुं कृतप्रतिज्ञा गताः कति स्वर्गम्।
बहवोऽत्र सन्दिहानाः स्वर्गस्यास्तित्वविषयेऽपि।।

**(977) सिद्धः**

कालः स नातिदूरे यस्मिन् वित्तापहारका धूर्ताः।
भगवत्कथाप्रवचनैः 'सिद्धा' इति कीर्तिमाप्स्यन्ति।।

**(978) प्रसूनम्**

सुन्दरमपि प्रसूनं गन्धाभावाद् दुनोति नश्चेतः।
सालङ्कृत्यपि रहितं रसेन कस्यापि काव्यमिव।।

**(979) प्रतीक्षा**

कालं कियन्तमेषा प्रस्तरखण्डीकृता मुनेः शापात्।
यान्तमनेन पथा त्वां प्रतीक्षतां घोरकान्तारे।।

## (980) शरीरम्

आद्यमुपादेयमिदं शरीरमित्यत्र नास्ति सन्देहः।
इह नैतदेव मन्ये सर्वैः सर्वस्वमिति मान्यम्।।

## (981) सङ्गीतम्

सङ्गीतं श्रुतिगोचरमाकर्षति मामितो न सन्देहः।
उद्वेजयति निरन्तरमसकृच्छ्रुतमेतदतिमात्रम्।।

## (982) कविता

वागर्थयोः प्रवाहः कुतोऽपि जागर्ति नाम हृद्देशे।
तस्योच्छलन्ति मन्ये पृषन्ति कवितापदं दधति।।

## (983) उत्सवः

कोऽयं हर्षोल्लासो नाटकमथवाऽन्यदेव यत्किञ्चित्।
अन्तरभावग्रस्तैरुत्सव आयोज्यते कैश्चित्।।

## (984) भारतीयत्वम्

अन्यादृशीति मन्ये वसुन्धरां भारतस्य विश्वस्मिन्।
यन्मृत्कणेषु सुरभि व्याप्तं शुचि भारतीयत्वम्।।

## (985) याथार्थ्यज्ञः

याथार्थ्यज्ञो यद्यपि न प्रतिभात्यस्य कोऽपि लोकस्य।
लोकोत्तरस्य बहवो याथार्थ्यज्ञास्तथापीह।।

**(986) किञ्चिज्ज्ञाः**

ऋषिभिर्यावज्ज्ञातं तावदभिहितं न किञ्चिदप्यन्यत्।
सर्वज्ञत्वं स्वस्य प्रकटीकुर्वन्ति किञ्चिज्ज्ञाः।।

**(987) राष्ट्रस्य यशः**

भाग्यं युष्मास्वर्पितमस्माभिः सम्प्रतीह राष्ट्रस्य।
युष्माभिस्तत् कार्यं प्रसृतं स्यादस्य येन यशः।।

**(988) वृद्धः**

नास्माकं वृद्धानां तिष्ठति वचने युवाऽथवा बालः।
लोकस्य दर्शनार्थं वयं गृहस्वामिनस्तदपि।।

**(989) विडम्बना**

आसीत् परिहर्तव्यो यस्य स्पर्शस्त्वयाऽतिमात्रमिह।
प्रतिभासि त्वमकस्मात् तमनु जगन्नाथ! गन्तुमनाः।।

**(990) कलिका**

कलिका पुष्पीभूता पुष्पं तन्म्लानतां गतं काले।
भुवि पतितं धूलिरभूत् ततश्च सा निर्गता कलिका।।

**(991) नम्रः**

उदयन्तं त्वामन्तर्दावाग्नौ भस्मसात् करिष्यामि।
मूलत उच्छेत्स्यामि त्वं यदि भवितासि नो नम्रः।।

**(992) कविता**

हृत्सु कवीनामेव स्फुटतां कविता न केवलं याति।
श्रोतुं शक्यत इह सा लघुवयसां कूजितेष्वपि सा।।

**(993) प्रेमदीपः**

दिग्भ्यश्चतसृभ्योऽपि प्रवहति वात्या सदा दिनेष्वेषु।
नहि शक्यो ज्वालयितुं प्रेमाख्यो दीप एतस्याम्।।

**(994) तूलिका**

प्रत्येकमेव रूपे यस्य कलोन्मीलतीव निरुपाख्या।
तस्य कलाकारस्य प्रवर्तितां तूलिकां वन्दे।।

**(995) पाञ्चजन्यम्**

ध्वनितं किमपि यदासीद् भवतः शङ्खस्य पाञ्चजन्यस्य।
गीतासु तस्य शृणुमो वयमद्यापि प्रतिध्वनितम्।।

**(996) विभूतयः**

अद्यापि ता विभूतय उत्पद्यन्ते कथं न राष्ट्रेऽस्मिन्।
जनसामान्यस्यास्य श्रद्धाया आस्पदं या स्युः।।

**(997) समस्याः**

साक्षादिमे समस्या न समस्यानामिमे समाधानम्।
इति वयमवगच्छामस्ताननु तदपीह गच्छामः।।

**(998) तापसत्वम्**

न जटाभिः साधयितुं शक्यं कस्यापि तापसत्वमिह।
भुवि तापसा भ्रमन्तस्तथाविधा एव दृश्यन्ते।।

**(999) धर्मः सम्प्रदायश्च**

कुरुते यदिह मनुष्यं पृथङ्मनुष्यादुपेत्य भित्तिरिव।
प्रायस्तत् स्याद् धर्मः कोऽप्यथवा सम्प्रदायश्च।।

**(1000) मातृत्वम्**

मन्दं मन्दं स्नेहान्मद्गृहकस्यास्य कोण एकस्मिन्।
प्रतिभाति कोऽपि मूकं मातृत्वं प्रज्वलन् दीपः।।

**(1001) मातृत्वम्**

साधु घनीभूतं सद् यस्मिन्नाभाति सुरभि वात्सल्यम्।
स्निग्धं सत् प्रस्रवदपि मृदु कुसुमादपि च मातृत्वम्।।

**(1002) चक्रस्य रेखा**

आशैशवात् पदातिः परिभ्रमन्नासमेवमेकाकी।
विधिनाऽर्पिता चरणयोः कुलालचक्रस्य रेखेव।।

**(1003) बाणत्वम्**

न मया त्वदित्वरत्वं समर्थ्यते बाण! तदपि जानेऽहम्।
इदमेवासीन्मूलं तव बाणत्वस्य निर्माणे।।

**(1004) अश्रान्तः**

जातावपि मम नास्तां पक्षावेतौ तथापि मनसाऽहम्।
उड्डयमानो गगने श्रान्तोऽप्यश्रान्त एवासम्।।

**(1005) राहुलसाङ्कृत्यायनः**

'राहुलसाङ्कृत्यायन'मपश्यमहमित्वरं स्वनेत्राभ्याम्।
आसीन्मतिर्गरुत्मानेष मनुष्येषु कश्चिदिति।।

**(1006) आदिकविः**

गोस्वामिवर्य! सत्यं पूर्वस्मिन् जन्मनि त्वमादिकविः।
अपि हनुमन्निर्देशात् त्वयेह रामायणं लिखितम्।।

**(1007) स्वरसङ्गतिः**

कथय जगन्नाथ! त्वं प्रवर्तसे जगति केन विधिनेह।
केनाप्यन्येन तव स्वरस्य नहि सङ्गतिर्दृष्टा।।

**(1008) आकृतिः**

आश्रित्यैनां मानव कियन्तमुद्वहसि साम्प्रतं गर्वम्।
कालं कियन्तमाकृतिरेषा भवितेह तदवस्था।।

**(1009) एकतो योगः**

कुसुमानि क्व मृदूनि क्व कण्टकाः कष्टदायिनोऽन्येषाम्।
कृतवांस्त्वमसि विधातः कथमुभयोरेकतो योगः।।

**(1010) उचितो निवासः**

हृन्मन्दिराणि मन्ये श्रीरामस्योचितो निवास इति।
देवालयेषु केवलमिह स नहि स्थापनीय इति।।

**(1011) दवीयस्त्वम्**

मनसि नकारो येषां स्वीकारो भवति चेह जिह्वायाम्।
सामीप्यात् खलु तेषां किमपि दवीयस्त्वमेव वरम्।।

**(1012) क्रूरग्रहस्य दृष्टिः**

क्रूरग्रहस्य दृष्टिः पतितोद्यानस्य हन्त सुमनःसु।
म्लाना भवन्ति सद्यो निपतन्ति च याः स्वशाखाभ्यः।।

**(1013) कोलाहलः**

कोलाहलेन मन्ये कदापि कार्याणि नैव सिध्यन्ति।
कोलाहलप्रकृतयो बहवो जाता दिनेष्वेषु।।

**(1014) न्याय्यः पन्थाः**

न्याय्यान् पथोऽवलम्ब्य प्रवृत्तमिह यैर्न, नैव ते धीराः।
जनसामान्यैरधुना प्रवर्तितव्यं कमनुसृत्य।।

**(1015) विडम्बना**

परिवर्तितेह पूर्वं न जगन्नाथ! त्वया निजा प्रकृतिः।
परिवर्तनमानेतुं लोकप्रकृतौ त्वमुत्सहसे।।

## (1016) विडम्बना

परिसरमपि नगरस्य स्वस्य पदातिर्न शक्नुषे गन्तुम्।
भुवमेनामसि पद्भ्यां तदपि जगन्नाथ! मातुमनाः।।

## (1017) लघुकथा 1

लघ्वी कथा कदाचित् रमयेदेषा मनांसि युष्माकम्।
मध्ये मध्ये कुर्यात् कदाचिदार्द्राणि चेतांसि।।

## (1018) लघुकथा 2

रमयति यद्यपि चेतः कथा जगन्नाथ! तावकी लघ्वी।
प्रायस्तथापि कुरुते चक्षूंष्यार्द्राणि नः पठताम्।।

## (1019) युद्धम्

न समाधानं युद्धं यद्यपि कस्याश्चिदिह समस्यायाः।
कथमिव तथापि मनुजाः प्रवर्तयन्तीह युद्धानि।।

## (1020) लघुता

मन्ये नासि गरीयान् गुरुतां नाल्पीयसीञ्च भजसि त्वम्।
तव लघुताऽप्यस्माकं मनो जगन्नाथ! बध्नाति।।

## (1021) कश्मीरभूमिः

केसरकुङ्कुमभूमिर्यद्यपि दृग्गोचरीकृता मयका।
न कृताऽऽत्मसात् तथापि च्छटा तदीया न तद्गन्धः।।

**(1022) गन्तव्यम्**

गन्तव्यं निर्धार्यं त्वया जगन्नाथ! नैव चलितमिह।
गन्तव्यमेव मन्ये सुचिरादन्विष्यदासीत् त्वाम्।।

**(1023) नटाः**

नट-धर्मस्य कदाचिन्निर्वाहः सर्वथैव कठिन इह।
चारित्र्यं तु नटानां लोकः शङ्कास्पदं मनुते।।

**(1024) परिवर्तनम्**

यां दृष्टवान् कदाचिल्लतामहं पुष्पितां प्ररोहन्तीम्।
तामेवाद्य प्रेक्षे भुवि पतितां छिन्न-विच्छिन्नाम्।।

**(1025) मनुष्यः**

न जगन्नाथो विद्वान् न जगन्नाथः कविर्न धीरश्च।
सत्यं, किन्तु स कश्चिन्मनुष्य इत्यत्र सन्देहः।।

**(1026) रागद्वेषौ**

रागद्वेषाभ्यामिह भरिते लोके श्रुतो जगन्नाथः।
रागस्यास्ति न योग्यो नापि द्वेषस्य योग्य इति।।

**(1027) प्रतिच्छाया**

मूर्तिकृतः प्रयतन्ते दृषत्सु देवस्वरूपमाधातुम्।
अपि मानवस्य दृषदि प्रतितिष्ठेद् वा प्रतिच्छाया।।

## (1028) कविता

वागर्थपक्षतिभ्यां कविताऽहं तावदुड्डये मुक्ता।
छन्द:पञ्जरकेऽस्मिन् कवे! कथं मां निबध्नासि।।

## (1029) संस्कार:

अस्माभि: स्वातन्त्र्यं दशकेभ्य: पूर्वमेव सम्प्राप्तम्।
नाद्यावध्युपशाम्यति शृङ्खलबन्धस्य संस्कार:।।

## (1030) जटायु:

सीतामादाय बलाद् दशाननोऽद्यापि धावति क्रूर:।
कोऽपि जटायुस्तस्या क्रन्दितमाकर्ण्य नायाति।।

## (1031) अस्तित्वम्

दु:खस्याभूद् यद् यत् साधनमासीत् सुखस्य तत्तदिह।
सुखदु:खयोर्विचारे यापितमस्माभिरस्तित्वम्।।

## (1032) विकासात् पूर्वम्

कलिकाश्च्युता: कियत्य: स्वविकासात् पूर्वमेव शाखाभ्य:।
तासां दौर्भाग्यं वा दोषो दीयेत वात्यायै।

## (1033) अस्त्र-सस्यानि

बाष्पीभूत इदानीं वर्षितुमारब्ध एष रुधिराब्धि:।
उत्पस्यन्ते क्षेत्रेष्वस्त्राण्येवैषु सस्यानि।।

**(1034) उद्यानानि**

शस्त्रास्त्राणां साम्प्रतमुद्यानान्येव सन्ति विकसन्ति।
पुष्पोद्यानान्यधुना स्मृतिशेषाण्येव भवितारः।।

**(1035) लोकगीतानि**

चयनमकार्षं लोके परिभ्रमंल्लोकगीतपुष्पाणाम्।
सुचिरस्थायीनि तथा भवन्ति यानीह सुरभीणि।।

**(1036) सुगन्धः**

बोधगयायामथवा काश्या निकटेऽथ सारनाथे वा।
अनुभूयेत सुगन्धः स कदाचिद् यः पुरा प्रसृतः।।

**(1037) दिल्ली**

दिल्ल्या दत्ता मह्यं यदा कदा नैक एव सम्मानाः।
क्वचन तथापि न दत्तं स्वस्मिन् मह्यं निवासाय।।

**(1038) हृदयपरिवर्तनम्**

त्वदुपवनादिह यस्त्वामुज्जासयितुं प्रसह्य यतमानः।
द्वित्राण्यहानि दद्यात् स स्वगृहं ते निवासाय।।

**(1039) मिलितौ**

दृष्टिर्याति सुदूरं यत्राकाशं धरेत्युभौ मिलतः।
अप्यावामपि कुत्रचिदेकत्रागत्य मिलितौ स्वः।।

## (1040) स्वानुभवः

प्रायोऽनुभवाम्येतन्मम साम्प्रतमस्ति नोपयोग इति।
कस्यचिदुपकृतये स्याद् यापितमेतत् कदाचिदिति।।

## (1041) स्पर्शः

मृन्मयमप्यस्तित्वं हिरण्मयत्वं तदाप्नुयादेतत्।
उपलभ्येत क्षणमपि स तावकीनो यदि स्पर्शः।।

## (1042) उद्यानम्

नय मां न तदुद्यानं यस्मिन् विकसत्सु सत्प्रसूनेषु।
सौन्दर्यं स्याद् बाढं न सुगन्धः स्यात् परं किञ्चित्।।

## (1043) कालिदासः

श्रीकालिदासमीक्षितुमहं यदा तीव्रमाकुलोऽभूवम्।
श्रुतवांस्तदा स्वकर्णे मत्साहित्यादभिन्नोऽहम्।।

## (1044) आदर्शः

आदर्शस्य महत्त्वं मन्यन्ते पूर्वजाः स्म सर्वेऽपि।
उपहास्यतां नयन्ति प्रायस्तांस्तावदाधुनिकाः।।

## (1045) लक्ष्मीः

अन्यायात् सम्प्राप्तां निवारयन्ति स्म पूर्वजा लक्ष्मीम्।
स्वीकुर्वन्त्याधुनिका यथा कथञ्चित्तु तां प्राप्ताम्।।

**(1046) कविता**

कवितेत्येव भवद्भिर्ग्राह्यानीमानि नेह सूक्तानि।
कविता कदाचिदेव स्पृशति गिरं वा न वा स्पृशति।।

**(1047) आर्या**

स्पृहयत्यार्या तुभ्यं स्पृहयस्यथवा त्वमेवमार्यायै।
कथय जगन्नाथ! कदा तवैष योगस्तया घटितः।।

**(1048) अक्षुण्णः पन्थाः**

सारल्यमनुभवन्ति क्षुण्णे पथि सर्व एव गच्छन्तः।
स्वीकुर्वन्त्यक्षुण्णं द्वित्रा एव स्वयं गन्तुम्।।

**(1049) कौटिल्यम्**

नाकस्मात् संवृत्ता एते त्वय्यार्द्रचेतसो मन्ये।
भवितव्यमेव किञ्चित् कौटिल्येनात्र गूढेन।।

**(1050) अवगुण्ठनम्**

केनापि लक्ष्मणेन स्त्रियमभितो निर्मितेह रेखेव।
अवगुण्ठनमिति कश्चित् स्त्रीत्वस्याद्यापि पर्यायः।।

**(1051) मयूरः**

पक्षतिविस्तारदृशा भवति मयूरी न तावदुत्कृष्टा।
उत्पद्यते मयूरस्तत एवोद्यानशृङ्गारः।।

### (1052) नटाः

दृग्गोचरीभवेयुर्नटाः प्रतिष्ठां यतोऽपि लभमानाः।
मौनं ततोऽवलम्ब्य स्थातव्यं वाऽऽशु गन्तव्यम्।।

### (1053) आलोकः

आलोकस्य कणोऽपि त्वदवाप्येत क्वचित् तमस्यस्मिन्।
अयमस्तित्वतुषारो विना विलम्बं विलीयेत।।

### (1054) गृध्राः

गृध्रा एवेदानीमुद्यानस्य द्रुमेषु कृतनीडाः।
लघवो विहगा गत्वा कुतः स्वनीडानि रचयेयुः।।

### (1055) जलक्रीडा

भारतमहासरोवरमेषु ग्राहैर्दिनेषु सम्भरितम्।
सलिलक्रीडा साम्प्रतमस्मिन्नसुरक्षितेत्याहुः।।

### (1056) पाञ्चजन्यम्

प्रत्येकमणुषु यस्याश्रूयत लोकेन सत्प्रतिध्वनितम्।
अपि पाञ्चजन्यमधुना मूकीभूतं दिनेष्वेषु।।

### (1057) नारी

वर्षाणां निष्पीडितमिदं शतेभ्यः कदाचिदिह नारि!
विस्फोटं यदि कुर्यान्मूकीभूतं त्वदस्तित्वम्।।

**(1058) आशाभ्रंशः**

स्वदिनानि नेतुमैच्छं येनामृत्योः समं चरन् जगति।
एकस्मिन् विश्रामस्थानेऽगच्छद् विहाय स माम्।।

**(1059) धर्मबीजम्**

धर्मस्य बीजमुप्तं जनयति चेतोभुवि प्रसूनानि।
उत्पादयति क्वचिदपि स कण्टकान्नेति जानीमः।।

**(1060) इष्टः**

इष्टो न यद्यपीतो मम नु कदाचित् कुतश्चिदपि स त्वम्।
सुपरिचितावन्योन्यं सुबहोः कालात् तथाप्यावाम्।।

**(1061) वाग्देवता**

अस्मास्वनुकम्पेत क्षणमपि वाग्देवता कदाचित् सा।
वीणाया झङ्कृतिभिर्भरितं स्यादस्मदस्तित्वम्।।

**(1062) कृष्णसर्पः**

अध्यास्ते प्रत्येकं हृद्देशं कोऽपि कृष्णसर्प इव।
अन्यस्मादिह सर्वो दंशं खलु शङ्कमान इह।।

**(1063) सुगन्धः**

बिभ्रति हन्त सुगन्धं न सुमनसस्तावकस्य देहस्य।
यद्यपि सुगन्धवत्यस्त्वत्स्पर्शात् ताः प्रतीयन्ते।।

**(1064) लोकस्य स्पर्शः**

साऽलौकिकत्वमेति स्पृशति कलां यामिह क्वचिल्लोकः।
वाद्यं नृत्यं चित्रं कामं सा काचिदप्यस्तु।।

**(1065) स्मितानि**

आरोपितानि यानि स्मितानि केषाञ्चिदाननेष्वधुना।
केषाञ्चित्तान्येव तु कुसुमानीव प्रविकसन्ति।।

**(1066) नेपथ्यान्तः**

अयथार्थस्यास्य स्यान्नेपथ्यान्तर्यथार्थ एवेति।
विमृशन् प्रवेष्टुमैच्छं दृष्टस्यान्तः कथञ्चिदपि।।

**(1067) युवानः**

अप्राप्तजीविकानां भ्रमतां रथ्यास्वितस्ततो यूनाम्।
दुःखाकरोति चेतो मुखमालिन्यं दिनेष्वेषु।।

**(1068) दारिद्र्यम्**

स्वातन्त्र्यस्यानेकां गणयन्त्युपलब्धिमद्य 'नेतारः'।
परमद्यापि व्याप्तं दुःखं दारिद्र्यजन्यमितः।।

**(1069) लोकस्य याथार्थ्यम्**

लोकस्यास्य न किञ्चिद् याथार्थ्यं हन्त विदितवानस्मि।
नाहं करोमि चर्चां किमप्यदृश्यस्य लोकस्य।।

**(1070) वैदुष्यं कवित्वञ्च**

तव वैदुष्यं केचिन्न जगन्नाथ! क्वचित् प्रशंसन्ति।
अवलम्बन्ते मौनं कवित्वविषयेऽत्र को हेतुः।।

**(1071) पक्षिण्यः**

पक्षिण इव पक्षिण्यो नभ उत्पतितुं कथं न शक्ताः स्युः।
सम्मन्येरन् यदि ताः पञ्जरबन्धाद् विनिर्गन्तुम्।।

**(1072) क्षणः**

अप्यवतरिष्यति क्षण इतः कदाचित् स मामकेऽस्तित्वे।
भविता येन समन्तादेतच्चान्तञ्च सानन्दम्।।

**(1073) पूतना**

धर्मस्य गेहमधुना हिंसाख्या पूतना प्रविष्टेव।
पयसः स्थाने सम्प्रति पाययमानेह गरलमसौ।।

**(1074) करावलम्बः**

अस्मांस्त्वमुद्धरिष्यत्यसत्यनाम्ना कदा महागर्तात्।
नित्यं प्रतीक्ष्यमाणः करावलम्बस्तवास्माभिः।।

**(1075) उद्धारः**

न जगन्नाथस्यैवोद्धारस्यायं कथाप्रसङ्ग इह।
सन्त्यन्येऽप्युद्धारं प्रतीक्षमाणा जगन्नाथाः।।

## (1076) वसुधा

वसुधैवासीदेषा कुटुम्बकं वस्तुतः श्रुताऽस्माकम्।
स्वपरेति भेदभिन्ना न वासयोग्याऽधुना भाति।।

## (1077) छन्दः

कविता काऽपि चमत्कृतिमाधत्ते छन्दआवृतौ नूनम्।
अङ्गीकरोति काचित् परन्तु न च्छन्दआवरणम्।।

## (1078) बुभुक्षा

आसीर्बुभुक्षितो वा स्वजीवने किन्नु कालिदास! त्वम्।
नेह बुभुक्षाजन्यं कष्टं मन्ये त्वया सोढम्।।

## (1079) मूको बधिरोऽन्धश्च

सत्यामपि वाक्शक्तौ मूको बधिरो भृशं श्रवःशक्तौ।
सत्यां तथा च दृष्टेः शक्तावन्धे बुभूषामि।।

## (1080) परिवर्तनम्

विगतानां दिवसानां साहित्यं विषय एव संवृत्तम्।
य उदरपूर्तेः साधनमवलम्बन्ते तमेव जनाः।।

## (1081) धावनम्

धावनमपेक्षणीयं सुदूरमुपलक्ष्य किमपि गन्तव्यम्
कस्मिंश्चिदपि न गर्ते विनिपातः स्यादिति ध्येयम्।।

**(1082) संवादाः**

प्रायोऽविमृश्यकारिषु झटिति विवादा जनेषु जायन्ते।
संवादास्तु प्रायो विमर्शशीलेषु सिध्यन्ति।।

**(1083) तमसां निवारणम्**

सामग्र्येण निवारणमादित्येनैव सम्भवं तमसाम्।
विनिवारयन्ति दीपा यथाबलं तानि यत्किञ्चित्।।

**(1084) मूढः**

स्वीयां समर्प्य नावं परस्य हस्ते यदेष निश्चिन्तः।
स्वं मनुषे तन्मन्ये त्वमिह जगन्नाथ! मूढोऽसि।।

**(1085) असहिष्णवः**

असता त्वया न हानिः सताऽपि लाभश्च नेह कस्यापि।
तदपि जगन्नाथ! त्वां द्विषन्ति नैकेऽक्षमाः सोढुम्।।

**(1086) स्वतन्त्राः**

सत्स्वपि नियमेष्वस्मिन् स्वातन्त्र्ये बाधकेषु नैकेषु।
स्वविचाराभिव्यक्तौ सर्वोऽप्यस्ति स्वतन्त्र इह।।

**(1087) व्याधः**

उद्यानस्य न वार्ताः सुबहोः कालान्मयोपलभ्यन्ते।
श्रूयत एषु दिनेषु व्याधाः प्रविविक्षवः केचित्।।

**(1088) ग्रन्थाः**

नोत्कण्ठमान इह यानध्येतुं पाठको यदेकोऽपि।
केन जगन्नाथ! तव ग्रन्थास्ते सन्तु संग्राह्याः।।

**(1089) उपहसनीयाः**

नैकेऽत्र यातयामा आधुनिकेषु प्रवेशमिच्छन्तः।
गोष्ठ्यामुपस्थितानां लभन्त उपहास्यतामधुना।।

**(1090) अस्तित्वम्**

यद्यप्यजातशत्रु क्षुद्रमकिञ्चित्करञ्च तेऽस्तित्वम्।
कथय जगन्नाथ! कथं तथापि बहवो द्विषन्ति त्वाम्।।

**(1091) धर्मः**

धर्मो मयि यः कश्चिद् जागर्ति प्रस्तरस्य खण्ड इव।
द्रुतमेव द्रुतिमीयात् प्रभो! हिमस्यैष खण्ड इव।।

**(1092) शब्दाः**

प्रस्तरखण्डा इव ते शब्दाः प्रतिभान्ति केऽपि निपतन्तः।
केऽपि जगन्नाथ! पुरो वर्षन्तीव प्रसूनानि।।

**(1093) आदर्शाः**

शाकुन्तले कुमारे रघुवंशे मृदुनि मेघदूते वा।
आदर्शेष्वेषु त्वां द्रक्ष्यामः कालिदास! कुतः।।

**(1094) उत्साहः**

श्रान्तस्य मेऽस्ति चलितुं पदमपि पदयोर्न हन्त सामर्थ्यम्।
ह्वयसे त्वमिति स्वस्मिन्ननुभूयत एष उत्साहः।।

**(1095) प्राज्ञाः**

प्रतितिष्ठन्ति प्राज्ञम्मन्या नैकेऽधिराजधानि यदा।
न तदा दूरस्थानां प्राज्ञानामादरस्तत्र।।

**(1096) राजहंसाः**

गृध्राः काकाश्च यतः सम्मन्यन्ते प्रशस्तिपात्रमिति।
तिष्ठन्तु राजहंसाः कथय कियन्तं ततः कालम्।।

**(1097) वात्या**

स्वेषु स्वेषु कुलायेष्वासत एते पतत्रिणः सुखिनः।
जानत एते न परं वात्यामुद्यानमायान्तीम्।।

**(1098) काव्यज्ञाः**

स्वस्य स्वस्य ख्यापन एवैते सन्ति हन्त सँल्लग्नाः।
कविताभूः शुष्यन्तीति न काव्यज्ञा विदन्तीमे।।

**(1099) पन्थानः**

आसंस्तेऽपि कठोराः पदे पदे कण्टकैश्च सम्भरिताः।
पन्थानो येषु मया बाल्यादारभ्य सञ्चलितम्।।

**(1100) अपराधः**

अक्षम्यानपराधान् निजान् स्मरन्तोऽपि नैव दृश्यन्ते।
क्षुद्रानप्यन्येषां मन्यन्ते केचिदक्षम्यान्।।

**(1101) अध्वनीनः**

अक्षुण्णानामासं यदध्वनीनोऽध्वनामहं जगति।
राजपथानां पथिकैर्मम कः स्यादेव सम्बन्धः।।

**(1102) विडम्बना**

यैः सह तव सञ्चरणं नामन्यत शोभनीयमिह विज्ञैः।
हन्त जगन्नाथ! त्वंताननु सन्दृश्यसे विचरन्।।

**(1103) दृष्टिः**

सकृदपि येषु न्यपतत् त्वद्दृष्टिः स्नेहभावसंवलिता।
विषये स्वोद्धारस्य प्राभवदास्था दृढा तेषाम्।।

**(1104) कविता**

कविता मुखादृषीणां विनिर्गता काऽपि वेदरूपा या।
तस्या न रामणीयकमुपेतमद्यापि मालिन्यम्।।

**(1105) प्रणतिः**

किञ्चिदपूर्वं कृत्वा हिताय लोकस्य ये गताः स्वर्गम्।
तानन्तरेण निपतेदेषा प्रणतिः कुतोऽस्माकम्।।

**(1106) पञ्जरबद्धः**

पञ्जरकेऽस्मिन् यद्यपि वासमकार्षं सदा शरीरेण।
मनसा तथापि सततं वितते गगने मयोड्डीनम्।।

**(1107) श्रीमद्भागवतम्**

भागवतस्य न पाठो बृहतो ग्रन्थस्य केवलं पाठः।
वृन्दारण्ये नित्यं किन्तु विहारो घनश्यामे।।

**(1108) कृपाकठोरः**

कः खलु भुवि मन्तव्यं कृपाकठोरस्य तेऽर्हति ज्ञातुम्।
यस्त्वं ददासि सर्वं यस्त्वं दत्वाऽपि गृह्णासि।।

**(1109) गान्धी रवीन्द्रश्च**

उत्तुङ्गो गान्धित्वं नगाधिराजो हिमालयो नाम।
गङ्गाप्रवाह आर्द्रीकुर्वन् सर्वं रवीन्द्रत्वम्।।

**(1110) तुषराशिः**

आसीद् यन्मतव्यं तदितो वक्तव्यतां मया नीतम्।
अस्य जगन्नाथस्यास्तित्वं तुषराशिरेतर्हि।।

**(1111) उपहारः**

स महांस्तवोपहारो जीवनमेतत् त्वयाऽर्पितं मह्यम्।
अपराद्धोऽस्मि यदेनं मलिनमकार्षं प्रमादवशात्।।

### (1112) खेद:

यापितमिदमस्तित्वं कार्येष्वनपेक्षितेषु वर्तयता।
स्पृहणीयं न हि किञ्चित् कृतमिति जागर्ति हृदि खेद:।।

### (1113) अशिष्टा:

चातुर्येण स्वेन स्वमशिष्टत्वं सुखेन संछाद्य।
विनयेन स्वमशिष्टा व्यवहारं भुवि विदधतीह।।

### (1114) सावधान:

भाव्यं पथि सञ्चरता पदे पदे जगति सावधानेन।
इह लुण्ठनप्रवृत्ता लुण्ठेयुर्यत्र कुत्रापि।।

### (1115) सिद्धान्त:

यस्मिन् स्वार्थ: सिध्येत् मिलेत् प्रभूतं धनञ्च यत्रैव।
न्याय्य: स एव पन्था इति सिद्धान्तो दिनेष्वेषु।।

### (1116) ग्रन्थागारम्

व्यर्थीभूय ग्रन्थागारं स्वं ज्ञापयत्यमुं भावम्।
दर्शनरमणीयमिति प्रेक्षध्वं पाठका इह माम्।।

### (1117) दृष्टिरहितत्वम्

यत्रैव याति दृष्टिस्तत्रैव व्याकुलीभवत्येषा।
शोचामि दृष्टिमत्त्वाद् यदिह वरं दृष्टिरहितत्वम्।।

**(1118) यापितम्**

हसता यापितमेतद् यापितमेतच्च केनचिद् रुदता।
न प्रष्टव्यं विधिना यापितमस्माभिरिहकेन।।

**(1119) न हानिः**

नानेन तिष्ठता स्यात् हानिं मन्यामहे तथाऽस्माकम्।
कतिपयदिवसस्थायीति जगन्नाथो न विनिवार्यः।।

**(1120) अपराद्धः**

कस्यचिदपीह चेतः खिन्नं कर्तुं न काऽपि मेऽभिरुचिः।
खिन्नं विधाय कञ्चिज्जानाम्यात्मानमपराद्धम्।।

**(1121) भेदः**

प्रत्येकमेव सरितां भवन्ति भिन्ना लयाश्च गतयश्च।
प्रत्येकमेव भिन्नैः स्वरैः खगाश्चापि कूजन्ति।।

**(1122) रथ्याः**

बाल्ये यासु पुरोऽस्याः क्रीडितमस्माभिरेत्य रथ्यासु।
अस्मानपरिचितानिव ताः प्रेक्षेन्ते पुनः प्राप्तान्।।

**(1123) अहमहमिका**

अहमहमिकेति सैषा सामान्यैव प्रवृत्तिरेतर्हि।
उच्चैः पदाधिरुढा अनया नैके विराजन्ते।।

**(1124) धूर्तराजा:**

विद्याविनयादिगुणांस्त्यक्त्वा सम्प्राप्य धूर्तराजत्वम्।
आसन् य इह खरस्था: सम्प्रति ते सन्ति वाजिस्था:।।

**(1125) स्वरसंवाद:**

स्वरसंवाद: प्रायो मध्ये नोत्पद्यतेऽत्र बुद्धिमताम्।
एको दीपकरागे निरतोऽन्यो मेघरागे च।।

**(1126) शकुनय:**

अध्यापका नियुक्ता: स्यु: शकुनय एव यासु जगतीह।
तासु स्वार्थत्यागोऽध्यापेत न पाठशालासु।।

**(1127) सत्ये स्वाधिकार:**

प्रकटीकुर्याद् धीमान् सत्ये य: स्वाधिकारमिह कोऽपि।
धीमत्त्वमेव मन्ये सन्देहस्यास्पदं तस्य।।

**(1128) स्वामित्वम्**

अन्तक आगत्यान्तं कश्चिददृश्य: करोति सर्वस्य।
स्वस्वामित्वस्य जनो भ्रममात्मनि पालयन् याति।।

**(1129) वृद्ध:**

वृद्धस्येव वचांसि श्रुतिपथमायान्ति ते दिनेष्वेषु।
सत्यं ब्रूहि स्वमुखात् किमुत जगन्नाथ! वृद्धोऽसि।।

**(1130) समन्वयः**

विधिना केनास्माकं व्यवहारोऽनेन सम्प्रवर्तेत।
न जगन्नाथः क्वचिदपि समन्वयं चेष्टते कर्तुम्।।

**(1131) वृष्टिः**

हस्ते लेखक! यावद् विराजते लेखनी तवार्द्रतरा।
वृष्ट्या सुवर्णमय्या क्ष्मां कुरु तावत् सुवर्णमयीम्।।

**(1132) तस्लीमा**

'तस्लीमा'मिह पश्यत नारीमबलेति मावजानीत।
वज्रादपि हि कठोरा कुसुमादपि यदपि सा मृद्वी।।

**(1133) धर्मः**

बन्धनमेव न धर्मो मन्ये धर्मो हि बन्धनान्मुक्तिः।
आधाय शिरसि धर्मं केचिद् विचरन्ति भारमिव।।

**(1134) यायावरत्वम्**

येषु दिनेषु तवासीदिष्टं यायावरत्वमतिमात्रम्।
तव चरणौ विनिगडितौ तेषु जगन्नाथ! दृढमास्ताम्।।

**(1135) भेददृष्टिः**

कस्मैचित् पर्यङ्कं भुवं ददासि त्वमत्र कस्मैचित्।
द्वावपि तवैव तनयौ तथापि तव भेददृष्टिरिह।।

**(1136) 'समय एव करोति बलाबलम्'**

दिवसेषु ये गतेषु प्रस्थानं कुर्वते स्म गजयानैः।
सम्प्रति पदातयस्ते धूलिषु विचरन्ति धूसरिताः।।

**(1137) मधुशाला**

मधुशालातो नैके पायं पायं गता मधु स्वादु।
तिष्ठ प्रतीक्षमाणस्त्वमिह जगन्नाथ! लब्धासि।।

**(1138) स्त्रीषु**

न नपुंसकेषु नापि स्त्रीषु न पुरुषेशु च त्वमित्याहुः।
त्वं मिलितासि कदाचित् स्त्रीष्विति मम कोऽपि विश्वासः।।

**(1139) अपात्रम्**

विषये भाग्यस्यास्य स्वेनास्माभिः किमेव वक्तव्यम्।
ईदृक् स जगन्नाथः कदाचिदासीदपात्रमिह।।

**(1140) गृध्रः**

गरुडस्तम्भस्योपरि गरुडस्यैवास्ति कश्चिदधिकारः।
असति च गरुडे तत्पदमुपेत्य गृध्रोऽपि गृह्णीयात्।।

**(1141) 'लोकसभा'**

सम्प्रति 'लोकसभायां' लोकस्य प्रातिनिध्यमाचरताम्।
लोकम्प्रत्यनुरागः कियानिति प्राय आशङ्क्यः।।

**(1142) रसालानां देशः**

जानीतास्य महत्त्वं खर्जूरप्रायदेशवास्तव्याः।
भारतमिति यो देशः स रसालानां सुमधुराणाम्।।

**(1143) आम्रं खर्जूरञ्च**

माधुर्येण समाने यद्यप्याम्रं तथा च खर्जूरम्।
स्वादे तथापि मन्ये क्व तदाम्रं तत् क्व खर्जूरम्।।

**(1144) स्वरसामञ्जस्यम्**

प्रत्येकं तन्त्रीषु प्रतिभाति स्फुटतया स्वरो भिन्नः।
स्वरसामञ्जस्येन प्रभवति सङ्गीतमुत्कृष्टम्।।

**(1145) महारण्यम्**

आहिण्डन्ते निर्भयमनेकशो हिंस्रजन्तवो यस्मिन्।
राष्ट्रं न तदुद्यानं किन्तु महारण्यमुच्छीलम्।।

**(1146) वृद्धा गृध्राः**

यद्यपि वृद्धा गृध्रा द्रष्टुं नार्हन्ति किमपि दूरस्थम्।
बुद्धिस्तथापि तेषां पश्यति दूरात् सुदूरतरम्।।

**(1147) आत्मीयत्वम्**

यदिदानीं मर्त्येषु म्रियमाणं लक्ष्यते विशेषेण।
मन्ये न किञ्चिदन्यत् परमात्मीयत्वमेव नु तत्।।

**(1148) जीविका**

न क्वचिदपि विपणिर्मे न कस्यचिद् वस्तुनोऽपि वाणिज्यम्।
आगम एष मया खलु केवलमिह जीविकेति कृतः।।

**(1149) समयः**

त्वां वच्मि सुहृदिवाहं समयस्यावेह्यवश्यमिह मूल्यम्।
सञ्चर समयेन समं येन जगन्नाथ! सफलः स्याः।।

**(1150) प्रसूनानि**

उद्यानेषु समन्ताद् विकसद्भिः शक्यमेतदनुमातुम्।
सन्ति कियन्ति पृथिव्यामिह प्रसूनानि लीनानि।।

**(1151) कालिदासो बाणभट्टश्च**

पद्यैः स कालिदासः सम्मोहनमातनोति किमपि स्वैः।
अभिभवतीव समन्तात् स बाणभट्टः स्वगद्येन।।

**(1152) पश्चाल्लग्नः**

पश्चाल्लग्नो गच्छन् न दृश्यते कस्यचिज्जगन्नाथः।
सम्मन्यते न कञ्चित् पश्चाल्लग्नं जनं चलितुम्।।

**(1153) मनुष्यः**

पद्भ्यामेव स्वाभ्यां सञ्चरता जिष्णुना मनुष्येण।
इह लङ्घिताः शिखरिणः पारावाराश्च सन्तीर्णाः।।

### (1154) राष्ट्ररथः

राष्ट्ररथस्य नियन्ता क्षणमपि निद्रावशं यदाऽऽयाति।
भवति तदैव स्वपथाद् राष्ट्ररथो भ्रष्ट इति मन्ये।।

### (1155) उद्यानम्

भात्युद्यानं विहगैरितस्ततः केवलं न कूजद्भिः।
अपितु च्छायावद्भिर्द्रुमैः प्रसन्नैः सरोभिश्च।।

### (1156) आग्नेयी सरित्

आग्नेयी सरिदेका प्रवहन्ती काचिदन्तरस्माकम्।
सम्पूर्णमेव विश्वं प्रवर्तमानाऽऽत्मसात्कर्तुम्।।

### (1157) यामिकाः

प्रायो भवन्ति लेखनधर्माणो यामिकाः समाजस्य।
निद्रावशं गतान् ये जागरयन्ति स्वरेणोच्चैः।।

### (1158) 'वन्दे मातरम्'

'वन्दे मातरमि'ति नहि लघु वाक्यं मन्त्रमेतदस्माकम्।
आग्नेयास्त्रं प्रत्युत कृत एतद् भारतं द्विषताम्।।

### (1159) अदृश्यः

सागरमासं पूर्वं हस्ताभ्यां सन्तरन्नहं स्वाभ्याम्।
कश्चिददृश्यः सम्प्रति मामिह सञ्चारयन्नस्ति।।

**(1160) पराजयः**

भाले यस्य विधात्रा निजलेखन्या पराजयो लिखितः।
सोऽहं नतेन मूर्ध्नाऽङ्गीकृतवांस्त्वत्प्रसाद इति।।

**(1161) एकश्चलन्**

चलतैकेन मया पथि पदातिना दृष्टमग्रतः सततम्।
शयितं किञ्चिच्च सुखं स्निग्धच्छायातरोर्मूले।।

**(1162) आन्दोलितः**

मामाकर्षति काशी 'मा याही' त्याह मां प्रयागश्च।
स्वमनुभवाम्यान्दोलितमुभयोर्मध्येऽहमेतर्हि।।

**(1163) मौनम्**

मौनमपि व्याचष्टे तद् यच्छब्दैर्न शक्यमाख्यातुम्।
मौने निलीय मन्ये ग्रन्थास्तिष्ठन्ति केषाञ्चित्।।

**(1164) साहित्यम्**

साहित्यमस्तु कामं कश्चिदमोघो न रामबाण इह।
अर्हति रामीकर्तुं नैकानपि रावणानिह तत्।।

**(1165) जगन्नाथः**

नगरस्य चत्वरेषु भ्रमन् न कस्यापि दुर्लभः सत्यम्।
स जगन्नाथो न परं विधिना केनापि याति वशम्।।

**(1166) गान्धी**

नाहिंसाया नापि क्वचित् प्रतिष्ठाऽस्ति यत्र सत्यस्य।
तस्यैव भारतस्य स्वं हुतवांस्त्वं कृते गान्धिन्।।

**(1167) लोकः**

कामपि यो न लभेत स्वीकृतिमिह यावदेव लोकस्य।
तावन्नहि साफल्यं मन्ये तस्य प्रयोगस्य।।

**(1168) दण्डविधानम्**

ये कर्तयन्ति पक्षानुड्डयनात् पूर्वमुद्धता वयसाम्।
अपि तेभ्यो दास्यति वा कश्चिन्न्यायालयो दण्डम्।।

**(1169) हठवादः**

धर्मग्रन्थे केवलमस्माकं रक्षितेशवाणीति।
येऽप्याहुर्हठवादस्तेषां मन्ये कदाचित् स्यात्।।

**(1170) गीतम्**

एकान्त एव गीतं जीर्णारण्यं मयेदमध्यास्य।
कथमर्हति साम्यमिदं पुष्पोद्यानस्य गीतेन।।

**(1171) स्पर्शः**

तद् भवति वेणुगीतं यद्गीतं तेऽधरामृतं स्पृशति।
त्वच्चरणौ यत् स्पृशतस्तदस्ति वृन्दावनं नु वनम्।।

## (1172) लोकमान्यत्वम्

कामं लभतां कश्चित् पाण्डित्यं नाम सुमहदिह लोके।
तेनैव तस्य लोके नहि सिध्यति लोकमान्यत्वम्।।

## (1173) क्षणसम्पत्

जनसम्मर्दादस्माद् दूरे निक्षिप्य मौन आत्मानम्।
क्षणसम्पदमुपलब्धं सार्थकतां नेतुमिच्छामि।।

## (1174) सैकतराशिः

स्नेहस्रोतः शुष्कं हृद्देशे प्राय एषु दिवसेषु।
तप्तः सैकतराशिः प्रसृतः प्रतिभाति सर्वत्र।।

## (1175) मौनभङ्गः

यत्किञ्चित् सौहार्दं साकं मौनेन मामकं जातम्।
क्रियते स्वमौनभङ्गः सतैव विवशेन हन्त मया।।

## (1176) पञ्जरबन्धः

भाग्ये पञ्जरबन्धो गरुत्मतामेव केवलं नेह।
गृहपञ्जरेषु मन्ये निक्षिप्यन्ते गृहिण्योऽपि।।

## (1177) गङ्गा

तव सीमितेह भक्तिः कीर्तननिराजनादिषु प्रायः।
गङ्गे! तव मालिन्यं कतिपय एवेह शोचन्ति।।

**(1178) भागीरथी**

भागीरथी तवैषा पृथिवीं परिलक्ष्यते त्यजन्तीव।
पुनरागच्छ भगीरथ! निजरथखातां निरीक्षस्व।।

**(1179) धर्मः**

स जगन्नाथः कथमपि विषये धर्मस्य न प्रमाणमिह।
स तथापि किमपि नूनं हृदभ्यनुज्ञातमभिधत्ते।।

**(1180) सङ्घर्षः**

ऊनान् सत्त्वेष्वधिका न केवलं काननेषु बाधन्ते।
प्रत्येकमेव जन्तुष्वस्तित्वार्थं हि सङ्घर्षः।।

**(1181) सिद्धान्तः**

उद्यानस्य सुमनसां वैविध्यं रूपवर्णयोरेव।
शोभाधायकमिति यः सर्वानुमतः स सिद्धान्तः।।

**(1182) घण्टानादः**

सुचिराद् घण्टानादः श्रुतिपथमायाति दूरतो देशात्।
सङ्केतः प्रतिभाति प्रलयस्यागच्छतो महतः।।

**(1183) भारतीयत्वम् 1**

आरामेश्वरतीर्थादाकश्मीराच्च भारतं राष्ट्रम्।
तत्र निवसतामेकः परिचय इह भारतीयत्वम्।।

## (1184) भारतीयत्वम् 2

शौर्याख्यं विश्वस्मिन् व्याप्तं तत्त्वं यदैकतामेति।
उत्पद्यते तदैतद् यत्किञ्चिद् भारतीयत्वम्।।

## (1185) दुराग्रहः

'मजहब' नाम्नि च्छत्रे नायास्यति विश्वमेतदेकस्मिन्।
केषाञ्चिन्मानवतां दुराग्रहः कश्चन द्विषताम्।।

## (1186) धर्मः

धात्रा धर्मस्य कृते न मानवोऽयं विनिर्मितो जगति।
तेन तु धर्मो मन्ये विनिर्मितो मानवस्य कृते।।

## (1187) सौहार्दम्

ऊनं सत्त्वेष्वधिको यश्चेदुत्पीडयेत् स न क्षम्यः।
मानव-मानवमध्ये सौहार्दं वस्तुतो धर्मः।।

## (1188) याथार्थ्यम्

मिथ्यात्वमस्य जगतः कामं शक्येत नाम साधयितुम्।
किन्तु किमपि सौन्दर्यं बिभर्ति याथार्थ्यमप्यस्य।।

## (1189) कारा

देवालयकारायां यदर्चकैर्यदवधीह निक्षिप्तः।
तदवधि विधिना केन त्वं यापयसीति नश्चिन्त्यम्।।

## (1190) नारी

मूकीभूता सर्वं सोढुं विवशीकृता त्वया नारी।
सम्प्रति किञ्चिद् वक्तुं प्रचेष्टमानाऽर्हसि श्रोतुम्।।

## (1191) उपहार-भेदः

वाक्प्रस्तरोपहाराः प्रस्तूयन्ते भुवीह कस्मैचित्।
वाक्पुष्पैः सुविकसितैरुपह्रियन्ते च केचिदिह।।

## (1192) प्रस्तरेषु देवत्वम्

कृतवानसि देवालयमारोप्य प्रस्तरेषु देवत्वम्।
मतिमत्त्वस्य स मानव! तव वा मौर्ख्यस्य परिणामः।।

## (1193) वाग्देव्या उद्यानम्

उद्याने वाग्देव्यास्त्वमकार्षीः कालिदास! चङ्क्रमणम्।
ग्रथिता त्वया महास्रङ्मन्ये तस्यैव पुष्पाणाम्।।

## (1194) शृगालाः

कोलाहलः शृगालैर्द्वारि क्रियते हरेर्न सुप्तस्य।
प्रविशन्तोऽपि गुहायाः क्षेत्रं विरमन्ति ते भीताः।।

## (1195) अहिनकुलम्

सामानाधिकरण्यं यैः सह नास्त्येव किञ्चिदस्माकम्।
अहिनकुलनं नहि किञ्चित् तथापि तैः साकमस्माकम्।।

**(1196) अभिसारिका**

भ्रान्तिः किन्नु मदीया सुतरामेषाऽन्विताऽपि चन्द्रिकया।
रात्रिर्भाति तमिस्राऽभिसरन्त्यभिसारिका काचित्।।

**(1197) झङ्कारः**

भग्नायां हृत्तन्त्र्यां मम यः सुप्तोऽस्ति कोऽपि झङ्कारः।
सोऽकस्मादेकान्ते प्रतिभात्यायानिव श्रोत्रम्।।

**(1198) उदारा दृष्टिः**

यत्किञ्चिदेकनीडं समग्रमेवास्ति विश्वमेतदिति।
क्व गताऽस्माकं दृष्टिः काचिदुदारा दिनेष्वेषु।।

**(1199) प्रशस्तिपात्रम्**

वस्तुत ईश्वर एव प्रशस्तिगानस्य केवलं पात्रम्।
न तदतिरिक्ते तादृक् बिभर्ति गानं तदौचित्यम्।।

**(1200) कर्तव्यम्**

असकृन्मञ्चगतेन प्रदर्शितानि त्वयेह नाट्यानि।
विरम जगन्नाथ! ततः कुरु किञ्चिद् यच्च कर्तव्यम्।।

**(1201) वासस्थानम्**

त्वं सर्वत्रासीति त्वयि कामं केचिदत्र भाषन्ताम्।
किमपि सुरभि सौन्दर्यं त्वद्वासस्थानमिति जाने।।

## (1202) लोकहितम्

लोकहितं यैर्विहितं स्वार्थपरित्यागपूर्वमिह लोके।
तेषामेव स्मरति प्रायो नामानि लोकोऽयम्।।

## (1203) कूर्मः

कूर्ममिव प्रेक्षे त्वां निलीनमाकृष्य सर्वतः स्वस्मिन्।
कथय जगन्नाथ! कुतो योगाभ्यासस्त्वयाऽऽरब्धः।।

## (1204) विकलाः

जन्मन्यस्मिन्नेव त्वां विकलाः स्मः कथञ्चिदुपलब्धुम्।
अन्यस्य जन्मनस्तव क इतस्तिष्ठेत् प्रतीक्षायाम्।।

## (1205) काव्यचर्चा

सम्प्रति यद्यपि न रसः स्वादविरहितेषु काव्यबन्धेषु।
स्वान्तस्तथापि रमते यत्किञ्चित् काव्यचर्चायाम्।।

## (1206) तस्मिन्नायत्तम्

तस्मिन्नेवायत्तं कस्मैचिद् दातुमीहते सर्वम्।
कस्माच्चिच्चाकस्मात् प्रसह्य गृह्णाति दत्तमपि।।

## (1207) स्फुलिङ्गः

भस्मावृतं स्फुलिङ्गं पादाघातेन माऽवमन्यस्व।
क्षुद्रोऽप्येष समर्थः स्वेन ब्रह्माण्डमपि दग्धुम्।।

**(1208) आशातन्तुः**

अयमेव जगति जन्तोर्भवति जगन्नाथ! जीवनाधारः।
कस्यचिदाशातन्तुं प्रयतेथा नैव विच्छेत्तुम्।।

**(1209) कटु भाषितम्**

कटु भाषितमाकर्णितमद्यावधि केनचिन्न ते वदनात्।
किमिदं जातमकस्माद् वदसि जगन्नाथ! किमपि कटु।।

**(1210) क्षतम्**

कालक्रमेण वपुषः क्षतानि, लुप्तानि नानुभूयन्ते।
दुःखाकरोति मां क्षतमद्यावधि हृद्गतं किन्तु।।

**(1211) बोधिसत्त्वः**

नाभूत् सुचिरादेषामज्ञानध्वान्तराशिमग्नानाम्।
उद्धारस्योपायः समुदेति न बोधिसत्त्वोऽपि।।

**(1212) शास्त्रीयं नृत्यम्**

मां परितो झङ्कारैर्भरितं यत्किञ्चिदेतदाभाति।
नृत्यं प्रवर्तमानं कस्याश्चिदिवास्ति शास्त्रीयम्।।

**(1213) उपेक्षा**

मैव पिधेहि द्वारं परिवर्तय मार्गमपि न दृष्ट्वाऽस्मान्।
त्वत्तः किमप्यपेक्ष्य त्वां न वयं मिलितुकामाः स्मः।।

**(1214) क्रमेलकः**

अस्त्येव पक्षपातः केलिवनस्यैषु कण्टकेषु तव।
न तथापि रे क्रमेलक! ततः प्रवेशस्य पात्रमसि।।

**(1215) अवकाशः**

नाहं किञ्चिदकस्मात् सम्प्रति तिष्ठामि मौनमालम्ब्य।
यदिह कृते मद्वचसः प्रतिभाति न कश्चिदवकाशः।।

**(1216) यातयामः**

मन्यस्व यातयामं स्वमिदानीं तिष्ठ कोण एकस्मिन्।
विनिवारयितार इमेऽन्यथा जगन्नाथ! मुखरं त्वाम्।।

**(1217) उद्देश्यम्**

युद्धाभ्यासो नैव प्रवर्त्यते किमपि युद्धमुद्दिश्य।
युद्धं निवारणीयं कथञ्चिदस्माकमुद्देश्यम्।।

**(1218) युद्धार्थमाह्वानम्**

सति सामर्थ्येऽपि वयं न शस्त्रमुद्यम्य योद्धुमिच्छामः।
असकृद् योद्धुमना अरिरसमर्थोऽप्याह्वयत्यस्मान्।

**(1219) कृत्यम्**

आचरितं नास्माभिर्यदि किञ्चित् कृत्यमेव जगतीह।
कृतकृत्यत्वं तावद् विधिना केनेह लक्ष्येत।।

## (1220) वार्ता

स्वस्योद्यानस्य चिराद्वार्ता श्रुतिगोचरा न काचिदभूत्।
अपि रक्षितानि सुतरामस्माकं तानि नीडानि।।

## (1221) नैराश्यम्

नैराश्यं न प्रकृतावासीदीदृक् कदाचिदस्माकम्।
न स्यादाशातन्तुः कथञ्चिदप्येष विच्छिन्नः।।

## (1222) एकः पदातिः

मम सहचरः कुतश्चिद् विहाय मां स्वेन वर्त्मना यातः।
शून्ये पदातिरेकः स्वे वर्त्मनि सञ्चरन्नस्मि।।

## (1223) युगधर्मः

सङ्गोपनस्य विस्मृतमस्माभिः सर्वथैव माहात्म्यम्।
युगधर्मः संवृत्तः प्रदर्शनं किञ्चिदेतर्हि।।

## (1224) लोकः

यस्य कृते लोकस्य प्रायः सर्वोऽपि तावदारम्भः।
अनभिज्ञ एव तिष्ठति तेन वराकः स आमूलात्।।

## (1225) वंशीरवः

कोऽयं कथाप्रसङ्गः श्रीकृष्णस्येह गोपबालस्य।
वंशीरवस्य चर्चा यस्मिन् न स्थानमावहति।।

**(1226) जगन्नाथः**

संसरतीत्ययमुक्तः संसारो गच्छतीति जगदेतत्।
जगतः सोऽयमनाथः कथं जगन्नाथ इत्युक्तः।।

**(1227) कवयः**

स जगन्नाथः कविरिति विमृश्य चेतस्युदेति मम हासः।
कतिपयपदकर्तारो भवन्ति कवयो दिनेष्वेषु।।

**(1228) बलवत्तरम्**

रामत्वमपि मनुष्ये मनुष्य एवास्ति रावणत्वमपि।
रामत्वाद् बलवत्तरमाभाति नु रावणत्वमिह।।

**(1229) चित्रपटम्**

दृश्याद् दृश्यान्तरमिव ममाद्य समुदेति चित्तचित्रपटे।
रुदतीवासि कदाचित्त्वमसि कदाचिद् हसन्तीव।।

**(1230) उत्साहः**

प्रतिपदमेवेदानीं सत्स्वध्वनि मामकेऽवरोधेषु।
अग्रे सर्तुं नैव क्षणमपि शिथिलो मदुत्साहः।।

**(1231) द्रष्टारः**

बिभ्रति दृशः समेऽपि द्रष्टारः केचिदेव मन्यन्ते।
चेतो भवति समेषां सचेतसः किन्तु केचिदिह।।

**(1232) अधिकारः**

आश्रितमिदमुद्यानं येषामाजन्मनः स्वमस्तित्वम्।
अधिकारः खलु तेषां समान एवेह सर्वेषाम्।।

**(1233) समानधर्मा**

अवशिष्ट एक आसीत् समानधर्मा य एव जगतीह।
सोऽपि जगन्नाथ इतः सुहृदस्माकं गतोऽकस्मात्।।

**(1234) उपलब्धिः**

यद्यपि न श्रोतारस्त्वां मिलितारः प्रवर्तमानेऽस्मिन्।
महती स्वान्तःसुखमिति तवोपलब्धिस्तथाप्येषा।।

**(1235) नकारः**

त्वद्वदनादस्माकं न यः कदाचित् क्वचिच्छ्रुतिं यातः।
स जगन्नाथ! नकारः श्रूयत एवैषु दिवसेषु।।

**(1236) उभयतः**

उद्यच्छिराः प्रतीयत एकत आतङ्कवाद आयास्यन्।
स्वावसरमीक्षमाणोऽन्यतश्च साम्राज्यवाद इह।।

**(1237) न कश्चिदायातः**

कस्मै स्वर्गो दत्तो गतिः प्रदत्ता च नारकी कस्मै।
यात इतो नहि कश्चित् स्वां स्थितिमायात आख्यातुम्।।

**(1238) अज्ञातः**

अज्ञातेनागत्य प्रदूषितं केनचिज्जलं सरसः।
अस्त्यस्वास्थ्यमनुभवन् समग्र एवाधुना ग्रामः।।

**(1239) जिज्ञासुः**

आजन्मनः समर्जितमजस्रमभ्यस्य येन वैदुष्यम्।
तस्य न कोऽपि समीपं सम्प्रति जिज्ञासुरायाति।।

**(1240) लोकयात्रा**

श्रीमद्भगवद्गीता येन कृताऽधीतिनाऽऽत्मसाज्जगति।
सार्थक्यं तस्य गता समन्ततो लोकयात्रेह।।

**(1241) भारतरत्नम्**

न कृते प्रमाणपत्रं भारतरत्नस्य किञ्चिदनिवार्यम्।
मन्येऽस्य भारतस्य स्वतः प्रमाणानि रत्नानि।।

**(1242) गर्तनिपातः**

वयमेते धावामो व्याप्ते तमसीव सूचिभेद्येऽस्मिन्।
नासम्भाव्यः सम्प्रति गर्तनिपातः कदाचिदिह।।

**(1243) दुर्ग्रहस्य दृष्टिः**

कस्यचिदस्मिन् दृष्टिर्विनिपतिता हन्त दुर्ग्रहस्येव।
उद्यानस्य न कुशलं पश्यामोऽनागते काले।।

**(1244) प्रेम**

यत्प्रेम वासनायाः पूर्तेरिह साधनं मतं जगति।
प्राप्यत इह तेनैव प्रेम्णा भगवान् मुकुन्दोऽपि।।

**(1245) क्रीडनकम्**

या मृन्मयीह मूर्तिर्भगवानिति पूजिता मया सुचिरात्।
सा भग्ना बालेन क्रीडनकं मन्यमानेन।।

**(1246) प्रतिष्ठा**

केचित् स्वेन पदेन प्रतिष्ठिता जगति सम्भवन्तीह।
संवर्धयन्ति केचिद् भुवि प्रतिष्ठां पदस्यैव।।

**(1247) चर्चाया विषयः**

अस्माभिः प्रतिषिद्धः कथाप्रसङ्गोऽपि यस्य गोष्ठीतः।
स जगन्नाथः प्रायो विषयो भवतीह चर्चायाः।।

**(1248) औचित्यसुविचारः**

विषयस्य स्थानस्य च विचार्यमधुनैव तावदौचित्यम्।
आश्चर्यं मधुगोष्ठ्यां चर्चा रामायणस्येति।।

**(1249) यातयामत्वम्**

प्रस्तोतव्यमिदानीं न जगन्नाथस्य नाम तस्येह।
सन्देहस्य न विषयो यस्य किमपि यातयामत्वम्।।

## (1250) संवेदना

संवेदना न हृदयं यस्य स्पृशतीह हन्त किञ्चिदपि।
तस्य मनुष्यत्वे खलु निःसन्देहं नु सन्देहः।।

## (1251) मनुष्यत्वम्

तिष्ठत्यधुना दृष्टिर्जात्यादिष्वेव हन्त सर्वाऽपि।
तिष्ठत्यनपेक्षितमिव वराकमेतन्मनुष्यत्वम्।।

## (1252) स्वाद-भेदः

सत्यपि भेदे प्रकटे स्वादविदामनुभवानुसारेण।
माधुर्येणाभिन्नं केचन लावण्यमित्याहुः।।

## (1253) स्वानुभवः

भ्रम एव वा मदीयोऽथवा मयि स्नेहजन्य उन्मादः।
पथि मामनुगच्छन्ती शनकैः शनकैस्त्वमायासि।।

## (1254) चिन्ता

उदरम्भरयो ग्रस्ता सर्वत्र स्वस्वचिन्तया सन्ति।
अवलोक्यते न कश्चित् परस्य चिन्तां प्रकुर्वाणः।।

## (1255) प्रमाणम्

भाषे यथार्थमहमिति डिण्डिमघोषं करोति यः कश्चित्।
भाषितमिह तस्य कियत् प्रमाणमिति तावदवधार्यम्।।

### (1256) क्रान्तिः

परिवर्तिनि संसारे भवन्ति परिवर्तनान्यनेकानि।
तत्परिवर्तनमन्यद् यदुच्यते क्रान्तिरित्याप्तैः।।

### (1257) रावणत्वम्

रामेण रावणो हत इतीतिहासः प्रमाणमस्माकम्।
अद्यापि रावणत्वं प्रभविष्णिवत्यनुभवोऽस्माकम्।।

### (1258) अनुग्रहस्य पात्रम्

स्वानुग्रहस्य नैके त्वयाऽपराद्धाः कृता प्रभो! पात्रम्।
सकृदपि निपतति तव दृङ् न जगन्नाथेऽपराद्धेऽस्मिन्।।

### (1259) सिंहासनम्

सिंहासनाधिरूढास्तावत् सिंहासनेषु तिष्ठन्ति।
प्रबलतरा यावत् तान् हठादवारोहयन्ति ततः।।

### (1260) हृदि प्रतिष्ठा

इतिहासज्ञाः कामं रामस्यास्तित्वमिह न मन्यन्ताम्।
ननु लोकहृत्प्रतिष्ठं निवारयेयुः कथं रामम्।।

### (1261) सहिष्णुत्वम्

न सहिष्णुत्वं यस्मिन्ननुभवमायाति लेशमात्रमपि।
तमभिदधाना धार्मिक इति त्रपामनुभवाम इह।।

**(1262) राजनीतिज्ञाः**

विश्वसनीया यद्यपि शास्त्रदृशा राजनीतिरस्त्येव।
विश्वसनीया न तथा तथापि भुवि राजनीतिज्ञाः।।

**(1263) सुमनसः**

केवलमिह निर्गन्धा न सुमनसश्चित्तमाशु दुन्वन्ति।
म्लाना अपि ता द्रष्टॄन् दुःखाकुर्वन्ति बाढमिह।।

**(1264) भारतीयत्वम्**

नाधीतं रामायणमिह न महाभारतञ्च समधीतम्।
तस्यास्ति शङ्कनीयं मन्ये भुवि भारतीयत्वम्।।

**(1265) विज्ञानवित्**

अक्षयमात्मानमलं मन्वानः कोऽपि बुद्धिसम्पन्नः।
विज्ञानवित् प्रयतते यथार्थमिह भाषितुं स्वेन।।

**(1266) तर्काः**

प्रायस्तर्का धर्मं समूलमुच्छेत्तुमेव चेष्टन्ते।
दृढमूलस्योच्छेदे तस्य भवन्त्येव ते विफलाः।।

**(1267) सिद्धाभासाः**

सिद्धाभासा नैके नगरस्यास्य भ्रमन्ति रथ्यासु।
रक्षासूत्रैर्मन्त्रैः कुर्वाणा लोककल्याणम्।।

**(1268) धर्मध्वजाः**

धर्मध्वजाः प्रविष्टा देवायतनानि वासरेष्वेषु।
व्याचक्षाणाः सन्ति प्रायो धर्मं त एवाद्य।।

**(1269) जगन्नाथः**

अनुपस्थितेन गोष्ठ्यां न जगन्नाथेन हानिरधिकेह।
अस्योपस्थितिमात्रं जनयत्यस्माकमुत्साहम्।।

**(1270) मानस-राजहंसाः**

लब्धो न यैः प्रवेशो रामचरितमानसे कदाचिदपि।
परिगण्यन्ते सम्प्रति ते मानस-राजहंसेषु।।

**(1271) माधुर्यं लावण्यञ्च**

माधुर्यमेव केचिल्लावण्यं केचिदेव शंसन्ति।
सुस्वादूभयमपि वयमभक्तिभेदेन शंसामः।।

**(1272) परिचयः**

यद्यप्यस्मिन्नगरे परिचित एकोऽपि नास्ति नागरिकः।
सुचिरात् सुपरिचिता इव तथापि सर्वे मिलन्त्यत्र।।

**(1273) प्रसादो विषादश्च**

कश्चिन्मयोपलब्धा मनुष्यनामा न भौतिकः पिण्डः।
यस्मिन्नहि प्रसादो न विषादः कोऽपि यस्मिंश्च।।

## (1274) इतिहासः

भवता प्रवर्तनीयः प्रवर्तमानस्य कोऽपि विषयोऽत्र।
कृपया नोद्धरणीयः पुनरुक्तः कश्चिदितिहासः।।

## (1275) भारतीयत्वम् 3

केचिद् वक्तव्येऽस्मिन् विप्रतिपन्ना भवेयुरिति मन्ये।
श्रीरामत्वाद्भिन्नं न भारतीयत्वमाभाति।।

## (1276) भारतीयत्वम् 4

श्रीरामस्यास्तित्वं सन्दिहते येऽपि भारतेऽद्यापि।
ते सन्ति भारतीया इत्यत्रास्त्येव सन्देहः।।

## (1277) सौभाग्यशाली

सौभाग्यादेव जनो वाराणस्यां निवासमाप्नोति।
मन्ये प्रयागवासी ततोऽपि सौभाग्यशालीति।

## (1278) कौटिल्यम्

इह राजनीतिरेषा गच्छति गत्या सदा कुटिलयैव।
कौटिल्यमेव मन्ये स्वभाव इति राजनीतिविदाम्।।

## (1279) स्वानुभवः

स्वार्जित एवानुभवो हृदगारे ज्वलति कोऽपि दीप इव।
प्रभया तस्य जनोऽयं प्रभवति निर्णेतुमध्वानम्।।

## (1280) मितञ्च सारञ्च

अभिधेयं यदिहासीत् शब्दैरिह कैश्चिदेव तदभिहितम्।
अतिविस्तरेण किञ्चिद् व्याहर्तुं शिक्षिता न कला।।

## (1281) अन्धतमसम्

अन्धतमसमन्यादृशमेतद् यस्मिन् प्रवेशमासाद्य।
नहि कश्चिन्निर्गच्छति नामृत्योश्चैति चैतन्यम्।।

## (1282) सत्पुरुषाः

सत्पुरुषाणां साम्प्रतमत्यन्ताभाव एव सञ्जातः।
शुद्धान्तःकरणानामतिशयकरुणार्द्रचित्तानाम्।।

## (1283) कवित्वम्

कविरिति न जगन्नाथं सम्मन्यन्ते सचेतसो मन्ये।
द्वित्रा यदि मन्येरन् न तस्य सिद्ध्येत् कवित्वमिह।।

## (1284) मर्यादापुरुषोत्तमः

मर्यादापुरुषोत्तममाप्ता यद् राममाहुरस्माकम्।
विप्रतिपन्ना न वयं तस्मिन् विषये कदाचिदपि।।

## (1285) असन्तुष्टः

सर्वाण्यभिलषितानि प्रपूरितानीह किन्तु कस्यापि।
तदपूरिताभिलाषः प्रतिष्ठते हन्त सर्वोऽपि।।

**(1286) स्मृतयः**

उदयन्तीव स्मृतयस्तास्तास्तावत् तवैकपद एव।
त्वामन्तर्लीनामिव सन्ततमहमनुभवन्नस्मि।।

**(1287) मनुष्यत्वम्**

भावः किमपि महत्त्वं विशिष्य धत्ते मनुष्य-हृदयस्य।
वस्तुत आश्रितमेनं यत्किञ्चिदिदं मनुष्यत्वम्।।

**(1288) भारतीयत्वम् 5**

सीमां स्वस्य स्वस्य प्रकाममुल्लङ्घ्य सम्प्रदायस्य।
सर्वैर्मिलितैरेतत् सिध्येदिह भारतीयत्वम्।।

**(1289) भारतीयत्वम् 6**

परदुःखकातरत्वं परगुणपरमाणुपर्वतीकरणम्।
सुदृढञ्च सहिष्णुत्वं यत्किञ्चिद् भारतीयत्वम्।।

**(1290) तमसां वाणिज्यम्**

आरब्धं तमसामपि वाणिज्यं तावदेषु दिवसेषु।
तेजोभ्योऽपीदानीं तमांसि विपणौ महार्हाणि।।

**(1291) प्रणिपाताः**

प्रणिपातेषु द्वित्रास्तुभ्यं केचित् समर्पितास्तेषु।
त्वां यदि सम्प्राप्ताः स्युः सिध्येत् सौभाग्यमस्माकम्।।

**(1292) अस्तित्वम्**

त्वं सर्वत्रासीति श्रुतमस्माभिस्त्वदेकचेतोभिः।
अस्तित्वमेव केचित् तव शङ्कन्ते दिनेष्वेषु।।

**(1293) आप्ताः**

आप्ता यथार्थवादिन इत्यस्माभिः श्रुतं स्वपूर्वेभ्यः।
आप्तत्वं निर्णेतुं स्वस्मिन् बिभृमो न सामर्थ्यम्।।

**(1294) लोकः**

न बिभर्ति स्थायित्वं लोकमुपेक्ष्य प्रवर्तितं शास्त्रम्।
विषयः शास्त्रस्यान्यद् यदपि च लोकस्य विषयोऽन्यत्।।

**(1295) प्रेममार्गोपदेशकाः**

येषां हृदये प्रेम्णः स्पर्शोऽप्यनुभूयते न किञ्चिदपि।
उपदेशकास्त एव प्रेम्णो मार्गस्य संवृत्ताः।।

**(1296) सेतुबन्धः**

रामेण सेतुबन्धो जलधिमुपर्युपरि केवलं न कृतः।
जनसामान्यस्य कृतो हृदयोदधिमप्युपर्युपरि।।

**(1297) सौहार्दम्**

सुमनोभिः सौहार्दं ये चेष्टन्तेऽत्र सम्प्रवर्तयितुम्।
अनिवार्यमेव तेषां सान्निध्यं कण्टकैः सार्धम्।।

**(1298) प्रेम**

इह जगति प्रतिभाति प्रेमैकं किमपि वस्तु बहुमूल्यम्।
मृन्मयमिदमस्तित्वं हिरण्मयं भवति तेनैव।।

**(1299) दिदृक्षा**

दूरादप्यतिदूरान्निकटादतिमात्रमेव निकटाद् वा।
त्वामहमेष दिदृक्षे दिदृक्षमाणश्च संवर्ते।।

**(1300) धर्मः**

डिण्डिमघोषं कृत्वा स्वस्मिन् धर्मं यमत्र सूचयसि।
त्वयि धर्मः स कियानिति विनैव घोषं स जानाति।।

**(1301) नानात्वम्**

भारतमिदमस्माकं परिचय एकञ्च भारतीयत्वम्।
सत्यप्येवं वयमिह बिभृमः सुचिराच्च नानात्वम्।।

**(1302) अवदानम्**

राष्ट्रेण तुभ्यमर्पितमिह कियदिति वेत्ति नाम सर्वोऽपि।
राष्ट्राय तेऽवदानं किमिति जगन्नाथ! वक्तासि।।

**(1303) ग्रामवधूट्यः**

गीतानि तानि लोके श्रुतिपथमायान्ति नैषु दिवसेषु।
यानि ग्रामवधूट्यस्तालीशब्दैरिहागायन्।।

### (1304) हृद्देशः

हृद्देशमध्यतिष्ठद् रामो लोकस्य यं नु लोकेऽस्मिन्।
अधितिष्ठति तं मन्ये रावण एवैषु दिवसेषु।।

### (1305) प्रज्वलितम्

गृहमिव वह्निपरीतं विश्वमिदं दह्यमानमाभाति।
प्रज्वलितेऽस्मिंश्च कुतो हासः क्व च तावदानन्दः।।

### (1306) जागरूकः

अन्धो नायं लोको नायं लोकोऽस्ति कोऽपि बधिरश्च।
सुतरां स जागरूकस्तिष्ठति पश्यंश्च शृण्वंश्च।।

### (1307) काम-ककुद्मान्

दृप्ते कामककुद्मति धर्मेण प्रग्रहेण भाव्यमिह।
मुक्तोऽन्यथा स विचरन् लोकमिमं व्याकुलीकुर्यात्।।

### (1308) प्रमाणम्

वेदाः प्रमाणमथवा 'कुराण'शास्त्रं प्रमाणमित्यनयोः।
यः श्रद्धीत यस्मिन् स तदनुसारेण वर्तेत।।

### (1309) दीप-दानम्

देवायतने दीपान् प्रज्वालयतीह यः समुपगत्य।
प्रज्वालयेत् स दीपं निःस्वस्य च पर्णशालायाम्।।

**(1310) सनातनो धर्मः**

सम्प्रति जन-जनचेतसि नित्यमनास्थासु जायमानासु।
शङ्क्यमजन्यस्तित्वं सनातनस्यापि धर्मस्य।।

**(1311) दिव्यालोकस्य स्पर्शः**

मृन्मयमपि सौन्दर्यं हिरण्मयत्वं तदाभ्युपैतीव।
स इहालोको दिव्यः स्पृशेद् यदा कश्चिदीषदपि।।

**(1312) जगन्नाट्यम्**

इह संयोग-वियोगौ जीवन-मृत्यू च हास-रुदिते च।
जगदाख्यं वयमेते पश्यामः प्रत्यहं नाट्यम्।।

**(1313) मूलगन्धः**

वृन्दावनस्य भूमेः श्रीकृष्णं मूलगन्ध इति विद्धि।
दूरादुपेत्य भक्तास्तमात्मसात्कर्तुमीहन्ते।।

**(1314) काकपेयः**

सरितां गतिशीलः सन् जल-प्रवाहः प्रसादमायाति।
अवरुद्धे मलिनः सन् काकैः पेयः स भवतीह।।

**(1315) नारी**

कश्चिन्नारीमेनामबलेत्यधुनेह नावमन्येत।
जागरितेयमिदानीं स्वस्य कृते भागधेयस्य।।

## (1316) औदार्यम्

सुमहान् गुण औदार्यं गुणेषु नैकेषु मानवस्येह।
प्रतिभात्येष गुणो मे ह्रासं गच्छन् दिनेष्वेषु।।

## (1317) गृध्रः

अन्योन्यं क्षेत्रेऽस्मिन् मानसहंसेषु सम्मिलत्सु सुखम्।
गृध्रः पश्यति दूरादकिञ्चनो मौनमवलम्ब्य।।

## (1318) अवताडनानि

एतावन्तं विनयं जगति जगन्नाथ! माऽवलम्बस्व।
त्वमिहान्यथा लभेथाश्चरणैरवताडनानि जनात्।।

## (1319) नियन्त्रणम्

राष्ट्रस्यास्य बिभर्ति स्वेनोत्साहेन यो नियन्तृत्वम्।
स्वस्मिन्नपि कर्तव्यं नियन्त्रणं धीमता तेन।।

## (1320) ते केचिदन्ये

विदधानाः कोलाहलमुपेत्य सिंहस्य ये गुहाद्वारम्।
ते केचिदन्य एव क्रोष्टारस्ते न मन्तव्याः।।

## (1321) प्रेरणा निर्देशश्च

प्रेरयतीवादिकविर्निर्मातुं किञ्चिदन्तराविश्य।
निर्दिशति कालिदासो निर्मातव्यं त्वयैवमिति।।

## (1322) लोकहितम्

स्वान्त:सुखाय कवयो निर्माणे नित्यमेव संल्लग्ना:।
हितमपि लोकस्यास्य प्रयतितवन्तो विधातुमिह।।

## (1323) शब्दस्य सौन्दर्यम्

प्रत्येकमेव शब्दो बिभर्ति सौन्दर्यमात्मनोऽर्थञ्च।
कविरेव वेत्ति सुतरां प्रतिभावांस्तं प्रयुञ्जान:।।

## (1324) स्वजन:

अश्रुतमस्माभिस्त्वं यत्किञ्चिच्छ्रावय स्वकाव्यमिति।
कोऽपि जगन्नाथ! त्वामाह स्वजन: किमुपसृत्य।।

## (1325) राजनीतिज्ञा:

आप्ता इति मन्यन्ते प्रायो जगतीह राजनीतिविद:।
रामस्य रावणस्य न विषये तेष्वेकवाक्यत्वम्।।

## (1326) सहिष्णुत्वम्

रामे यादृशमासीत् सीमातीतं महत् सहिष्णुत्वम्।
तादृशमेषु दिनेषु प्रतिभाति न रामभक्तेषु।।

## (1327) सौन्दर्यम्

वास्तवमिह सौन्दर्यं भवति न किञ्चित् प्रसाधनापेक्षि।
ग्लानिं जनयति तस्मिन् प्रसाधनानां यदारोप:।।

**(1328) प्रेम**

आकर्षणमन्योन्यं यूनोर्यदपीह मन्यते प्रेम।
अतिरिक्तमेव तस्माद् भवति तदपि वास्तवं किञ्चित्।।

**(1329) रामः**

न स्वीकुरुतां कामं राममितः कोऽपि रावणो नाम।
रामस्तु प्रत्येकं हृद्देशं नित्यमध्यास्ते।।

**(1330) तेजः**

काममुलूका नैव स्वीकुरुतां नाम तेजसोऽस्तित्वम्।
नापोहितुमिह शक्यं कथमप्येतावता तेजः।।

**(1331) प्रत्ययः**

तस्य वचसि कः कुर्यात् प्रत्ययमेतर्हि भाषमाणस्य।
स्वं वक्तव्यं बहुधा यः स्वेनैवेह खण्डयति।।

**(1332) आशादीपः**

हृद्देहल्यामाशादीपः प्रज्वालितो मयाऽस्त्येकः।
आगन्तासीदानीमद्य श्वो वा परश्वो वा।।

**(1333) 'विस्फोटः'**

'जापाने' विस्फोटो योऽभूच्छ्रुतिगोचरः पुराऽस्माकम्।
तस्यातङ्कोऽस्माकं नापैत्यद्यापि हृद्देशात्।।

**(1334) प्रामाण्यम्**

स्वार्थकषायितचित्ताः किं किं कथयन्ति राजनीतिविदः।
कस्तान् शृणोतु येषां प्रामाण्यं वाचि नास्त्येव।।

**(1335) विजयः पराजयश्च**

केचित् पराजया अपि विजयस्येतो भवन्ति पर्यायाः।
विजयेषु केषुचिदितः पराजयः स्पष्टमाभाति।।

**(1336) मानवता**

दुःखाकरोति चेतो न तथा हिंसा प्रवर्धमानेयम्।
जनयति मानवता खलु साम्प्रतमियमाहता खेदम्।।

**(1337) सन्देशहराः**

तव सन्देशहराणां लब्धोऽस्माभिर्न तावदेकोऽपि।
विनिवृत्ता दौर्भाग्यादस्माकं ते महाभागाः।।

**(1338) अतृप्ताः**

मन्ये नास्माज्जगतः प्रातिष्ठत हन्त कोऽपि तृप्तः सन्।
य इतो याताः प्रायस्तेऽलमतृप्ता इतो याताः।।

**(1339) प्रेम**

व्यापारस्य विषयतां नीतं प्रेमापि वासरेष्वेषु।
प्रतिरथ्यं प्रतिनगरं विपणिषु विक्रीयमाणमिदम्।।

**(1340) विहगाः**

उद्यानादुड्डीय स्वं स्वं देशं गताः समे विहगाः।
भग्नाः क्षमे कुलायास्तेषामथ शून्यमुद्यानम्।।

**(1341) दीपः**

क्व प्राबल्यं तमसां दीपस्यैकस्य तत् क्व दौर्बल्यम्।
सत्यप्येवं विजयस्तमःसु दीपस्य सञ्जातः।।

**(1342) रामः**

रामो हृत्सिंहासनमारूढो भारतस्य राष्ट्रस्य।
रामस्य न ग्रहीतुं रामादन्योऽर्हति स्थानम्।।

**(1343) अग्निपरीक्षा**

काचिन्नाद्यप्रभृति स्त्री जीवन्त्यग्निसात् क्रियेतेह।
कस्याश्चित् सीताया नाग्निपरीक्षा प्रवर्त्येत।।

**(1344) संसारः**

प्रतिभाति मे कदाचित् संसारः क्षेत्रमेष धर्मस्य।
एष कदाचिच्छङ्खध्वनिभरितं तत् कुरुक्षेत्रम्।।

**(1345) हिंसा**

सुरसेव राक्षसीयं हिंसा व्यात्ताननाऽजनीदानीम्।
एतस्या उदरदरीं दुरन्तपूरेति जानीथाः।।

**(1346) वैराग्यम्**

नानुभवामि स्वस्मिन् यद्यपि वैराग्यमेष किञ्चिदपि।
इच्छामि गन्तुमेकस्तथापि जगतोऽतिदूरेऽस्मात्।।

**(1347) हिंसा द्वेषश्च**

हिंसा सर्वत्रैव द्वेषाग्निर्ज्वलति हृत्सु सर्वस्य।
आकाङ्क्षन्ते किममी सर्वमिदं यातु नाशमिति।।

**(1348) अविस्मरणीयम्**

विस्मर्तुं न हि शक्यं मातुः क्लिन्नेऽञ्चलान्तरे शयितम्।
विस्मर्तुं नहि शक्यः पत्न्याः सुदृढः स्वयङ्ग्राहः।।

**(1349) प्रत्ययः**

सत्यं न काव्यमार्गे नवं प्रयोगं वयं क्षमाः कर्तुम्।
प्रत्यय एष तु चेतसि सचेतसोऽनुग्रहीतारः।।

**(1350) फेत्कर्ता**

सिंहासनमधिरूढः कामं गर्ज त्वमद्य सिंह इव।
फेत्कर्तासि श्वस्त्वं सकरुणमवतारितस्त्वस्मात्।।

**(1351) उपहारः**

स्वान्तःसुखमेवालं वयमेतर्हि प्रशस्तिनिरपेक्षाः।
श्रीवाग्देव्याः पदयोः प्रशस्तिरूपोऽयमुपहारः।।

**(1352) प्रवेशो निषिद्धः**

नोलूकानामेतत् किन्त्वेतत् क्षेत्रमस्ति काकानाम्।
रात्रावपि नोपेत्य प्रगल्भतां कश्चिदेकोऽपि।।

**(1353) प्रियस्य च्छाया**

आरोपयन्तु कामं मयि केचिन्मूर्तिपूजकत्वममी।
मूर्तिष्वासु च्छायां पश्यामि स्वप्रियस्याहम्।।

**(1354) सङ्कोचशीलः**

एतावन्तं कालं स जगन्नाथोऽवसत् पुरेऽस्माकम्।
सकृदपि मिलितुं नागात् कीदृक् सङ्कोचशीलः सः।।

**(1355) भारतं रामश्च**

इच्छेर्यद्यवगन्तुं भारतमवगच्छ राममिह पूर्वम्।
प्रतिबिम्बितमिव चरिते भारतमाभाति रामस्य।।

**(1356) कविता**

निर्मातरि प्रथमतः प्रतिभानं साध्वपेक्षते कविता।
छन्दोव्याकरणादेर्गौणं पदमामनन्ति विदः।।

**(1357) रामः**

प्रथमं तावत् स्वीये हृदि प्रतिष्ठापितव्य इह रामः।
पश्चात् प्रतिष्ठितं तं देवायतनेषु कर्तासि।।

**(1358) क्रूरतमः**

एष मनुष्यो नासीत् क्रूरतमो हन्त पूर्वमेतावान्।
यावानेषु दिनेषु श्रुतिपथमस्माकमायाति।।

**(1359) रामः**

यस्य श्रावं श्रावं चरितं कुर्मः पवित्रमात्मानम्।
काल्पनिकमित्यधन्याः शृणुमः तस्यैवदाशरथेः।।

**(1360) गृध्नवः**

दुग्धाऽस्माभिः पृथिवी मनीषितं सागरोऽपि दुग्धश्च।
गृध्नुभिरस्माभिरसौ द्यौः सम्प्रति दोग्धुमारब्धा।।

**(1361) प्रतीक्षा**

सम्मोहनमुत्पाद्य स्वरेण शाखां समाश्रयस्यन्याम्।
पुनरागमं तवाहं प्रतीक्षमाणश्च तिष्ठामि।।

**(1362) कविता-पदम्**

स्पृश मद्रसनां वाणि! स्वेन करेण क्षणार्धमेकमपि।
विरसाऽपि मामकी वाक् धत्तां कविता-पदं येन।।

**(1363) प्रसूनम्**

विकसेज्जलस्य मध्ये न तदाश्चर्यं यदि प्रसूनं चेत्।
आश्चर्यं यद् विकसेत् क्वचन दृषत्खण्डयोर्मध्ये।।

**(1364) सुमनसः**

उपवनभवाः सुमनसो मनांसि केषां न जातु रमयन्ति।
मन्ये ताभ्योऽप्यधिकं काश्चिद् रमयन्ति पार्वत्यः।।

**(1365) हसितम्**

सुचिरान्मया प्रयतितं तस्य मुखे हसितमीषदानेतुम्।
अश्रुक्लिन्नमुखो योऽवर्तत नित्यं समक्षमिह।।

**(1366) अपराद्धः**

आनतवदनः स्वेदक्लिन्नललाटोऽश्रुभारभरिताक्षः।
अपराद्धानां पङ्क्तौ स जगन्नाथोऽपि दृश्येत।।

**(1367) नेतृत्वम्**

इह जनतायै येषामाश्वासनमेव वाच्यनुस्यूतम्।
नेतृत्वं खलु तेषां जातमकिञ्चित्करं जगति।।

**(1368) जगन्नाथः**

दृष्टो न जगन्नाथः प्रशस्तिगानार्थमागतेष्वेषु।
एतावानिह दम्भो भवति कवीनां न शोभायै।।

**(1369) सन्देशहरः**

तव सन्देशहरः स्यात् पठितुमशक्तः पुमानिति प्रायः।
अद्यावधि तव लीला जनयति सम्मोहमस्माकम्।।

**(1370) कुमतिः**

धर्मा दोषैर्भरिता अन्येषां सन्ति सम्प्रदायाश्च।
इति न क्षणमप्युदियान्मयि कुमतिरिति प्रार्थये विष्णो।।

**(1371) मुरली पाञ्चजन्यञ्च**

गोपालेन ध्वनिता भवता वृन्दावने कलं मुरली।
सारथिना च ध्वनितं स्वपाञ्चजन्यं कुरुक्षेत्रे।।

**(1372) निजता परता च**

उद्घाटिता न काश्चन वातायन्यो न दृग्विकासोऽभूत्।
निजता परतेति द्वे कथन्नु शक्ये निराकर्तुम्।।

**(1373) मथुरा अयोध्या च**

स्नाता तिष्ठति मथुरा प्रतीक्षमाणा प्रदीपमादाय।
वारो ममेत्ययोध्या कामयमाना भवन्तमिह।।

**(1374) मुम्बई**

अन्यैव काचिदेषा मोहमयी 'मुम्बई'इति विख्याता।
यस्याः सौन्दर्यस्यास्ति चाकचिक्यं किमप्यन्यत्।।

**(1375) निजत्वम्**

वाग्देवतावताराः कामं जगतीह सन्तु विद्वांसः।
रक्षितुकामो वर्ते लघु यत्किञ्चिन्निजत्वमहम्।।

**(1376) हृद्देशः**

काशी मथुराऽयोध्यास्तिस्रः कामं भवन्तु ते स्थानम्।
तव वस्तुतो निवासः सर्वेषामेव हृद्देशः।।

**(1377) मानवत्वम्**

राममनास्थाविषयं मन्वाना भारतेऽपि वर्तन्ते।
परमार्थतस्तु रामो विग्रहवन्मानवत्वमिति।।

**(1378) रामः**

मानवजातिर्लभते रामादद्यापि मार्गनिर्देशम्।
हन्त तदपि शङ्कन्ते रामस्यास्तित्वमिह केचित्।।

**(1379) जाड्यम्**

अन्योन्यं भ्रातृत्वं विहाय युद्धानि सम्प्रवर्त्यन्ते।
अवशिष्टं जनचेतसि यत्किञ्चिज्जाड्यमद्यापि।।

**(1380) धर्मः**

यद्यपि धर्मस्य वयं ध्वजमुत्तोल्य क्वचिन्न धावामः।
धर्मः प्रतिष्ठितो नस्तथापि हृदि कोऽपि देव इव।।

**(1381) पदचिह्नानि**

निक्षिप्तान्यस्माकं निजपदचिह्नानि यानि भुवि पूर्वैः।
अस्मभ्यं निर्देष्टुं गन्तव्यं तानि तावदलम्।।

**(1382) स्मृतिशेषाणि**

क्व सरांसि तानि कूजद्विहगानीह स्वरेण तारेण।
क्व च तान्युद्यानानि प्रसूनफलभारभरितानि।।

**(1383) रुदितानि**

उत्सवसम्मिलितानां भाव्यं कोलाहलेन नैतावत्।
यस्मिन्न श्रूयेरन् निःस्वानां स्वानि रुदितानि।।

**(1384) सुख-दुःखयोर्भोगः**

एकान्ते स्वं दुःखं सतेह धीरेण जगति भोक्तव्यम्।
स्वं सुखमन्यैस्तु समं विभज्य भोक्तव्यमित्याहुः।।

**(1385) जगन्नाथः**

न जगन्नाथः कथमपि जनसम्मर्देषु शक्यतेऽन्वेष्टुम्।
कमपि न चिह्नविशेषं बिभर्ति स हि येन लक्ष्येत।।

**(1386) काव्यतत्त्वज्ञाः**

ये विचरन्तो दृष्टाः काश्या रथ्यासु काव्यतत्त्वविदः।
रथमारूढा दिल्ल्या राजपथे तेऽत्र दृश्यन्ते।।

**(1387) वनराजः**

शिथिलीकर्तुं यस्य प्रभावमर्हन्ति नैव नागेन्द्राः।
किं छेत्स्यन्ति शृगाला वनराजस्येह तस्य वने।।

## (1388) रसिका भावुकाश्च

उपलभ्यन्ते रसिका न भावुकाश्च क्वचिद् दिनेष्वेषु।
न प्रवचनकाराणां भागवतस्येह दारिद्र्यम्।।

## (1389) मुग्धः

चतुरैश्चतसृषु दिक्षु व्याप्तास्वेतासु वासरेष्वेषु।
क्व जगन्नाथसमानां मुग्धानामस्तु मान्यत्वम्।।

## (1390) काव्यालापः

अतिदूरात् सम्प्राप्तैरवधातव्यं समैः कविम्मन्यैः।
अस्मिन् कर्मक्षेत्रे काव्यालापो निषिद्ध इति।।

## (1391) लोकः

प्रतिपदमेव निषेधान् विधींश्च शास्त्राणि निर्दिशन्तीह।
लोकः स्वातन्त्र्येण प्रवर्तते किन्तु विषयेऽस्मिन्।।

## (1392) विषयाः

मा धाव वीक्ष्य विषयान् जागतिकांश्चाकचिक्यसम्भरितान्।
वच्मि जगन्नाथ! त्वामेते तमसां प्रकारा हि।।

## (1393) दृष्टेरुन्मीलनम्

ग्रन्थकृतोऽभिनिवेशो वैदुष्यस्य प्रदर्शने भवति।
उन्मीलयन्ति दृष्टिं पाठकवर्गस्य केचित्तु।।

**(1394) अवतारा:**

विष्णोर्दशावतारा: क्वचिच्चतुर्विंशतिश्च निर्दिष्टा:।
संख्याऽनिर्दिष्टानां कियतीति न कोऽपि जानीयात्।।

**(1395) जगन्नाथ:**

प्रतिपादयन्ति बहव: पण्डितराजा निजं बहुज्ञत्वम्।
अल्पज्ञत्वं स्वीयं निवेद्य हृष्टो जगन्नाथ:।।

**(1396) जीवनकला**

जीवनकलामिदानीं प्रवचनकारा विनिर्दिशन्तीह।
न हि मौनादुत्कृष्टा काऽपि कला जीवनस्येह।।

**(1397) स्वाद:**

नास्मै मधुरं गीतं न रोचते शोभनञ्च सङ्गीतम्।
परिवर्तितो हि मन्ये स्वाद: कोऽप्यस्य जगतो नु।।

**(1398) गृध्रगोमायू**

स्वस्वार्थसाधनार्थं गृध्रा एकत्र सम्मिलन्तीह।
अन्यत्र च गोमायव आत्मोद्योगाय चेष्टन्ते।

**(1399) गन्धरूप:**

स्मृतिपथमानेतुं मामौत्सुक्यं यावदेव गन्तासि।
स्थास्यामि तावदेव त्वामभितो गन्धरूपोऽहम्।।

**(1400) विपणिर्जगत्**

विपणीभूतमिदानीं प्रायः प्रतिभाति पूर्णमेव जगत्।
यस्य यदिष्टं तदिह क्षमस्त्वरितमेव स क्रेतुम्।।

**(1401) कृषकः**

कृष्याजीवो जीवितुमर्हत्याश्रित्य नेह कृषिमेकाम्।
पिबति च विषमेतर्हि स्वेदजलैरश्रुभिश्च समम्।।

**(1402) रामः**

स्वीकुर्वन्त्वस्तित्वं कामं रामस्य नैव केचिदिह।
सन्तु कुशलिनस्त इतो येषां रामोऽस्ति सर्वस्वम्।।

**(1403) रामः**

तुलसीदासस्यास्तां रामस्त्वथवा कबीरदासस्य।
सर्वात्मनैव हृद्यः सोऽस्माकं भारतीयानाम्।।

**(1404) रामः**

यस्य तु यादृग्भावः पश्यतु रामं स तादृशं कामम्।
मन्यामहे तमीशं हृद्गतमिह सर्वभूतानाम्।।

**(1405) अपात्राणि**

साहित्यस्य क्षेत्रे क्षेत्रेष्वथवा कलाविशेषस्य।
पात्राण्यादाय करेऽधुना प्रविष्टान्यपात्राणि।।

**(1406) सुमनसः**

उद्यानं मां भूयः सुमनस आमन्त्रयन्ति सम्प्राप्तम्।
किन्तु निषिध्यन्तीमा कण्टकविद्धा मदङ्गुल्यः।।

**(1407) प्रेम्णः कथाप्रसङ्गः**

प्रेम्णः कथाप्रसङ्गो विराममेतु प्रकाममेतर्हि।
चर्चाया विषयोऽस्तु प्रासङ्गिकमेव यत्किञ्चित्।।

**(1408) लोकः शास्त्रञ्च**

दण्डविरहिता नौरिव लोकमुपेक्ष्य प्रकम्पते शास्त्रम्।
लोकश्च शास्त्रनावं गन्तुं नार्हेदुपेक्ष्यापि।।

**(1409) वाल्मीकिर्व्यासश्च**

वाल्मीकिनाऽर्पिता नौर्मह्यं व्यासेन कर्णधारश्च।
पर्याप्तमुभयमेतज्जगदुदधेः पारमुपगन्तुम्।।

**(1410) रामः**

नहि केवलमिह रामः सत्यं सत्यं रामस्य जगति नामापि।
रामः स एव वेदा निःश्वसितं यस्य मन्यन्ते।।

**(1411) आस्तिक्यबुद्धिः**

आस्तिक्यबुद्धिरेषाऽऽधारोऽस्तित्वस्य कश्चिदस्माकम्।
वयमेनामेवैते ब्रूमः श्रद्धेति चास्थेति।।

**(1412) प्राणाः**

आश्रित्यैव प्राणाः केषाञ्चित् सञ्चरन्ति धर्ममिह।
केषाञ्चिच्च प्राणा अर्थं वा काममाश्रित्य।।

**(1413) अनुभावः**

अनुभूयतेऽनुभावोऽनुस्यूतः केनचिन्मनुष्येण।
मन्ये स एव सुरभिः प्रसरति जगतीह कीर्तिः सन्।।

**(1414) पञ्जरबन्धः**

आमृत्योरनुभूतः पञ्जरबन्धः शुकेन केनापि।
तादृगनुभवो न स्यात् कस्यचिदपि मानवस्येह।।

**(1415) शान्तिः**

अस्त्येवालौकिकमिति तन्नु सुखं यदिह शान्तिरिति नाम।
सर्वः प्रचेष्टमानः सुखाय कस्मैचिदन्यस्मै।।

**(1416) स्वानुभवः**

सुकवेर्यस्मिन् कोऽपि स्वानुभवो न प्रकाशमायाति।
तद्व्यर्थशब्दमात्रं कवितेति नु शक्यते वक्तुम्।।

**(1417) स्निग्धा दृक्**

स्नेहः कदाचिदुदितो यस्यां दृशि हन्त न क्षणार्धमपि।
सा दृक् कोटरमात्रं द्रुमस्य कस्यापि शुष्कस्य।।

**(1418) नियति-पुरन्ध्री**

बिभ्राणा समयाख्यां नित्यं सम्मार्जनीं निजे हस्ते।
स्वगृहात् कच्चरजातं नियति-पुरन्ध्री निवारयति।।

**(1419) कविताया ग्राहकाः**

काले प्रवर्तमाने कविताया ग्राहका न लभ्यन्ते।
आदाय लेखनीं स्वां भ्रमन्ति कवयोऽत्र रथ्यासु।।

**(1420) आकर्षणम्**

'मुम्बय्या' लावण्यं 'कोलकतायाः' प्रसिद्धमाधुर्यम्।
श्रीश्च श्रीनगरस्य प्रमत्तमातन्वते चेतः।।

**(1421) प्रतीक्षा**

आमन्त्रणस्य पत्रं करात् कदाचित् तवैकमागच्छेत्।
इति चिन्तयंश्चिरस्य प्रतीक्षमाणोऽन्वहं वर्ते।।

**(1422) स्वोदरपूर्तिः**

न स्वर्गस्य न मुक्तेः कश्चिदुपायः प्रसङ्गतश्चिन्त्यः।
स्वोदरपूर्तेः केवलमस्ति प्रासङ्गिकत्वमिह।।

**(1423) गन्तव्यम्**

निन्दाः प्रशस्तयो वा विरमन्त्यत्रैव जगति सर्वेऽपि।
को जानीयादस्माज्जगतो याताः कुतो यान्ति।।

**(1424) मर्त्यः**

वागर्थयोः प्रवाहो यमुपस्पृश्यैति सार्थकत्वमिह।
देवः स नास्ति कश्चित् किन्तु जनो मर्त्यलोकभवः।।

**(1425) जगन्नाथः**

निर्दिशति स्म प्रायोऽङ्गुल्याऽऽमृत्योर्निजान् यतः शत्रून्।
न जगन्नाथं कश्चिन्मन्येताजातशत्रुरिति।।

**(1426) न नटो नापि सन्देशहरः**

न यथानिर्देशमहं वक्तुं प्रयते नटो यथा कश्चित्।
न च सन्देशहरोऽहं कस्यचिदत्रागतो भूत्वा।।

**(1427) नटत्वम्**

रङ्गगतेनामृत्योर्नटत्वमेवेह येन निर्व्यूढम्।
तस्य सुखं दुःखं वा को जानीयात् तमतिरिच्य।।

**(1428) स्वाश्रूणि मषीकृत्य**

कामं कोऽपि सचेता मद्भणितीर्मन्यतां न काव्यमिति।
सत्यं लिखिता एता स्वाश्रूणि मया मषीकृत्य।।

**(1429) प्रामाणिकत्वम्**

श्रावं श्रावं चेतसि हासः समुदेति मेऽत्र किं कुर्याम्।
प्रख्यापयन्ति केचित् स्वेन प्रामाणिकत्वमिह।।

**(1430) निद्रा-भङ्गः**

निद्राया भङ्गः स्याद् रवेण यस्येह नूपुरस्यापि।
शयितस्य तस्य पुरतो घण्टानादः कथङ्कारम्।।

**(1431) राजनीतिज्ञाः**

जनसम्मर्दस्य रवः प्रायो भवतीश्वरस्य सन्देशः।
श्रुतमप्यश्रुतमेते विदधति तं राजनीतिविदः।।

**(1432) सर्वसम्मतः पक्षः**

प्रचलिष्यति तावदयं वार्तालापः कियन्तमिह कालम्।
अन्वेष्टव्य पक्षः सर्वैरपि सम्मतः कश्चित्।।

**(1433) रामः**

अनुपस्थितमितिहासे रामं वक्तुं न तेऽस्ति सामर्थ्यम्।
रामस्योपस्थित्या भजति प्रामाण्यमितिहासः।।

**(1434) अकृतज्ञाः**

यैः स्वासूनुत्सृज्य स्वातन्त्र्यं प्रापितं कृतेऽस्माकम्।
तेषां कृतेऽकृतज्ञैरस्माभिर्हन्त किन्नु कृतम्।।

**(1435) विस्फोटः**

मूका इति न ज्ञेयास्ते ये भाषन्त इति न किञ्चिदपि।
तेषामपि भाषितमिह भवति कदाचिन्नु विस्फोटः।।

**(1436) प्रवचनकाराः**

प्रवचनकारैः कैश्चिद् रामायणमात्मसात्कृतं सम्यक्।
एतावता न सिद्धं तेष्वायत्तः स रामोऽपि।।

**(1437) हठवादः**

पन्था एव विचारे गन्तव्यत्वं यदैति केषाञ्चित्।
सत्येऽधिकृता वयमिति हठवादः कोऽप्युदेति तदा।।

**(1438) अनुभावः**

यद्यपि न जगन्नाथे प्रतीतिमायाति कश्चिदनुभावः।
सुरभि तथाप्यभितस्तं प्रतीयते किमपि तत्त्वमिव।।

**(1439) दंशः**

वृश्चिकसर्पादेरिह दंशानां भवति कश्चिदुपचारः।
उपचारः कोऽपि स्यान्न मनुष्यकृतस्य दंशस्य।।

**(1440) बाधः**

बाधाश्चलन्तमध्वनि जनमुपतिष्ठन्त्यवश्यमेवेह।
उपमृद्य तांश्च पद्भ्यामग्रे सर्तुं समुत्सहते।।

**(1441) अनिवार्यः**

भुवमागत्य नृपतयो गताः कियन्तो दिवं प्रतापजुशः।
निर्माणेऽत्र विधातुर्नाद्यावधि कश्चिदनिवार्यः।।

**(1442) जगन्नाथः**

न जगन्नाथस्यासीः सम्मिलितो दोषदर्शिषु वमिह।
अप्युपकृतं नु किञ्चित् तेनाकिञ्चित्करेण तव।।

**(1443) जगन्नाथः**

तिष्ठन्ति त्वयि बाणान् त्वां परितं केचिदत्र सन्धाय।
वच्मि, जगन्नाथ! त्वां स्थातव्यं सावधानतया।।

**(1444) कालनेमयः**

कस्यचिदप्यस्तित्वं सुरक्षितं नास्ति तावदेतर्हि।
नैकेषु कालनेमिषु वेषं परिवृत्य तिष्ठत्सु।।

**(1445) कवितापाठः**

वाचंयमत्वमेभिः साम्प्रतमवलम्बितं सचेतोभिः।
कवितापाठो गोष्ठ्यामरण्यरुदितं दिनेष्वेषु।।

**(1446) चाकचिक्यम्**

यत्किञ्चिदपि प्रस्फुरदिह सुतरामुत्सुकीकरोत्यस्मान्।
सामान्यतोऽधुना दृग् धावति नश्चाकचिक्यमनु।।

**(1447) स्वानुभवः**

स्वानुभवः प्रत्येकं जनस्य जगतीह तत्कृते सत्यम्।
सर्वात्मना तु सत्यं समनुभवेत् कश्चिदृषिरेव।।

**(1448) उपदेशाः**

उपदेशेषु सतामपि सम्यगकिञ्चित्करेषु जातेषु।
चौरैश्च दस्युभिश्च प्रारब्धं ताण्डवं स्वीयम्।

**(1449) पश्यतोहराः**

इह पश्यतोहराणां नगरे प्रतिरथ्यमेव बाहुल्यम्।
पर्यटकः कश्चिदपि प्रायो नावञ्चितो याति।।

**(1450) 'अमृतस्य पुत्राः'**

पूर्वैरुक्तं पुत्रा वयममृतस्येति तत् कियत् तथ्यम्।
सर्वमिदं म्रियमाणं प्रत्यक्षं यन्नु पश्यामः।।

**(1451) स्मृतिप्रदीपः**

एको मम हृद्देशे स्मृतिप्रदीपो निरन्तरं ज्वलति।
त्वामुपलक्ष्यान्यश्च प्रवाहितः कोऽपि गङ्गायाम्।।

**(1452) दीपस्य दैन्यम्**

दीपस्य तस्य दैन्यं नार्हति कोऽपीह किञ्चिदवगन्तुम्।
ज्वलनानन्तरमेवानिलेन निर्वापितो यः स्यात्।।

**(1453) छद्मज्ञानिनः**

ज्ञानिन इवाचरन्ति स्वात्मानं छद्मना य आच्छाद्य।
ते रक्षन्त्यात्मानं प्रायः सम्पर्कतः सुधियाम्।।

**(1454) सुस्मितम्**

येषां मुखेषु सुस्मितमुल्लसति प्रस्फुटप्रसूनमिव।
लोकस्यास्याभूषणमिति तान् मन्यामहे सुजनान्।।

**(1455) सम्पर्काः**

सम्पर्काः संसारे यथायथैवाप्नुवन्ति विस्तारम्।
सङ्कीर्णत्वं नश्यत् तथा तथा भाति लोकस्य।।

**(1456) सहगमनम्**

नगरस्यास्य प्रायः समे जना निर्दिशन्ति पन्थानम्।
किन्तु न सम्मन्यन्ते पदमपि केचित् समं गन्तुम्।।

**(1457) अनुवादः**

कवितामिह सुकवीनां प्रयतन्तेऽनूदितुं जनाः केचित्।
ज्ञानलवदुर्विदग्धस्तेषु प्रथमो जगन्नाथः।।

**(1458) कवितापदम्**

अवतारयन्ति सुधियः कवितां कवितापदात् कवेर्महतः।
कवितापदमकवेरपि कदाचिदारोपयन्ति मुदा।।

**(1459) स्मृतयः**

न सहस्रारामस्य स्मृतयोऽवतरन्ति किमपि मच्चित्तात्।
नैके मधुमासा मे प्रयागमधितिष्ठतो याताः।।

**(1460) सुकवयः**

सुकवीनां कवितासु स्मितमायाति स्फुरद्गिरां देव्याः।
केषाञ्चित् कवितासु तु निनादयन्तीव सा वीणाम्।।

**(1461) विषवृक्षः**

फलति स एवेदानीं प्रीत्या संवर्धितोऽद्भिरस्माभिः।
आरोपितो य आसीद् विषवृक्षः कैश्चिदुद्याने।।

**(1462) पुष्पोपहारः**

येषां चक्षुःशूलं दौर्भाग्याज्जातमस्मदस्तित्वम्।
पुष्पाण्युपह्रियन्ते सुरभीण्यस्माभिरिह तेभ्यः।।

**(1463) छिन्नमूलः**

लतया मयाऽऽश्रितो यस्तरुर्द्रढीयानितीह सुविचार्य।
स च्छिन्नमूल आस्ते प्रथमाघातेन वात्यायाः।।

**(1464) सत्यस्य रक्षा**

सन्ततमासीद् येषामसत्यमेवेह जीवनाधारः।
सम्प्रति त एव चिन्तां वहन्ति सत्यस्य रक्षायै।।

**(1465) चौर्यम्**

मैत्री तमोभिरासीच्चौराणां येषु ते गता दिवसाः।
दिवसेष्वेषु तु चौर्यं प्रतपति सूर्ये प्रकुर्वन्ति।।

## (1466) हुतवहपरीतम्

हुतवहपरीतमेतन्न केवलं हन्त राष्ट्रमस्माकम्।
सम्पूर्णमेव पृथिवी–मण्डलमाभाति तदवस्थम्।।

## (1467) तत्त्वावबोधः

शास्त्रार्थे पाण्डित्यं यदर्ज्यते पण्डितं परं जेतुम्।
नोपादेयः स विधिर्मन्ये तत्त्वावबोधाय।।

## (1468) हिंस्रत्वम्

हिंस्रत्वं नहि केवलमिह सीमितमस्ति केषुचित् पशुषु।
हन्त मनुष्येष्वेतत् प्रतीयते व्याप्नुवानमिव।।

## (1469) अध्यापनम्

अध्यापयामि तमहं योऽध्येतुं मदिह जातु कामयते।
अध्यापयितुं यो मामिच्छति तस्मादितोऽध्येमि।।

## (1470) अज्ञातः

अहमेवं नगरेऽस्मिन्नज्ञातोऽपरिचितश्च निवसामि।
नहि मामुपैति कश्चित् कुशलमपि प्रष्टुकाम इह।।

## (1471) दुग्धदोहा

त्यक्तं खगैः खमधुना प्रायः सरिदादयोऽपि जलरहिताः।
भगवत्येषा भूमिर्विभाति गौर्दुग्धदोहेव।।

## (1472) सौन्दर्यम्

साश्चर्यमहमपश्यं निर्माणं सुन्दरं विधातुरिदम्।
सौन्दर्यमस्य किन्तु क्षणे क्षणे क्षीयमाणमिव।।

## (1473) परिवर्तनम्

दीपशिखा इव दृष्टाः सञ्चारिण्यो निशासु या नार्यः।
ताः साम्प्रतं वमन्तीर्दृश्यन्ते धूमराशिमिव।।

## (1474) आतिथ्यम्

सुखशयनं नहि पृच्छेत् पृच्छेन्न च कोऽपि यत्र सुस्नातम्।
स्वीकुर्वन्त्यातिथ्यं तत्र न सुधियः कदाचिदपि।।

## (1475) दलिताः

कामं सन्तु मनुष्याकृतयो न तु वस्तुतो मनुष्यास्ते।
ग्रामटिकाः साम्प्रतमपि पशव इवाध्यासते दलिताः।।

## (1476) चेतःसरांसि

चेतःसरःसु सुतरां प्रत्यहमेवेह हन्त शुष्यत्सु।
कथमिव विकासमीयुर्हसितसरसिजानि सुरभीणि।।

## (1477) जगन्नाट्यम्

स्वार्थपरायणतायां नर्तक्यां सर्वतोऽत्र नृत्यन्त्याम्।
दर्शकसमाजरहितं प्रतीयमानं जगन्नाट्यम्।।

**(1478) द्यौः**

जलदाञ्चलेन शनकैः क्रोडगतं चन्द्रबालमाच्छाद्य।
प्रतिभाति द्यौरेषा पाययमाना स्फुरद्वदनम्।।

**(1479) सर्पाः**

सर्पाः प्रविशन्ति गृहान् नानारूपाणि विद्धि सन्धार्य।
अतिथीभूय कदाचित् सुहृदो भूत्वा कदाचिच्च।।

**(1480) छायामनु लग्नाः**

न हि तद्वृन्दारण्यं क्वचिदपि तन्नैव नैमिषारण्यम्।
धावामश्छायामनु लग्ना वयमेतयोरुभयोः।।

**(1481) निर्बलस्य बलम्**

नाहं भक्तिं जाने हृदि मे विश्वास एष इति जाने।
मम निर्बलस्य न परो बलं परं तावदहमेकः।।

**(1482) अपेक्षा**

दूरादजातपक्षा अन्नकणान् वर्धिता मयाऽऽनीय।
वृद्धाय तेऽपि मह्यं यत्किञ्चिद् दद्युरिति काङ्क्षे।।

**(1483) सुमनसां विक्रयः**

सुरभय इमाः सुमनसो वयं विधातुर्महार्हनिर्माणम्।
न्याय्योऽस्माकं विपणिषु वदत कियान् विक्रयो वणिजः।।

**(1484) तन्नेत्रे**

केन त्वयेह विधिना यापितमित्युक्तवान् कदाचिदहम्।
आस्तां क्षणं तदानीं तन्नेत्रे अश्रुभिर्भरिते।।

**(1485) प्रसादपात्रम्**

अवसादस्य न पात्रं न वा विषादस्य पात्रमहमासम्।
दैवात् तथापि पात्रं नाहमभूवं प्रसादस्य।।

**(1486) स्नेहः**

सुघटितमासीद् यद्यपि मेलापकमावयोर्न 'कुण्डल्योः'।
स्नेहस्तथापि सहजः कोऽप्यासीदावयोर्मध्ये।।

**(1487) वृत्तान्तः**

विगतानां दिवसानां मदन्तिकं कोऽप्युपेत्य मां पृच्छेत्।
अथवा मद्वृत्तान्तो जीर्णत्वं यातु मय्येव।।

**(1488) मानवः**

निर्माणेषु विधातुः सर्वेष्विह सुन्दरेषु किञ्चिदिदम्।
सुन्दरतममिति मन्ये निर्माणं मानवेत्याख्यम्।।

**(1489) माता भूमिः**

सर्वेषामपि माता वितता जगतीह भूमिरेकैव।
पुष्पमयी कस्मैचित् कण्टकमय्यस्ति कस्मैचित्।।

## (1490) विस्तारः सङ्कोचश्च

विस्तारे मन्यन्ते सुखमिह केचिच्च केऽपि सङ्कोचे।
गगनं गृहमिति केचिन्नीडं केचिच्च मन्यन्ते।।

## (1491) सामञ्जस्यम्

सत्स्वपि सामञ्जस्यं भुवि शक्यं केषुचिद् विरोधेषु।
इति सुविचार्य तदर्थं सुधियः सर्वे प्रवर्तन्ते।।

## (1492) प्रमत्तः

साधनतां नेष्यन्ति त्वां स्वार्थस्येह सिद्धये वणिजः।
न जगन्नाथ! कदाचित्त्वया प्रमत्तेन भवितव्यम्।।

## (1493) अप्रमत्ताः

व्याधः प्रसार्य जालं प्रविकीर्यान्नानि तिष्ठति च्छन्नः।
अस्माभिरप्रमत्तैः पतत्रिभिश्चापि भवितव्यम्।।

## (1494) नटानां वाचः

वाचो यत्र नटानां प्रमाणमिति सर्वथैव मन्यन्ते।
तस्माद् गतैः सुदूरं क्वचिदस्माभिस्तदुषितव्यम्।।

## (1495) कोलाहलः

रक्षाणि स्वं दूरं गत्वा कोलाहलात् कुतोऽप्यस्मात्।
रक्षिष्यामि तु विधिना स्वान्तःकोलाहलात् केन।।

**(1496) स्मृतिः**

माधुर्यस्य न तस्यापैत्यद्यापि स्मृतिर्मम स्वान्तात्।
मम वस्तुत आधारोऽस्त्यस्यास्तित्वस्य सैवेह।।

**(1497) मतवादाः**

नाद्वैते न विशिष्टाद्वैते च क्वचन पक्षपातो नः।
मतवादाः सर्वेऽपि प्रभुं तमेवोपधावन्ति।।

**(1498) क्षुण्णः पन्थाः**

अवलम्बितस्तृतीयो न जगन्नाथेन कश्चिदिह पन्थाः।
सर्वेऽपि क्षुण्णे पथि गन्तुं प्रयतन्त एतर्हि।

**(1499) प्रतीक्षितः**

अस्माननु नाह्वानं कस्यचिदद्यावधीह समुपेतम्।
परिवृत्यागच्छाशु प्रतीक्षितोऽसि त्वमस्माभिः।।

**(1500) भेदः**

भिन्नः स्वरो न केवलमद्य लयोऽप्यस्ति सर्वथा भिन्नः।
वाद्यानां परिवृत्तेर्भिन्ना सङ्गीतशालाऽपि।।

**(1501) ज्योतिः**

अनुसन्धानं प्रथमं प्रतिभातीदं न किं मनुष्यस्य।
यदिदं मृन्मयपात्रे प्रकाशमानं लघुज्योतिः।।

**(1502) हिंसा**

उच्छेदाय न तस्याः कश्चिदुपायः प्रतीतिमायाति।
हिंसेति राक्षसी या मनुष्यहृद्देशमध्यास्ते।।

**(1503) अपराजितः**

स जगन्नाथो यद्यपि पराजयस्यास्ति कोऽपि पर्यायः।
प्रतिभात्यपराजित इव तथापि कोऽप्येष हृदयेन।।

**(1504) श्रीकालिदासः**

श्रीकालिदास आस्ते स्वर्गोद्यानं नवं कृतेऽस्माकम्।
वागर्थौ प्रतिभातो यस्मिन् सुरभीणि पुष्पाणि।।

**(1505) जनसम्मर्दः**

न जगन्नाथस्य कृते जनसम्मर्दः कदाचिदनुकूलः।
तदपि तमेवानुसरन् पथि प्रयततेऽन्वहं गन्तुम्।।

**(1506) पश्चात्कृतः**

धावन्नासीदग्रे यः सर्वेभ्योऽपि नाम धावद्भ्यः।
स जगन्नाथः सम्प्रति सर्वैः पश्चात्कृतो याति।।

**(1507) उद्धारः**

कामं समुद्धृताः स्युर्नैके जगति त्वया जगन्नाथाः।
त्वदपेक्षत उद्धारं जगत्यनाथो जगन्नाथः।।

**(1508) वासः**

स्वर्गस्तिष्ठति ते क्व क्व तावकं वर्तते च वैकुण्ठम्।
अप्यर्हति सामान्योऽस्मादृग् वासं तयोः कर्तुम्।।

**(1509) कालिदासः**

रामायणमभ्यस्याभूदेकः कालिदास इति मन्ये।
अभ्यस्य कालिदासं शतमजनि तु कालिदासानाम्।।

**(1510) नहि रोचन्ते**

अन्तस्तत्त्वविरहिता उपर्युपरि चाकचिक्यसम्पन्नाः।
रोचन्ते नहि मह्यं जनिता अपि भारते क्वचन।।

**(1511) स्त्रीत्वम्**

स्नेहेन प्रस्फुरदिव गेहे गेहे विरम्य सञ्चारि।
मृन्मयमपि प्रतीतं हिरण्मयं स्त्रीत्वमिति मन्ये।।

**(1512) परिवर्तनम्**

नभसः पारं यावद् यूनोड्डीनं मया स्वपक्षाभ्याम्।
अधुना वृद्धेन सता नीयन्ते नीडके दिवसाः।।

**(1513) कौटिल्यम्**

शाश्वतिकोऽस्ति विरोधो येषां ते बिभ्रतीह सौहार्दम्।
मन्येऽवश्यं केनचिदिह कौटिल्येन भाव्यमिति।।

## (1514) संख्याबलम्

संख्याबलमेतर्हि प्रबलतरं सर्वथा बलाद् बुद्धेः।
द्वित्रानुच्छेद्य शुकान् काकैराच्छन्नमुद्यानम्।।

## (1515) हिंस्रः

हिंस्रः कोऽपि पशुर्वाऽथवा नरः कश्चिदेष सामान्यः।
धर्मद्वयावगाहि ज्ञानं कञ्चिद् विलोक्य स्यात्।।

## (1516) अभेद-बुद्धिः

सत्यपि भाषाभेदे सत्यप्युभयोश्च वक्तृभेदेऽपि।
श्रीमद्भागवतान्मे न कुराणं भिन्नमाभाति।।

## (1517) लोकमान्यत्वम्

क्षुद्रत्वेन स्पृष्टा न व्यवहारा न वा विचाराश्च।
येषां त एव मन्येऽर्हन्ति जगति लोकमान्यत्वम्।।

## (1518) नीरक्षीरविवेकः

सुचिरादितः क्व याता हंसा उड्डीय को नु जानीयात्।
नीरक्षीरविवेको गुणोऽपि तैरेव सह यातः।।

## (1519) असहायः

सन्ततमुड्डयमानो योऽज्ञासीज्जातु नैव विश्रामम्।
क्षतपक्षतिर्गरुत्मान् भुवि पतितः सोऽसहाय इव।।

### (1520) मयूरः

कस्मान्नृत्यमशिक्षि त्वया मयूरेण कानने वसता।
अपि नर्तकोऽसि सहजोऽपि वा गुरुस्तावको जलदः।।

### (1521) सतां सङ्गः

भूमावस्यां सन्तः सदैव सर्वत्र सन्ति विचरन्तः।
सङ्गः परमिह तैः सह सौभाग्यादेव सम्भवति।।

### (1522) काव्यचर्चा

न जगन्नाथस्याहं प्रभावमङ्गीकरोमि गोष्ठीषु।
पश्याम्यनुपस्थितमित आसु च तं काव्यचर्चासु।।

### (1523) नाटिका

पात्रं प्रविशति सर्वं स्वमेव सुखमेकमात्रमुद्दिश्य।
अहमहमिकेति नाम्नी प्रदर्श्यते नाटिका रङ्गे।।

### (1524) खिलीकृतः

एतावन्तं कालं खिलीकृतः सर्वथाऽस्मि युष्माभिः।
अभिलाषा मत्पिण्डं त्यजत दयध्वं दयध्वमरे।।

### (1525) क्रीडाक्षेत्रम्

क्रीडाक्षेत्रं कस्य क्रीडाकुशलस्य हन्त सर्वमिदम्।
एको नीलपटेन क्रीडत्यावृत्य यो नु स्वम्।।

**(1526) वाग्जालम्**

वाग्जालेन कवित्वं प्रख्यापयितुं यतन्त इह केचित्।
न जगन्नाथ! समुचितः प्रतिभाति त्वत्कृतेऽवसरः।।

**(1527) वाराणसी**

वाराणसि! त्वमेका जगति गुरूणां शिवार्थतत्त्वविदाम्।
प्रथिताऽसि राजधानी प्रणिपाताः सन्तु नस्तुभ्यम्।।

**(1528) धर्मः**

क्लिश्यति धर्मः कैश्चिद् विनिगडितो हन्त कर्मकाण्डेषु।
अन्तःप्रज्वलितस्य तु यश्चैतन्यस्य पर्यायः।।

**(1529) सन्देशहरः**

कश्चित् सन्देशहरः सन्देशं तस्य शीघ्रमादाय।
आयास्यतीति चेतसि मम जागर्तीव विश्वासः।।

**(1530) अमृतकुम्भः**

न परीक्षिते नृपतये केवलमयमर्पितः शुकेनेह।
श्रीमद्भागवताख्योऽमृतकुम्भः किन्तु सर्वस्मै।।

**(1531) मतिभेदः**

मतिभेदः साम्प्रतमपि जने जने शक्यते समुन्नेतुम्।
मनुतेऽम्बेडकरं बहु कोऽपि तथा गान्धिनं कोऽपि।।

**(1532) 'दीपशिखा'**

नहि पाणिनिरभ्यस्तः पतञ्जलिर्दूरतोऽपि न स्पृष्टः।
इह यत्किञ्चिदधीतं दीपशिखामग्रतः कृत्वा।।

**(1533) हिंस्रत्वम्**

बुद्धमहावीराभ्यां प्रवर्तितैर्नापयातमुपदेशैः।
अपयास्यति हिंस्रत्वं कदा मनुष्यस्य हृद्देशात्।।

**(1534) अनुभावः**

कस्यापि भवति तुङ्गो हिमगिरिरिव कोऽपि तावदनुभावः।
किञ्च भवति कस्यापि स सुगभीरस्तोयराशिरिव।।

**(1535) 'गीतगोविन्दम्'**

विस्मृत्य मेघदूतं विस्मृत्य च भामिनी–विलासमिह।
न जगन्नाथ कथं रे गायसि मृदु गीतगोविन्दम्।।

**(1536) विदूषकाः**

नैके कविरूपधरा विदूषकाः सन्ति तावदधिगोष्ठि।
तिष्ठ जगन्नाथ! न रे मिषेण केनापि निर्गच्छ।।

**(1537) महाकालः**

ऋतवः केषाञ्चिद् दृशि कामं विलसन्तु षड्विधा लोके।
मम दृशि जागर्त्येको ग्रीष्माभिन्नो महाकालः।।

**(1538) दीपः**

प्रसृते तमसीदानीं दृक्पथमायाति नेह किञ्चिदपि।
सुहृदः! सम्प्रति कश्चिज्झटिति प्रज्वाल्यतां दीपः।।

**(1539) सूर्यः**

अभिलक्ष्य पश्चिमामनु धावन्त्येते दिशं नु सर्वेऽपि।
सूर्यस्तत एव गतः साम्प्रतमिति सन्निधार्य धियम्।।

**(1540) मधु कूजितम्**

कोलाहलेन भरितं काकानां बाढमेतदुद्यानम्।
न मधावप्यश्रूयत पिकस्य मधु कूजितं किञ्चित्।।

**(1541) वक्तृषु गणितः**

परिगण्यते स्म सुचिराद् यः श्रोतृषु सर्वथा गभीरेषु।
स जगन्नाथोऽकस्माद् वक्तृष्वेतर्हि परिगणितः।।

**(1542) खगेषु श्रेष्ठत्वम्**

काकभुशुण्डय एते कुलजाः काकाः स्म इति सुसिद्धमिह।
सर्वेषां विहगानां मध्ये श्रेष्ठत्वमस्माकम्।।

**(1543) कवितापदम्**

कोऽपि सुगन्धो यस्य स्पर्शादायाति वाचि माधुर्यम्।
मन्ये तेन तु सा वाक् धत्ते कविता-पदं झटिति।।

**(1544) प्रेम**

प्रेम स्वमिह न वचसा व्यनक्ति किमपीह कर्मणा किन्तु।
उपयोगो ग्राम्यत्वं प्रेमाभिव्यक्तये वाचाम्।।

**(1545) प्रामाणिकः**

मन्यत एष जनोऽयं प्रमाणमिह निर्णये यथार्थस्य।
प्रामाणिको जनेषु तु सुदुर्लभस्तावदिति मन्ये।।

**(1546) सन्तः**

लभ्यन्ते न क्वचिदपि ते सन्तो हन्त वासरेष्वेषु।
येषामन्तःकरणप्रवृत्तिरेव प्रमाणमिह।।

**(1547) अपशकुनम्**

कस्मिन्नुद्याने स्वं नीडं परिकल्पयेदियं विहगी।
अपशकुनमिति निवासो निवार्यतेऽस्या यतो याति।।

**(1548) सचेतसामभावः**

अत्यन्ताभावः किं सचेतसां जात एषु दिवसेषु।
यदिह जगन्नाथोऽपि प्रसिद्धिमाप्तः परां कविषु।।

**(1549) सुधियः**

यात्रां प्रवर्तयन्ति स्वे हस्ते बुद्धि-दीपमाधाय।
सुधियो निश्चिन्वन्ति स्वं स्वेनैवेह पन्थानम्।।

**(1550) मार्गस्य निर्देशः**

त्वत्तो यैर्निर्देशो लब्धो मार्गस्य ते विहाय त्वाम्।
निद्रितमग्रेऽगच्छन् न जगन्नाथ! त्वमज्ञासीः।।

**(1551) दीपः**

शूद्र-ब्राह्मणयोर्वा निःस्व-धनिकयोर्न वेत्ति भेदमसौ।
दीपो ज्वलति समेषामभक्तिभेदेन गेहेषु।।

**(1552) सौन्दर्यम्**

सौन्दर्यं नेषदपि स्पृष्टं तदिहास्ति कृत्रिमत्वेन।
प्रेक्षस्व ग्राम्यानामनलङ्कृति धूलिधूसरितम्।।

**(1553) 'ओङ्कारः'**

अन्तर्हितं रहस्यं न कवित्वस्यैव केवलस्यास्मिन्।
सङ्गीतस्यापि परं य एष 'ओङ्कार' इति शब्दः।।

**(1554) प्रवीरः**

अवरोद्धुमस्य चरणौ न पर्वताः नापि सागराः शेकुः।
श्रान्तं श्रान्तेनापि न पथि चलतेह प्रवीरेण।।

**(1555) प्रतीक्षा-विषयः**

यदिह ग्राहकवर्गः प्रतीक्षते विपणिकेन्द्रमागत्य।
विक्रेतारो विपणौ तद्वस्तु स्थापयन्ति मुदा।।

**(1556) प्रवचनकारा:**

रामायणमाश्रित्य प्रवचनकारा मिलन्ति सर्वत्र।
रामायणस्य येषु प्रभाव इव लक्षितो नैव।।

**(1557) करुणार्द्रचित्तत्वम्**

कस्य न हृदयं भग्नं नेत्रे कस्याश्रुभिर्न च क्लिन्ने।
कारुणिक! पश्यतस्ते क्व गतं करुणार्द्रचित्तत्वम्।।

**(1558) कलह:**

स्वार्थस्य सिद्धिरेषामस्तित्वस्य प्रधानमुद्देश्यम्।
प्रत्यहमेषां कालो गच्छत्यन्योन्यकलहेन।।

**(1559) विहगा:**

कञ्चित् कालं स्थित्वा निवर्तितार: पुन: स्वदेशममी।
दूरादागन्तारोऽतिथय इव स्मो वयं विहगा:।।

**(1560) अदूरदर्शित्वम्**

बिभ्रत्यादर्शत्वं प्रवर्तमाने नटा युगेऽस्माकम्।
एतावतैव सिद्धं यत्किञ्चिददूरदर्शित्वम्।।

**(1561) महाकवि:**

श्रोताऽथ पाठको वा मिलति न कुत्रापि यत्कवित्वस्य।
पङ्क्तौ महाकवीनां जनै: प्रतिष्ठाप्यते सोऽपि।।

**(1562) किरणः**

प्रातर्जागरयति मां प्रविश्य मम नीडकं शनैः किरणः।
रुग्णं मामुपचर्य च शनकैर्निर्याति सायं सः।।

**(1563) 'वन्दे मातरम्'**

कामं 'वन्दे मातरमि'ति गीतं राष्ट्रियं न गीतं स्यात्।
भारतवास्तव्यानामेतद् गीतं तु हृद्गीतम्।।

**(1564) डिण्डिमघोषः**

धनिका धनिकतराः स्युर्निःस्वाः स्युर्यदि च हन्त निःस्वतराः।
कोऽयं विधीयमानो डिण्डिमघोषो विकासस्य।।

**(1565) ऐक्यम्**

कामं समर्थयन्तां तिलतण्डुलयोरिहैक्यमथ केचित्।
नीरस्य क्षीरस्य च तदैक्यमस्मत्कृते काम्यम्।।

**(1566) जगन्नाथः**

न जगन्नाथो वाणीं विपणिषु विक्रेतुमेष आयातः।
किन्तु किमपि निर्देष्टुं किन्तु किमपि चेह सन्देष्टुम्।।

**(1567) लोकः**

एष विभज्य विभज्य त्वया विकीर्णः सहस्रधा लोकः।
द्रक्षसि सत्यप्येवं स्थास्यत्यविभक्त एवैषः।।

## (1568) कौबेर्यम्

कौबेर्यमेव चरमं लक्ष्यं स्वस्येह केऽपि मन्वानाः।
स्वजनातिरिक्तजनगणमुपानयन्ति स्वसाधनताम्।।

## (1569) विनतः

कोऽप्यागच्छेदेनं मिलितुं गच्छेद् विना स सङ्कोचम्।
क्रियतां स जगन्नाथो विनतो न तु दम्भसम्पन्नः।।

## (1570) जन्मभूमिः

सम्पूर्णमेव भारतमेतद् रामस्य जन्मभूमिरिति।
ये मन्यन्ते तेषां कृते त्वयोध्येति गौणोऽर्थः।।

## (1571) सङ्गमः

गङ्गाऽपि सैव सुतरां प्रयागमाप्ता च सैव यमुनाऽपि।
न सितासितयोरुभयोरभिरामः सङ्गमः सैषः।।

## (1572) जगन्नाथः

तं मुग्धं मन्वानैरुपेक्षितोऽस्माभिरिह जगन्नाथः।
कवितापाठार्थमहो स इदानीं मञ्चमध्यास्ते।।

## (1573) वैपरीत्यम्

किञ्चिदपीह स्वत्वं मुग्धेनारोपितं मया यस्मिन्।
परकीयत्वं तेन प्रकटितमत्यर्थधृष्टेन।।

## (1574) मनुष्याः

जगति कलामर्मज्ञाः सुलभाः सुलभाश्च जगति विद्वांसः।
न मनुष्येषु मनुष्याः क्वचिदपि सुलभाः परं जगति।।

## (1575) सामञ्जस्यम्

येषां वक्रः पन्था वक्रं गन्तव्यमपि गतिर्वक्रा।
तेषां सामञ्जस्यं कथन्नु तैर्येषु सारल्यम्।।

## (1576) प्रणम्या देवता

हसितेषु यस्य भिन्नो यस्य सदा वीक्षितेषु भिन्नोऽर्थः।
दूरादेव प्रणतिर्वरमिह तस्मै हि देवाय।।

## (1577) भेकाः

अनभिमतः सम्पर्को यैः सह मे सर्वथैव जगतीह।
तैः सह यापयितव्यं भेकैः कालं कियन्तमिह।।

## (1578) प्रशस्तिपत्रम्

समनुभवामो लज्जां विदुषां गोष्ठीषु येन कृत्येन।
आकाङ्क्षन्ते केचित् प्रशस्तिपत्रन्नु तेनैव।।

## (1579) दीपः

सस्नेहंवर्तिकाजुषि सुमृन्मये लघुनि पात्र एकस्मिन्।
योऽग्नेः शिखया योगः स दीपमस्तित्वमानयति।।

**(1580) मृत्युः**

मृत्युः प्रतीक्षमाणः स्वावसरं व्याध इव समाच्छन्नः।
निकटे तिष्ठति जन्तोर्बाणं धनुषीव सन्धाय।।

**(1581) देवभाषा**

प्रश्नोऽयमन्तरसकृद् गच्छन्नुदयं करोति विकलान् नः।
अप्यमृतायां कविता म्रियमाणा देवभाषायाम्।।

**(1582) आतङ्कवादः**

आतङ्कवादनामा मेघाडम्बर उदीयमान इव।
उत्साहवात्ययाऽपि क्षण उत्थातव्यमेतस्मिन्।।

**(1583) कलिप्रभावः**

अपि कलिकालस्यास्य प्रभाव एषोऽथवा किमप्यन्यत्।
विषदिग्धानि जनानां मुखेषु हसितानि दृश्यन्ते।।

**(1584) सौहार्दम्**

मरुतां गत इव सम्प्रति जनसामान्यस्य हन्त हृद्देशः।
दिवसेष्वेषु प्रायः सुदुर्लभं हृत्सु सौहार्दम्।।

**(1585) गृध्नुत्वम्**

अध्यास्ते प्रत्येकं हृद्देशं कोऽपि गृध्र एतर्हि।
गृध्नुत्वमेव जातं कलिकालस्यास्य पर्यायः।।

**(1586) शब्दाडम्बरः**

दिवसेष्वेष्वपि तेषां नाभावो लक्ष्यते कुतश्चिदपि।
शब्दाडम्बरमात्रं य इतः कवितेति मन्यन्ते।।

**(1587) ईहितम्**

सायं श्रान्तमुपागतमभ्युपगत्याशु कोऽपि मां द्वारि।
स्मयमानः पश्येदिति मदीहितं नैव सिद्धमिह।।

**(1588) किं मन्तव्यम्**

नैतानहं हसतो मिलतोऽन्योन्यञ्च वीक्ष्य मन्तव्यम्।
सौहार्दमेषु दृढमिति किन्त्वहिनकुलं किमप्येषु।।

**(1589) अनैराश्यम्**

तस्य द्वारं मह्यं नामिलदुद्घाटितं कदाचिदपि।
परमनुभवामि नाहं निराशमात्मानमद्यापि।।

**(1590) अर्थः**

चरमः पुरुषार्थोऽजनि साम्प्रतमर्थोऽर्थमात्रमेवेह।
अध्यासत एवार्थं प्रायः सर्वेऽपि सम्बन्धाः।।

**(1591) नाट्यप्रपञ्चः**

प्रायोऽतृप्ता एव प्रस्थानं कुर्वते जना जगतः।
नाट्यप्रपञ्च एष प्रवर्तितो रे त्वया कस्मात्।।

## (1592) मनुष्यत्वम्

धूर्तत्वेन कदाचित् कामं विद्वत्सु कोऽपि मान्यः स्यात्।
न मनुष्यत्वं कथमपि शक्यं किन्तु प्रमाणयितुम्।।

## (1593) अन्वेषणम्

भूमौ भ्रामं भ्रामं नान्विष्यन्ते मया सुवर्णानि।
अन्विष्यामि तु तद् यत् स्पृष्टमयः स्वर्णतां नयति।।

## (1594) सुमनसः

उद्यानेष्वस्माकं कुतः समारोपिताः समानीय।
गन्धविरहिताः सुमनस इमा विविधवर्णवत्योऽपि।।

## (1595) सहचराः

सहचरतां चलतो मे द्वित्रा वा पञ्चषा गता नूनम्।
स्वेन स्वेन पथा ते विनिर्गतास्तावदेकोऽहम्।।

## (1596) नीड-निर्माणम्

यस्मिन् वृक्षे स्वमहं नीडं निर्मातुमेकमिच्छामि।
अस्माभिरधिकृतोऽसाविति कतिचिन्मामुपेत्याहुः।।

## (1597) भाग्य-भेदः

यदहं स्थानमवाप्तुं यत्नमकार्षं चिरस्य कांश्चिदमून्।
अल्पीयसा श्रमेण स्थितांस्तदध्यास्य पश्यामि।।

## (1598) हिंस्रत्वं मनुष्यत्वञ्च

न मनुष्यत्वं तत्र स्थातुं शक्नोति यत्र हिंस्रत्वम्।
नैव मनुष्यास्ते खलु हिंस्रत्वं येषु किञ्चिदपि।।

## (1599) घण्टानाद:

आरुह्य प्रासादं घण्टानाद: कृतस्तु सकृदेव।
अयमागच्छामीति श्रुतं दिशाभ्यश्च चतसृभ्य:।।

## (1600) स्वानुभव:

समुचितशब्दाभावात् स्वानुभव: कोऽपि न स्फुटीभवति।
कोऽपि च वाग्व्यवहार: स्प्रष्टुं किञ्चिन्न सम्मनुते।।

## (1601) प्रवेश:

द्वारि मया तव नैके पुष्पोद्यानस्य यापिता दिवसा:।
तस्मिन् मम प्रवेशो न कठोरेण त्वयाऽनुमत:।।

## (1602) वैकल्यम्

उपगन्तुं प्रेयांसं वैकल्यं यादृशं नु युष्मासु।
युष्मत्तटेष्वटाम्यहमध्येतुं तादृशं सरित:!।।

## (1603) क्रमोन्नति:

पूर्वं पदातिरासं ततो रथेनाचलं सवेगेन।
एषु दिनेषु प्राय: करोमि यात्रां विमानेन।।

## (1604) चौर्यस्य प्रकारा:

जनसामान्येनेत: कथमपि शक्या न ते प्रकल्पयितुम्।
आविष्कृता: प्रकाराश्चौर्यैरेतर्हि चौर्यस्य।।

## (1605) सुमनस:

सुमनस इति पर्यायश्चेतो हरतीव मे प्रसूनस्य।
बहुवचनान्तस्त्रीत्वे द्वे अपि मे नैव रोचेते।।

## (1606) धूमराशि:

दिक्षु प्रदिक्षु सुरभि: पवन इव प्रेम सम्प्रति प्रसृतम्।
तद् बाधितुमिव हिंसा प्रवर्धते धूमराशिरिव।।

## (1607) आलोक:

काम्य: स न प्रतापो विकल: स्यात् सर्व एव येनेह।
आलोक: स तु काम्यो हिताय सर्वस्य य: सिध्येत्।।

## (1608) राजहंसा:

मानससरोविहार: क्षेत्रं येषामिहाधिकारस्य।
न्याय्य: कियान्निवासो भेकै: सह पल्वले तेषाम्।।

## (1609) प्रयाग:

सम्पूर्णमेव भारतमेतत् कश्चित् प्रयाग इति मन्ये।
हिन्द्विस्लामख्रिस्ता मिलन्ति सरितो यतस्तिस्र:।।

**(1610) पश्चात्तापः**

स्थास्यति पश्चात्तापो मन्ये मयि तावदेष आ मृत्योः।
तेभ्यो नोप्ताः सुमनस उप्ता यैः कण्टका मह्यम्।।

**(1611) खेदः**

निजनीडस्यैकस्मिन् दिनानि नीतानि कोण एव मया।
अस्यां भुवि न भ्रान्तं दिवि विततायां न चोड्डीनम्।।

**(1612) आहतः**

केषाञ्चिदीर्ष्यया वा न द्वेषेणैव चाहतोऽभूवम्।
आहतमात्मानमहं स्नेहेनाप्यन्वभूवमिह।।

**(1613) मार्मिकत्वम्**

येषां न मार्मिकत्वं गीते परिलक्ष्यते न सङ्गीते।
केन गुणेन न जाने कलाविदस्ते प्रकीर्त्यन्ते।।

**(1614) सुमहत् काव्यम्**

व्यतिगच्छन्ति शताब्द्यो लोकस्यास्य प्रतीक्षमाणस्य।
कस्यचिदपि लेखन्याः सुमहत् काव्यं न निर्याति।।

**(1615) सङ्गमक्षेत्रम्**

सङ्कीर्णा व्याकीर्णा नासीद् दृष्टिः कदाचिदस्माकम्।
विविधानां धाराणां राष्ट्रं नः सङ्गमक्षेत्रम्।।

**(1616) विवेकः**

जाड्येन धर्ममूला नाक्रान्ता हन्त केवलं दृष्टिः।
स्वार्थान्धस्य जनस्य प्रत्युत नष्टो विवेकोऽपि।।

**(1617) लोकस्य हिताय**

स्वान्तःसुखाय काव्यं रचयन्ति न केवलं महाकवयः।
प्रत्युत ते प्रयतन्ते हिताय लोकस्य मुग्धस्य।।

**(1618) साहित्यम्**

साहित्यमेव जनयितुमर्हति लोकस्य जागरां जगति।
यदि चेदर्थोपार्जनमेकं न स्यात् तदुद्देश्यम्।।

**(1619) लोकसामान्यः**

प्रतिभात्यशिक्षितः खलु साम्प्रतमपि जगति लोकसामान्यः।
धूर्ताः कुर्वन्त्यस्य प्रायः स्वार्थार्थमुपयोगम्।।

**(1620) समयस्य सङ्केतः**

सङ्केतं समयस्य न ये जानन्ति प्रवर्तमानस्य।
ते कल्पयितुमनागतमकल्पका न प्रगल्भन्ताम्।।

**(1621) सुमनसः**

विधिना केन सुमनसो वर्तन्ते कण्टकेषु कुटिलेषु।
असहृदयो नहि तासामनुमातुं शक्नुयात् कष्टम्।।

**(1622) तृप्ताः**

कामं स्वस्मिन् कूपाः सन्तृप्ताः स्युस्तथा तडागश्च।
मन्ये तृप्ता न स्युः कथमपि सरितः समुद्राश्च।।

**(1623) लेखनधर्मा**

लेखनधर्मा सन्नपि नाज्ञासीर्लेखकस्य सद्धर्मम्।
तदिह जगन्नाथ! भर स्वमुदरमथ यापय स्वदिनम्।।

**(1624) निरपेक्षः**

बहवस्त्वां न सहन्तेऽत एव सुतरां सदस्युपेक्षन्ते।
त्वमपि जगन्नाथ! तथा निरपेक्षस्तिष्ठ तेभ्यश्च।।

**(1625) घनश्यामः**

वर्णेषु धवलमेव प्रायो बहु मन्वते जना जगति।
अस्मात् प्रियस्तु वर्णोऽभिधीयते यो घनश्यामः।।

**(1626) मधुपः**

नासादितवानेष स्वादं मधुनस्तथापि लोकेऽस्मिन्।
अस्य जगन्नाथस्य प्रसिद्धिरद्यापि मधुपेषु।।

**(1627) केशवदासीकृताः**

केशैः सुकेशि! वयमिह केशवदासीकृताः सुदुर्ललितैः।
मधुपान् कदाचिदस्मान् अवेहि न स्पृशति वार्धक्यम्।।

**(1628) सुगन्धः**

हस्तगतं सौभाग्याद् दौर्भाग्याद् हस्ततो मम भ्रष्टम्।
कोऽपि सुगन्धो मन्ये हस्तादपयाति नाद्यापि।।

**(1629) क्रीडन्तो बालकाः**

स्वेन स्वेन रमन्ते क्रीडनकेनेह बालकाः सर्वे।
दूरात् पश्यत एतद् दृश्यं चेतः प्रसन्नं मे।।

**(1630) प्रवेशः**

उद्यानात् तव नाहं गृहीतवान् सुरभि पुष्पमेकमपि।
अस्मिन् मम प्रवेशः शङ्कास्पदतां गतो नूनम्।।

**(1631) द्वेषः**

क्व गतास्ते सत्पुरुषा द्वन्द्वातीता विमत्सराः स्निग्धाः।
ग्रसमानो हृद्देशं द्वेष इदानीं मनुष्यस्य।।

**(1632) हुतात्मानः**

ध्यायत लक्ष्मीबाईमाजादं चन्द्रशेखरं स्मरत।
भगतं सिंहं पश्यत सुभाषचन्द्रञ्च सन्नमत।।

**(1633) सहजं प्रेम**

प्रेम्णः सहजस्य सदा समुद्गमो भवति यस्य हृद्देशे।
प्रकटीभवति वसन्तस्तदाऽभितस्तं समग्रतया।।

**(1634) 'भगवान्'**

अन्धश्रद्धं प्रायः श्रद्धातिशयो जने प्रवर्धयति।
सामान्योऽपि जनोऽयं भगवानिति शब्द्यते येन।।

**(1635) दर्पमहाप्रासादः**

ध्वंसेन मन्दिरस्य ध्वंसेन च मस्जिदस्य को लाभः।
दर्पो महाप्रासादः प्रविधेयो ध्वंसविषयोऽयम्।।

**(1636) अज्ञानतिमिरान्धः**

पन्थाः श्रेष्ठोऽस्माकं जातिश्चास्माकमेव महनीया।
एष विचारो जनयेच्चेतस्यज्ञानतिमिरान्धम्।।

**(1637) सन्तः**

लोकं दुःखग्रस्तं रुदितं सम्पश्यता 'कबीरेण'।
सन्तो वस्तुत एते भवन्ति करुणार्द्रचित्ता हि।।

**(1638) निष्करुणः**

छिन्नाः सुमनस एता विनैव हेतुं मया स्वहस्तेन।
निष्करुणोऽस्मि कियानहमित्यवगतमात्मकृत्येन।।

**(1639) सरलोक्तयः**

दिवसेष्वेष्वपि बहवोऽतिशयोक्तिषु मन्वते कवित्वमिति।
सरलोक्तिष्वपि कविता मन्ये स्वमभिव्यनक्ति सुखम्।।

## (1640) पदचिह्नम्

धन्वन्यस्मिंश्चिह्नं पदस्य पश्यामि नाध्वनीनस्य।
दीपं नापि सुदूरे ज्वलन्तमपि हन्त पश्यामि।।

## (1641) 'अहमहमिका'

सर्वोऽप्यधिकतरं स्वं साधयितुं चेष्टमान इतरेभ्यः।
अहमहमिकेति जाता लोकस्य प्रकृतिरेतर्हि।।

## (1642) मूल–प्रकृतिः

इतिहासस्यामूलात्पुनर्विचारं प्रविश्य कुर्मोऽन्तः।
मानवजातेर्मूलप्रकृतिः प्रतिभाति हिंसैव।।

## (1643) सतामुपस्थितिः

गोष्ठीं सतामुपस्थितिरप्यानयतीव किमपि पूर्णत्वम्।
प्रतिभाति तत्र तेषामुपदिशदिव किञ्च मौनमपि।।

## (1644) शून्यशून्यम्

नोड्डयते कोऽपि खगः कूजति नैतर्हि कोऽपि नीडगतः।
पुष्पोद्यानमकस्मात् प्रतीयते शून्यशून्यमिव।।

## (1645) स्वप्नाः

नानावर्णाः स्वप्नाः समदृश्यन्तेव येषु दिवसेषु।
बाणा इवार्धलग्ना दुःखाःकुर्वन्ति ते हृदि माम्।।

**(1646) धर्मतरिः**

अभिलक्ष्येश्वरमधुना विश्वासः क्षीयमाण इव लोके।
पारं नेतुमनर्हां धर्मतरिं मन्यते च जनः॥

**(1647) प्रमाणपत्रम्**

एष प्रमाणपत्रं नापेक्षत आत्मनः कवित्वस्य।
कामं यद्वा तद्वा ब्रूयात् कश्चिज्जगन्नाथम्॥

**(1648) काव्योद्यानम्**

प्रविशन् बिभेमि सत्यं जटिलं कुटिलञ्च शास्त्रकान्तारम्।
काव्योद्याने दिवसान् रममाणो नेतुमिच्छामि॥

**(1649) 'भट्टाचार्याः'**

बद्धोष्णीषा नैके 'भट्टाचार्या' इतो विराजन्ते।
मतिमास्थाय स्वीयां तिष्ठ जगन्नाथ! मा ब्रूहि॥

**(1650) अर्थाभेदो बलवान्**

द्वारमभिन्नं मन्दिर-मस्जिदयोरीश्वरोपलब्ध्यर्थम्।
बलवत्यर्थाभेदे न शब्दभेदो विचारसहः॥

**(1651) स्वानुभवः**

ग्रन्थानधीत्य मन्ये पाण्डित्यं नाम शक्यमर्जयितुम्।
लोकस्याकलनेन स्वानुभवः किन्तु जागर्ति॥

## (1652) प्रतिवेशी

उद्यन्तं नापश्यं धूमं प्रतिवेशिनो गृहादद्य।
अपि सकुटुम्बः क्षुधितः स्वपित्यभुक्त्वैव निश्यस्याम्।।

## (1653) कृष्याजीवः

प्रेम्णः कथासु बहुधा श्रुतासु नाहं रमे दिनेष्वेषु।
श्रावय वृत्तान्तमितः कृष्याजीवस्य कस्यापि।।

## (1654) स्वमतिः

प्रखरा कर्तव्यमनु स्वमतिर्यस्येह काऽपि जागर्ति।
अनुकूलयितुं प्रभवति स प्रतिकूलां लिपिं धातुः।।

## (1655) मामकमस्तित्वम्

अस्तित्वेन न हानिर्भविता कस्यापि मामकेन भुवि।
उच्छेतुं लक्ष्यन्ते केचन तदपीह यतमानाः।।

## (1656) ग्रहा ग्राहाश्च

विनिपातयन्ति नैके ग्रहाः कुदृष्टिं निजां मयि व्योम्नः।
मां परिवृत्य च नैके ग्राहा भुवि हन्त तिष्ठन्ति।।

## (1657) महाकरुणा

मनुजस्यास्मिंल्लोके मुष्टिमितं भस्ममात्रमस्तित्वम्।
या तद् रत्नीकुरुते साऽस्ति तवैका महाकरुणा।।

**(1658) गङ्गा 1**

गङ्गैकस्यां रात्रौ स्वप्ने रुदती मया स्वयं दृष्टा।
सुचिरादस्मि पिपासाकुलितेत्याह स्म शनकैर्माम्।।

**(1659) गङ्गा 2**

साऽवोचदपि च नाहं योग्या स्नानस्य हन्त कस्यापि।
वस्तुत एषा सम्प्रति काकैरेवेह पेयाऽहम्।।

**(1660) गङ्गा 3**

उपयुक्ता प्रत्यक्षं नापि कृते स्नान-पानयोर्गङ्गा।
अस्या आपोऽमृतमिति मन्यन्तेऽस्माभिरद्यापि।।

**(1661) अन्या नद्यः**

वस्तुत एषा पीडा गङ्गाया एव केवलं नेह।
प्रत्युत समाऽनुभूतिर्जगति नदीनामिहाऽन्यासाम्।।

**(1662) नवोऽनुभवः**

स्त्रिय इव रुदन्ति नद्यः पिपासयैता भवन्ति विकलाश्च।
वस्तुतः एष मदीयो जनितोऽनुभवो नवः स्वप्नात्।।

**(1663) लोकः**

रामः स गतः कृष्णः स गतः स तथा तथागतश्च गतः।
कस्यचिदपि न कृतेऽयं लोको दृष्टः सशोक इह।।

## (1664) गुरोः स्थानम्

स्थानं गुरोः प्रदेयो योग्यतमायैव तस्य शिष्याय।
स्थानं गुरोर्लभन्ते जगति प्रायो गुरोः पुत्राः।।

## (1665) आदर्शः

मलिना एवादर्शा विपणिषु लभ्यन्त एषु दिवसेषु।
स्वच्छस्यादर्शस्यात्यन्ताभावोऽद्य संवृत्तः।।

## (1666) गङ्गा

सत्यं गङ्गा स्वस्मिन् स्नातं सर्वं जनं पवित्रयति।
साऽर्हति न पवित्रयितुं साम्प्रतमिति सत्यमेतदपि।।

## (1667) सत्यम्

साधयितुं सत्यमिति स्वं पक्षं केचिदत्र गर्जन्ति।
प्रतिभाति प्रस्फुटदिव सत्यं मौनेऽपि केषाञ्चित्।।

## (1668) कविता

यत्र सहृदयम्मन्या नैके यत्रासते कविम्मन्याः।
तत्र वराकी कविता जालगता भाति हरिणीव।।

## (1669) राजनीतिक्षेत्रम्

हृदि धूर्तत्वं येषामाकारे भाति नैव मुग्धत्वम्।
तैरेव राजनीतेर्ग्रस्तमिव क्षेत्रमेतर्हि।।

**(1670) चरणाङ्कितः पन्थाः**

नापत् स्वं गन्तव्यं मानव एषोऽत्र हेतुरयमेव।
नामिलदद्यावधि स त्वदङ्घ्रिकमलाङ्कितः पन्थाः।।

**(1671) विपणीकृता जगती**

स्वार्थान्धैरस्माभिर्जगती विपणीकृतेयमेतर्हि।
हन्त किमन्यज्जलमपि विक्रयविषयत्वमापन्नम्।।

**(1672) साहित्यम्**

श्रमशीलः क्षेत्रेषु स्वत्वविरहितो नितान्तजीर्णपटः।
जनसामान्यो यस्मिन्न चर्चितस्तन्न साहित्यम्।।

**(1673) शास्त्राकलनम्**

नोदेति सत्कवित्वं रसिकत्वं नापि जायते किञ्चित्।
पठिते ध्वन्यालोके कलिते काव्यप्रकाशेऽपि।।

**(1674) मूकायितकम्**

त्वद्वाणी नाद्यावधि गता जनस्येह कर्णगोचरताम्।
वरमेतर्हि तवेदं मूकायितकं जगन्नाथ।।

**(1675) अनाहतो नादः**

अन्तः कोऽपि समुदयन्ननुभवमायात्यनाहतो नादः।
मन्ये त्वमेव शनकैर्यत्किञ्चिद् भाषमाणोऽसि।।

### (1676) कवितापदम्

नालङ्कृतैव वाणी कवितापदमादधति सर्वत्र।
सम्मोहयति सहृदयान् कदाचिदनलङ्कृताऽपि कवेः।।

### (1677) कविता

सामान्यैरपि शब्दैः सामान्यैर्नाम कैश्चिदर्थैश्च।
स्वमसामान्यं रूपं बिभर्ति कविता चमत्कारि।।

### (1678) अस्तित्वनाशः

सम्पूर्णमेव विश्वं वह्निपरीतं गृहं दिनेष्वेषु।
कश्चिदुपायश्चिन्त्योऽन्यथाऽऽशु नश्येदिहास्तित्वम्।।

### (1679) अवज्ञा

काव्यालापा जाताः कथं जगन्नाथ! रे तवालापाः।
प्रथयन्ति नाम केचिद् येभ्यो लोके तवावज्ञाम्।।

### (1680) विरोधाभासः

एकत एषा भाषा प्रसूनमियमन्यतश्च तरवारिः।
अपि शोभायै सिध्येत् हिंसितुमपि चान्यतः सिध्येत्।।

### (1681) स्मितम्

बाष्पीभूयोड्डयते दुर्वादानां सहस्रमप्याशु।
शुचिना स्मितेन मन्ये जनस्य करुणार्द्रहृदयस्य।।

**(1682) गीतम्**

तद्गीतमेव गीतं येन भवेयु: स्फुटानि पद्यानि।
तादृशमेव श्रावय खिन्नमिदानीं हि नश्चित्तम्।।

**(1683) ग्रामटिका**

त्वमपरिचित आयात: कस्माद् देशादित: क्व गन्तासि।
कांश्चिद् दिवसानस्मद्ग्रामटिकां तावदधितिष्ठ।।

**(1684) लावण्यं सौजन्यञ्च**

वर्णे वा कस्मिंश्चिज्जातावायत्तमपि न कस्याञ्चित्।
लावण्यमेतदथवा सौजन्यञ्चापि जगतीह।।

**(1685) घण्टानाद:**

प्रत्यहमहमद्यावधि घण्टां त्वद्द्वार्युपेत्य नादितवान्।
अपि शयितस्य स नाद: श्रुतिकुहरं ते सकृत् प्राप्त:।।

**(1686) द्वेष:**

श्रावं श्रावं तांस्तानुपदेशान् सर्वथैव विकलोऽहम्।
लोकादस्माद् द्वेषो न समाप्तिं यात एतर्हि।।

**(1687) कर्णेजपा:**

येष्वासंस्तत्त्वज्ञा गुरवस्ते वस्तुतो गता दिवसा:।
कर्णेजपेषु गुरुषु श्रद्धा जागर्ति नास्माकम्।।

**(1688) मार्गदर्शकाः**

मार्गो यैर्न ज्ञातस्ते सम्प्रति मार्गदर्शका जाताः।
मार्गज्ञानविरहिता भ्राम्यन्तीतस्ततः प्रायः।।

**(1689) अरयः**

अहमरिभिर्विरहित इति न जगन्नाथ! प्रमत्त इव तिष्ठ।
अध्यासते त्वदरयस्त्वन्मित्राणां गृहानधुना।।

**(1690) एकाकी**

कस्यापि साहचर्यं कांश्चिद् दिवसान् मिलेन्नवाऽपि मिलेत्।
भवति स्वस्मिन्नध्वनि सदा मनुष्योऽयमेकाकी।।

**(1691) आकर्षणम्**

आकर्षकेण सम्यक् सौन्दर्येणापि विद्यमानेन।
निर्गन्धासु न किञ्चित् सुमनःस्वाकर्षणं बिभृमः।।

**(1692) द्वन्द्वस्य मूलकारणम्**

सर्वान् गुणानिदानीमतिशेते भौतिकं नु सौन्दर्यम्।
द्वन्द्वस्य मूलकारणमेतत् प्रतिभाति जगतोऽस्य।।

**(1693) विरोधाभासः**

कोऽपि विरोधाभासस्तवानुभावेऽस्ति रे जगन्नाथ!
किमिदं तव वैवश्यं न मनःपूतं यदाचरसि।।

**(1694) न्यायः**

न्यायस्य नेयमुचिता परिपाटी भवितुमर्हतीह मनाक्।
दण्ड्यन्तेऽनपराद्धा अपराद्धा अत्र मुच्यन्ते।।

**(1695) परम्परा**

उत्पादयति न विघ्नं परम्परा कस्यचिद् विकासेऽत्र।
प्रतिबध्नाति विकासं ताम्प्रति मोहस्त्ववश्यमिह।।

**(1696) रामस्य चरणौ**

चलितौ येनेह पथा चरणौ रामस्य धूलिधूसरितौ।
केन चलेतां चरणौ तमन्तरा हन्त भरतस्य।।

**(1697) झङ्कारः सुगन्धश्च**

श्रुतिपथमायाति गृहाज्झङ्कारः कोऽपि नूपुरस्येह।
द्वारमुपैतीव मुहुः सुगन्धलहरीव देहस्य।।

**(1698) श्रोता द्रष्टा च**

यद् यद् वयं वदामो यद् यत् कुर्मो वयञ्च जगतीह।
कश्चिन्नेपथ्यगतः शृणोति तत् तच्च पश्यति च।।

**(1699) असामान्यम्**

सामान्य एव कश्चित् परिचय आसीदिहावयोर्मध्ये।
यदसामान्यं तत् खलु नावाभ्यामन्ततोऽवगतम्।।

**(1700) प्रेमज्योतिः**

स्वप्राप्तये यदेव प्रज्वालितमीश्वरेण कैश्चिदिह।
प्रेमज्योतिरनर्हैर्धूमिलतां नीतमेतर्हि।।

**(1701) निर्देशाः**

अन्तःप्रविश्य निरदिशमेषोऽहं यान् दिवा च रात्रिञ्च।
न जगन्नाथ! परं ते मन्निर्देशास्त्वया ध्याताः।।

**(1702) मनुजस्य छायाः**

आहतमुपेक्ष्य मामिह यान्त्यायान्ति प्रकाममुद्ग्रीवाः।
नेमे मनुजाश्छाया मनुजस्येमाः प्रसर्पन्त्यः।।

**(1703) करुणः स्वरः**

तरवारिषूद्यतासु प्रहर्तुकामासु यत्र मामभितः।
मा मेति कोऽप्यकस्मात् तत्र समुदगात् स्वरः करुणः।।

**(1704) स्वानुभवाद् विपरीतम्**

येषु स्वत्वमनारतमनुभूतं मामकेन हृदयेन।
ते दुर्विधेर्वशादिह परेऽनुभूयन्त एतर्हि।।

**(1705) 'श्रीअरविन्दः'**

न 'श्रीअरविन्द' इति प्रख्यातः कोऽपि भौतिकः पिण्डः।
आमूलादाचूलात् स कश्चिदासीत् स्फुरज्ज्योतिः।।

**(1706) लुण्ठितारः**

यान्नुसरसि त्वमितो येभ्यस्त्वं किञ्चिदाप्तुकाम इव।
त्वामेव लुण्ठितारस्ते तु दरिद्रा यथावसरम्।।

**(1707) प्रमाण-पत्रम्**

मन्यन्तां काममिमं सम्मिलिता यूयमकविरिति नूनम्।
नापेक्षतेऽत्र युष्मत्प्रमाणपत्रं जगन्नाथः।।

**(1708) युद्धम्**

अन्तरिव प्रत्येकं जनस्य युद्धं प्रवर्तमानमिह।
तेजस्तमसोर्मध्येऽथवाऽस्ति किं राम-रावणयोः।।

**(1709) उद्धारः**

यस्त्वद्द्वारि चिरस्य स्थित आशायां कृपाकटाक्षस्य।
न जगन्नाथादन्यः प्रार्थयमानः स्वमुद्धारम्।।

**(1710) बाहुबलम्**

बलमधितिष्ठति यावद् बाहुर्जगतीह मानवस्यास्य।
बिभ्रति तावत् तस्यानुचरत्वं पञ्चभूतानि।।

**(1711) एकं गन्तव्यम्**

काबां गच्छत यूयं काशीं गन्तुं वयञ्च चलिताः स्मः।
मिलिता स्मः पर्यन्ते समेऽपि गन्तव्य एकस्मिन्।।

### (1712) सुधियः

मुखमस्तीति न कविभिर्यत्तद् वक्तव्यमन्तिके सुधियाम्।
अवदन्तोऽपि नु किञ्चिद् वदन्ति ते स्वेन मौनेन।।

### (1713) धूर्ताः

हृदये निधाय गरलं भाषन्ते येऽत्र केऽपि मधुरतमम्।
प्रायो जनसामान्यस्तैर्वञ्च्यत एषु दिवसेषु।।

### (1714) दरिद्रनारायणः

नैषोऽश्रूयत सम्प्रति कथाप्रसङ्गेन सत्यदेवस्य।
शङ्खध्वनिस्तु कण्ठाद् दरिद्रनारायणस्यैषः।।

### (1715) चिन्तनीयम्

विकसन्ति न दृश्यन्ते मुखकमलानीह हन्त नैकेषाम्।
तत्कथमिति सम्मिलितैरस्माभिश्चिन्तनीयमिति।।

### (1716) 'द्विराष्ट्रसिद्धान्तः'

सैव 'द्विराष्ट्रनीतिः' पुनरपि जागर्ति भारते किन्नु।
देशं विभक्तुमेनं कैश्चित् पुनरप्युपक्रान्तम्।।

### (1717) विडम्बना

येषु शिशूनां पाणिषु दृश्यन्ते स्मानिशं प्रसूनानि।
पितृभिः सम्प्रति तेषु क्रूराण्यस्त्राणि दीयन्ते।।

**(1718) काञ्चनम्**

काञ्चनमेव युगेऽस्मिन् प्रथमो धर्मस्तथा च धर्मोऽन्त्यः।
विक्रीयतेऽत्र देहो न केवलं प्रत्युतात्माऽपि।।

**(1719) मौनम्**

वच्मि जगन्नाथ! त्वां मौनं तव भाषितं यदा भविता।
मन्ये भवितासि तथा संवादार्हस्तदा तेन।।

**(1720) सर्वस्वम्**

वागर्थयोर्विशालाद् भाण्डागारान्निजात् त्वया दत्तम्।
यदकिञ्चनाय मह्यं तदेव मे किमपि सर्वस्वम्।।

**(1721) विभाजनम्**

उद्यानं यैरधिकृतमस्माकं ते विभज्य तद् याताः।
सिद्धं विभाजनं तल्लाभाय न पक्षयोरुभयोः।।

**(1722) प्रयागतीर्थम्**

यस्मिन् गङ्गायमुने सम्मिलिते तत् प्रयागतीर्थमिदम्।
इति वदितारः किमिहागन्तारोऽनागते काले।।

**(1723) भगीरथः**

गङ्गां रक्षत भारतवास्तव्या येन केन विधिनेमाम्।
आगन्ता न भगीरथ आनेतुं कोऽपि पुनरेनाम्।।

## (1724) समानधर्मा

यमहं सुचिरादासं समानधर्मेति हन्त मन्वानः।
समजनि स प्रतिकूलः प्रतिकूलत्वान्ममैव विधेः।।

## (1725) कालिदासो गालिबश्च

एकत्राकर्षति मां स कालिदासः स गालिबोऽन्यत्र।
आकर्षणद्वयाकुल एष इतो जगति सञ्जातः।।

## (1726) गजनिमीलिका

अपि गजनिमीलिकेयं न लक्ष्यतेऽद्यापि भारतीयेषु।
प्रतिकूलमाचरत्सु प्रतिवेशिषु ये प्रमाद्यन्ति।।

## (1727) व्यवहारः

आशैशवादधीतं त्वया जगन्नाथ! कालिदासादि।
सामान्योऽपि न तेभ्यो व्यवहारो मतिपथं नीतः।।

## (1728) अवधानम्

प्रथमं गतेन विदुषां व्यवहर्तव्यं कथन्नु गोष्ठीषु।
अवधातव्यं सर्वं जनेन जिज्ञासुना सम्यक्।।

## (1729) नेतृत्वम्

सदसद्विवेकनिपुणा मतिरिह येषां सदैव जागर्ति।
स्वार्थविरहिता बिभ्रति त एव लोकस्य नेतृत्वम्।।

**(1730) काशी**

काशीतलवाहिन्या न गङ्गया यस्य परिचयो जातः।
आनन्दकाननाख्यां काशीं स कथन्नु जानीयात्।।

**(1731) उपकारस्य प्रत्युपकारः**

कस्यचिदुपकारस्य प्रत्युपकारो न वस्तुतो भवति।
उपकारस्य तथापि प्रत्युपकारेण भाव्यमिह।।

**(1732) अविरोधः**

शाश्वतिको न विरोधः प्रकृतिगतो मानवस्य कस्यापि।
अविरोधमेव सत्स्वप्यन्विष्यामो विरोधेषु।।

**(1733) गगनान्तं यावत्**

एतानजातपक्षान् दयनीया इति न कोऽप्युपेक्षेत।
उत्पतितारः केचिद् गगनान्तं यावदेतेषु।।

**(1734) शाखोटकः**

शाखोटकस्य केचित् फलानि  नाश्नन्तु नाम मम केचित्।
छायां ममाश्रयन्ते शवमादायागताः प्रायः।।

**(1735) गतागतम्**

तनिमानमाप्नुवत्सु प्रायः सरितामितः प्रवाहेषु।
मन्दीभूतमिदानीं गतागतं कूजतां वयसाम्।।

**(1736) सरितस्तटेषु**

सरितस्तटेषु येषु स्वान्यस्माभिर्दिनान्यनीयन्त।
दुर्लभमेतर्हि ततः शैत्यं तत् पावनत्वञ्च॥

**(1737) 'परिवारः'**

माता पिता च यस्मिन् न स्थानं प्राप्नुतो यथायोग्यम्।
सङ्कुचितोऽर्थः प्रायः सम्प्रति 'परिवार'शब्दस्य॥

**(1738) उद्यानाभासाः**

कोकिलकाभासानामायास्यत्येव कूजितं कर्णम्।
यद्युद्यानाभासा प्रतितिष्ठन्त्यन्तिकेऽस्माकम्॥

**(1739) विश्वसिता**

दृश्येते नहि किञ्चिन्नेत्रे गलदश्रुणी पुरो यावत्।
रोदिम्यहमिति वादिनि कोऽत्र त्वयि नाम विश्वसिता॥

**(1740) आवरणम्**

हिन्दुत्वेन मनुष्यो न मनुष्यो नापि मुस्लिमत्वेन।
हिन्दुत्वादितु बाह्यं मनुष्य आवरणमेतस्मिन्॥

**(1741) धर्मः**

पश्यामि कर्मकाण्डानुगतो नैव प्रवर्तते धर्मः।
मन्ये न कर्मकाण्डं धर्मस्तिष्ठत्यधिश्रित्य॥

## (1742) नेतृत्वम्

लोकस्य न कल्याणाभिमुखा दृष्टिर्न येषु च त्यागः।
प्रायस्त एव बिभ्रति सम्प्रति लोकस्य नेतृत्वम्।।

## (1743) रामायणम्

हृदि कस्यचित् कवेरिह सत्यं क्षणमात्मना यदा स्फुरति।
रामायणमिव किञ्चित् प्रकाशमायाति झटिति तदा।।

## (1744) गोपनीयतरम्

त्वन्नाम गोपनीयादासीदिह यन्नु गोपनीयतरम्।
यद्रसनाग्रमुपेतं तदकस्मात् किञ्चिदधिगोष्ठि।।

## (1745) भारः

दुर्बलयोरनयोर्यो निहितो मत्स्कन्धयोस्त्वया भारः।
विधिना केनाहमिमं त्वं निर्दिश निर्वहेयमिह।।

## (1746) देवभूमयः

पार्वति! पितुः प्रदेशास्तव सत्यं देवभूमयोऽद्यापि।
क्रीडन्ती न क्वचिदपि तेषु मया त्वं परं दृष्टा।।

## (1747) स्मृतिः

समये स्मरणीया वयमित्यवदाम प्रतिष्ठमानं त्वाम्।
असकृत् समयः प्राप्तः परं स्मृता न त्वयेह वयम्।।

## (1748) न विरोधः

मन्दिर–मस्जिदयोरिह न विरोधः कोऽपि नाम शाश्वतिकः।
सत्यपि पूर्वाभिमुखे कस्मिंश्चित् पश्चिमाभिमुखे।।

## (1749) शरीरम्

साधनमासीद् यत्खलु समजनि तत् साध्यमेषु दिवसेषु।
धर्मं विहाय सम्प्रति शरीरमेवेह मन्यन्ते।।

## (1750) मनोरथाः

दृश्यन्ते धावन्तो मनोरथान् स्वान् जनाः समधिरुह्य।
यद्यपि सर्वेषामपि सर्वे नैवेह सिध्यन्ति।।

## (1751) सूत्रधारः

रङ्गगता एव नटा विषया आकर्षणस्य संवृत्ताः।
प्रच्छन्न एव तिष्ठति स सूत्रधारः सुनिपुणोऽपि।।

## (1752) गन्तारः

स्थास्यति न कोऽपि लोके दिन एकस्मिन् समेऽपि गन्तारः।
कश्चित् कियानपि स्याद् बलवानपि बुद्धिमानपि वा।।

## (1753) प्रेमाख्यं नगरम्

केनचिदिह भवितव्यं प्रेमेत्याख्येन तेन नगरेण।
कुत्सितया घृणया बत यतः प्रवेशो न लभ्येत।।

**(1754) जगन्नाथः**

कविषु स्वां स्वां प्रतिभां प्रकटीकुर्वत्सु मञ्चमधिरुह्य।
किं कारणमेकान्ते स जगन्नाथः स्थितो मौनम्।।

**(1755) आशङ्कितः**

न दिशः कस्याश्चिदपि प्रबलमुदेतीव किञ्चिदाह्वानम्।
सीम्नः पारं कुर्वन् मन्ये शत्रुर्बिभेतीव।।

**(1756) मनुष्यत्वम्**

नानावरणैरावृत आत्मा भासा न भाति निजयेह।
यस्यानावृत आत्मा तस्य मनुष्यत्वमुत्स्फुरति।।

**(1757) पङ्कः**

कथमपि पङ्कः शक्तो न चन्दनस्यास्पदं क्वचिल्लब्धुम्।
पङ्कजमुत्पादयितुं न कोऽपि शक्तोऽन्तरा पङ्कम्।।

**(1758) प्रशस्ता दृष्टिः**

द्रुतमन्धकूपतो मां निर्गमयोन्मीलयाशु मद्दृष्टिम्।
दृष्ट्या प्रशस्तयाऽहं जगतो विस्तारमीक्षिष्ये।।

**(1759) आम्रपाल्यः**

प्रतिदिवसमाम्रपाल्यः प्रतीक्षमाणाः स्थिता गृहद्वारि।
स्वस्या मुक्तेरवसरमितः कदाचित् त्वमागन्ता।।

**(1760) काकोलूकम्**

सन्ततमुद्यानेऽस्मिन् काकोलूकं प्रवर्तमानमिव।
न दिवा नापि च रात्रिं शान्तिर्वयसां कृतेऽन्येषाम्।।

**(1761) गृध्रत्वम्**

अहमहमिकेति गृध्रा न स्वां प्रकृतिं परित्यजन्तीह।
लाभेन यन्न तुष्यति तदेव गृध्रत्वमित्याहुः।।

**(1762) अदृश्यम्**

सुन्दरतरेण भाव्यं तेनादृश्येन सुन्दराद् दृश्यात्।
यदिदं छायामात्रं सुतरां तस्यास्त्यदृश्यस्य।।

**(1763) अनुग्रहः**

त्वदनुग्रहो न वर्षेद् यावन्मम हृन्मरौ प्रतप्तेऽस्मिन्।
मम हृत्तापं तावन्मौनं कियदेतदावृणुयात् ।।

**(1764) भारतार्कः**

यस्माद् भारतनाम्नोऽर्कादलभत लोक एष आलोकम्।
सम्प्रति स भारतार्को याचत इव लोकमालोकम्।।

**(1765) निःस्वनाः**

वंश्या विनिर्गतास्तेऽद्यापि निशीथेषु निःस्वना मधुराः।
गुञ्जन्ति मन्दमन्दं वृन्दावनवासिनां श्रुतिषु।।

**(1766) मच्छब्दाः**

त्वामभिलक्ष्य प्रहिता प्रत्यायान्तीव हन्त मच्छब्दाः।
अप्येताच्छ्रुतवानसि विधिना प्रत्येमि केनाहम्।।

**(1767) स्पर्शः**

अहमहमिकया कामं नालङ्कारा मिलन्तु मद्वाचि।
क्षणमुदियादिव तस्याः कोऽपि स्पर्शः स करुणार्द्रः।।

**(1768) अमृतम्**

अनुसन्धेया वेदा आकलनीयास्तथोपनिषदश्च।
मर्त्येषु यद् यदमृतं पूर्वैः सुविचारितं तत् तत्।।

**(1769) अनुग्रहाम्बुदः**

कोऽपि जगन्नाथेऽस्मिन् दीने त्वदनुग्रहाम्बुदोऽवर्षत्।
कठिनी करेऽस्य दत्ता भिक्षापात्रं यदपसार्य।।

**(1770) वृकाः**

अपि जगतीह कदाचिन्न्यायस्य स्यात् क्वचित् कृतेऽवसरः।
सिंहासनमारोढुं वृकेषु कलहायमानेषु।।

**(1771) वाचालं मौनम्**

विषये त्वन्मौनस्य भ्रान्तिः कामं नु मामकीना स्यात्।
प्रतिभाति त्वन्मौनं मत्पुरतः किमपि वाचालम्।।

**(1772) कविताया विक्रयः**

ननु वर्तयामहे नहि कविताया विक्रयेण जगतीह।
कृपया कवित्ववणिजां वयमिह मध्ये न गणनीयाः।।

**(1773) कवयः**

गाढतरा व्युत्पत्तिर्येशां रचनासु यात्यभिव्यक्तिम्।
प्रतिभावन्तः सम्प्रति सुदुर्लभा हन्त ते कवयः।।

**(1774) आकृतयः**

साम्प्रतमाकृतयस्ताः स्मृतिपथमसकृद् बलादिवायान्ति।
इदमुद्यानमदृश्यत रमणीयं सन्ततं याभिः।।

**(1775) पराधीनवृत्तित्वम्**

अपि जगतीह प्रभवो विचारयिष्यन्ति तावदेतर्हि।
कष्टं सुमहदसह्यं किमपि पराधीनवृत्तित्वम्।।

**(1776) स्वानुभूतम्**

सुकवेरपि सुकवित्वं तावद् वाग्जालमेतदाभाति।
विनिबध्नाति न तस्मिन् यावत् स स्वानुभूतमपि।।

**(1777) अस्तित्वम्**

सुखदुःखयोर्मिलनभूश्छायातपयोरिवैतदस्तित्वम्।
अनुभूयमानमधुना तावत् स्वीकार्यमस्माभिः।।

**(1778) पन्था:**

पन्थाश्चलितस्य कृते सच्छाय: स्निग्ध एव नहि मिलति।
क्वचिदातपेन तप्त: पन्था मिलिता कठोरश्च।।

**(1779) गन्तव्यम्**

खर आतपो मिलेद्वा स्निग्धच्छायाऽथवाऽध्वनीह मिलेत्।
चलितुं कृतप्रतिज्ञश्चल स्वगन्तव्यमभिलक्ष्य।।

**(1780) वाचंयमत्वम्**

कस्यचिदपीह जाने मद्वाचि प्रत्ययो न भवितेति।
वाचंयमत्वमेवं नित्यमधिश्रित्य तिष्ठामि।।

**(1781) आतङ्क:**

विनिपातितार्गलानि द्वाराणि न केवलानि नगरस्य।
अवरुद्धाश्च गवाक्षा: प्रवर्तते कोऽयमातङ्क:।।

**(1782) सुमधुर: स्वर:**

कर्णकुहरयो: कोऽपि स्वर: सुमधुरो ध्वनन्निवायाति।
वंश्यास्तव नादो वाऽथवैष तव पाञ्चजन्यस्य।।

**(1783) सत्य-विहङ्गम:**

उड्डयमानं गगने विहङ्गमं सत्यमेकमिह नैके।
विधिना स्वेन स्वेन स्ववशे कर्तुं प्रवर्तन्ते।।

**(1784) भूधात्री**

स्वार्थान्धैरस्माभिः पीड्यत एषा कियन्न भूधात्री।
सर्वंसहेति नैव त्यजत्यभिख्यां निजां तदपि।।

**(1785) आश्चर्यम्**

रोदितुमिह हृद्गतया मया शनैः पीडया यदारब्धम्।
हसितुं मयीषदीषन्निकटे स्वजनैस्तदारब्धम् ।।

**(1786) गजेन्द्रः**

सम्राड्भिर्यमनेकैरुत्सवदिवसेषु सम्यगधिरूढम्।
राजकुलद्वारगतः स गजेन्द्रः श्रूयतेऽद्यमृतः।।

**(1787) वाचंयमत्वम्**

विदुषां सहृदयताया विषये नास्त्येव कोऽपि सन्देहः।
दुःखाकरोति केवलमेषां वाचंयमत्वं माम्।।

**(1788) सुमनीषिणः**

ऋजु न कथं भाषन्ते मुग्धमिमं भ्रामयन्ति लोकममी।
वाग्जालं सुमनीषिण आतन्वानाः कथङ्कारम्।।

**(1789) तडित्**

जलदतिरस्करिणीतो विनिर्गताऽन्तर्हिता क्षणाच्चैषा।
मध्येऽन्तरिक्षरङ्गं तडिदानुते चमत्कारम्।।

**(1790) निस्तब्धत्वम्**

न समन्वभूयतैवं निस्तब्धत्वं कदापि नगरेऽस्मिन्।
किं घटितं यदकस्माज्जनसञ्चारो न रथ्यासु।।

**(1791) दुःखसम्भिन्नं सुखम्**

लब्धो येनानुभवो दुःखस्यैवेह तस्य सोऽनुभवः।
सुखमप्यनुभवगोचरमिहास्ति दुःखेन सम्भिन्नम्।।

**(1792) गृध्रदृष्टिः**

नानाविधासु दृष्टिषु दिवसेष्वेषु प्रशस्तिरेकस्याः।
सैषाऽस्ति गृध्रदृष्टिः प्रेक्षितुमर्हा सुदूरस्थम्।।

**(1793) काव्यम्**

सम्पूर्णमेव विश्वं काव्यं कस्यापि किमपि देवस्य।
मन्ये तेन विरचितं मनुष्य इति तन्नु लघु काव्यम्।।

**(1794) हस्तः**

खड्गविरहितो हस्तो निर्भीकस्य स्वतो न किं खड्गः।
हस्तोऽकिञ्चित्कर इह भवति सखड्गोऽपि भीतस्य।।

**(1795) प्रेमजलदाः**

कथमाप्नुयान्न मानव! तव हृद्देशो मरुस्थलत्वमरे।
सुबहोः कालादस्मिन् नावर्षन् प्रेमवारिधराः।।

**(1796) निरपेक्षः**

विनिपातितार्गलानि द्वाराण्येवेह ते न भवनस्य।
निरपेक्षेण निरुद्धस्त्वया गवाक्षाः समेऽप्यधुना।।

**(1797) गन्तव्यम्**

निर्धारितं स्वबुद्ध्या यद्गन्तव्यं त्वयाऽऽत्मनः पूर्वम्।
तस्मात् त्वं विचलित इव किन्नु जगन्नाथ! सञ्जातः।।

**(1798) पन्थाः**

सम्प्राप्नुवन्ति मन्ये भाग्यजुषः केचिदेव गच्छन्तः।
शान्तानुकूलपवनं शिवञ्च जगतीह पन्थानम्।।

**(1799) सुखशयनम्**

कस्यचिदपीह न दृशे सौभाग्यं तस्य रोचते स्म भुवि।
जातु जगन्नाथेन न निजे कुलाये सुखं शयितम्।।

**(1800) सूर्यत्वम्**

तामेव दृष्टिमेकां तव प्रतीक्षामहे बहोः कालात्।
सूर्यत्वमेति यस्या रजःकणो गोचरीभूतः।।

**(1801) कारुण्यम्**

सत्स्वपराद्धेष्वेव त्वत्कारुण्यस्य सार्थकत्वमिह।
पूतात्मसु यत् सिद्धं तस्याकिञ्चित्करत्वं तु।।

**(1802) शिष्टाचारः**

सर्वात्मना समर्पणमित्यस्माकं परम्परैवाह।
प्रणतय इमा न कश्चिच्छिष्टाचारस्य निर्वाहः।।

**(1803) याज्ञसेनी**

स्वजनेषु नतशिरःसु स्वगुरुषु च दृढं गृहीतमौनेषु।
गौरिव कौरवसंसद्यसहाया याज्ञसेन्यभवत्।।

**(1804) वटतरोर्मूले**

भिक्षापात्रभृदिति योऽस्माभिरुपेक्ष्यापसारितो द्वारात्।
दृष्टो युवा स शिष्यान् समुपदिशन् वटतरोर्मूले।।

**(1805) धृतराष्ट्रः**

अन्धा भवन्ति मन्ये धृतराष्ट्रा जगति नैव सर्वेऽपि।
आश्चर्यस्य न विषयो धृतराष्ट्रः कश्चिदन्धश्चेत्।।

**(1806) रामो रावणो वा**

लब्ध्वाऽवसरं रामः केवलमुत्पद्यते न हृद्देशे।
उत्पद्येत दुरात्मा कस्यचिदपि रावणो मन्ये।।

**(1807) धर्मध्वजाः**

पूर्वमभूवँल्लोके द्वित्रा वा पञ्चषा जगद्गुरवः।
प्रतिनगरमेव सम्प्रति नैके धर्मध्वजाः सन्ति।।

**(1808) स्वातन्त्र्यम्**

स्वातन्त्र्यस्य ज्ञातुं स एव शक्नोति किमपि माहात्म्यम्।
कारागारनिगडितः सहते यो यातनां नित्यम्।।

**(1809) गृध्राः**

कलहायितमधिकर्तुं काकैः पूर्वं महद् यदुद्यानम्।
गृध्रैः प्रसह्य सम्प्रति तदधिकृतं शीघ्रमुपसृत्य।।

**(1810) अन्धत्वम्**

विषये धृतराष्ट्रस्य प्रसङ्ग एष प्रवर्ततां कामम्।
उपजनयत्युद्वेगं तस्य तदन्धत्वमस्माकम्।।

**(1811) मार्दवम्**

काङ्क्षे मार्दवमात्मनि परमेतावन्न मार्दवं काङ्क्षे।
उपसृत्य कश्चिदपि मां विनैव हेतुं दलेत् पद्भ्याम्।।

**(1812) दृशं वितर**

पश्यन् बाह्यमतृप्तोऽनुभवाम्यहमेष तावदात्मानम्।
आभ्यन्तरमपि पश्याम्येष यया तां दृशं वितर।।

**(1813) शोकः श्लोकः**

समविषमच्छन्दोभी रचनाभिर्भवति नैव कोऽपि कविः।
आपद्यते न यावच्छोकः श्लोकत्वमिह यस्य।।

**(1814) कवित्वम्**

न जगन्नाथ! कवित्वं तव सिध्येत् किमपि तावदिह मन्ये।
स्वान्तःसुखाय न त्वं कवयितुमपि चेष्टसे यावत्।।

**(1815) असामर्थ्यम्**

यल्लेखनीयमस्ति ध्वनदिव तत् किञ्चिदन्तरायाति।
हन्त न जानेऽवतरति न लेखनीतः कथङ्कारम्।।

**(1816) कण्टकाः**

रक्षायामेवार्पितमितः सुमनसां यदस्मदस्तित्वम्।
कथमन्यथाऽभिनन्देदस्मानिह कण्टकान् कश्चित्।।

**(1817) यात्रा**

यात्रैवैषाऽस्माकं प्रवर्तमाना परं न विदितं नः।
को वा पन्था योऽस्मान् गन्तव्यं प्रापयिष्यति यत्।।

**(1818) उत्साहः**

न सहचरः कोऽप्यमिलत्पदमपि गन्तुं सह त्वया यदपि।
न जगन्नाथ! तदपि ते क्वचिदुत्साहो मनाग् भग्नः।।

**(1819) शरणम्**

तान्युद्यानानि कुतः स्निग्धच्छायाद्रुमाश्च ते कुत्र।
आतपतप्तस्य कृते पथिकस्य स्यात् कुतः शरणम्।।

**(1820) अन्यादृशानि**

तेषां न समानानि क्वचिदायातानि हन्त दृष्टिपथम्।
तानीक्षितानि तानि स्मितानि चान्यादृशान्येव।।

**(1821) भारतम्**

यस्मिन् वयं वसामो भारतमिति नाम तस्य देशस्य।
इतिहासग्रन्थादिदमधिगन्तारोऽत्र नः पुत्राः।।

**(1822) अन्धतमससागरः**

न सुदूरेऽपि कुतश्चिद् दीपक एकोऽपि दृश्यते ज्वलितः।
तर्तुं शक्यः कथमयमन्धतमससागरोऽस्माभिः।।

**(1823) कवित्वम्**

शब्देष्वर्थेषु समं जागर्त्यनुशासनं दृढं यस्य।
जगतीह यत् कवित्वं स्वाराज्यं तत् कवेस्तस्य।।

**(1824) सङ्गमः**

सोऽयं भारतदेशो यस्मिन् जागर्ति सङ्गमो नित्यम्।
श्रीरामकृष्णकथयोः सरितोः सुखसम्पदां निध्योः।।

**(1825) भक्ताः**

केचन हरस्य भक्ताः केचन भक्ताः श्रुता हरेश्चेह।
कलहायन्ते भक्ता न तु हरिहरयोः श्रुतः कलहः।।

**(1826) शङ्खाः**

अन्वेषितानि न मया पारावारं वगाह्य रत्नानि।
हन्त तटेषु विचरता सङ्कलिताः केवलं शङ्खाः।।

**(1827) काव्योद्यानानि**

काव्योद्यानेषु सदा यैर्विहृतं कालिदास-भवभूत्योः।
काव्यपलाशवनानि प्रवेष्टुकामाः कथं ते स्युः।।

**(1828) भेदः**

दिवसेष्वेषु कदाचिद् यथाकथञ्चित् प्रतीयमानोऽपि।
भद्राकृतिषु न सुतरामाकृतिभद्रेषु भेदश्च।।

**(1829) चाटुकाराः**

गुणिजनरहितामेनां गोष्ठीं प्रविहाय गन्तुमिच्छामः।
शृणुमः कविरिति शब्दः प्रयुक्तमिह चाटुकारेषु।।

**(1830) कवियशः**

कविताजन्यं न यशः कस्य कवयतो जगत्यभीष्टमिह।
कस्यचिदेव तु भाग्ये विलिख्यते तत् परं विधिना।।

**(1831) महास्रक्**

याऽऽसीन्मह्यमुपहृता त्वया महास्रक् स्वपाणिपद्माभ्याम्।
हन्त मयोन्मथिता सा मतङ्गजेनेव मत्तेन।।

**(1832) पुरस्कारः**

मत्पद्यानीमानि स्थानं गृह्णन्ति चेत् सतां हृत्सु।
स पुरस्कारः प्रीत्यै लक्षपरिमितादपि द्रव्यात्।।

**(1833) भागधेयम्**

स्वं भागधेयमस्मिन् युग उपलब्धुं न कोऽपि विधिरन्यः।
मन्ये बलप्रयोगं केवलमतिरिच्य जगतीह।।

**(1834) स्वार्थः**

दिवसेष्वेषु तदुचितं येन स्वार्थस्य जातु सिद्धिः स्यात्।
पूर्वे विचारयन्ति न्याय्यं पुरुषाः स्म पन्थानम्।।

**(1835) सत्येऽधिकारः**

प्रख्यापयन्ति सत्ये स्वं स्वं नैकेऽधिकारमेतर्हि।
सत्यं सहते स्वस्मिन् कस्यापि न कञ्चिदधिकारम्।।

**(1836) पक्षपातिनः**

न जगन्नाथस्य वयं परिगणिताः पक्षपातिनां मध्ये।
तन्नाम्नः प्रस्तावे भवाम उद्बाहवो नूनम्।।

**(1837) 'नवा इवाभान्ति'**

पूर्वेषां सुकवीनामुक्तय एवाभ्युदीरिता भूयः।
भङ्ग्यन्तरेण कविभिर्नवा इवाभान्ति जातु नवैः।

**(1838) काव्यरत्नानि**

रत्नैर्विविधैर्भरितः कोशः सारस्वतः समुद्र इव।
उत्पत्स्यन्ते कालेऽप्यनागते काव्यरत्नानि।।

### (1839) अजातशत्रु भारतम्

भारतमभितो यद्यपि साम्प्रतमपि सन्ति शत्रवो नैके।
अस्य तथाप्यपरिक्षतमजातशत्रुत्वमिति मन्ये।।

### (1840) सचेतसां सहस्यम्

सकुशलमस्तु सहस्रं सचेतसां जगति काव्यतत्त्वविदाम्।
न जगन्नाथोऽपेक्षत इह प्रशस्तिं यदन्येभ्य:।।

### (1841) शशका:

गोमायुषु गृध्रेषु च पदे पदे खादितुं प्रविचलत्सु।
स्वसुरक्षायै शशका वनप्रदेशात् कुतो यान्तु।।

### (1842) रामराज्यम्

अस्मिन् भारतराष्ट्रे प्रवर्तिता रामराज्यमित्याहु:।
राज्यं प्रवर्तमानं पश्यामो रावणस्येव।।

### (1843) सत्यामृतम्

दिग्भ्य: सर्वाभ्योऽपि ध्वनिरुदयत्येक एव लोकेऽस्मिन्।
सत्यामृतेन कृत्स्नान् कृपया तृप्तान् विधेह्यस्मान्।।

### (1844) उचिता वेला

हन्त शयानायां मयि निरगास्त्वरया गृहात् त्वमेकाकी।
साऽऽसीन्न तावकस्य प्रस्थानस्योचिता वेला।।

**(1845) सुमनसः**

न सुमनसः स्वगुणानां स्वमुखेन ख्यापने प्रगल्भन्ते।
यदकथिता एव गुणा प्रकाशमायान्ति लोकेऽस्मिन्।।

**(1846) सत्यस्य राज्यम्**

सर्वात्मना न शक्यो राज्यं सत्यस्य कश्चिदधिकर्तुम्।
प्रख्यापयन्ति नैकेऽहम्मन्याः स्वं स्वमधिकारम्।।

**(1847) महाकरुणा**

वयमेवानुगृहीता महाकरुणया स्वदेशनाभिरिति।
इत्यभिमन्वानैः सा कैश्चित् सीमासु विनिबद्धा।।

**(1848) कवित्वसङ्गीतम्**

प्रत्येकं हृद्यन्त्रे स्फुरति तदीयं कवित्वसङ्गीतम्।
अर्हन्तीह श्रोतुं द्वित्रा वा पञ्चषा जगति।।

**(1849) सद्भावः**

ईश्वर इत्यस्माकं स्रष्टा विदितोऽस्ति जगति यद्येकः।
बिभृमः कथं मनुष्या न वयं सद्भावमन्योन्यम्।।

**(1850) रसिकत्वम्**

नगरस्यास्य जनस्य स्फुटतामेतीव वेशभूषासु।
यद्रसिकत्वं मन्ये तन्न तु संल्लक्ष्यते हृत्सु।।

**(1851) मार्दवम्**

तमवेहि सन्तमनुभव मार्दवमिति यस्य हृद्‌गतं भावम्।
प्राय: कठोरहृदया मिलन्त्यसन्तो दिनेष्वेषु।।

**(1852) पुष्पत्वम्**

पुष्पस्य न पुष्पत्वं सौन्दर्येणैव तावदिह सिद्‌धम्।
भाव्यं तेन सुरभिणाऽप्यवश्यमनुभूयमानेन।।

**(1853) गृध्रा:**

स्थातव्यमप्रमत्तैर्नगरेऽस्मिन् मांसलैर्जनैर्नूनम्।
नानाविधानि गृध्रा भ्रमन्ति रूपाणि सन्धार्य।।

**(1854) पाण्डित्यम्**

यदपि जगन्नाथ! महत् परोपदेशे तवास्ति पाण्डित्यम्।
पुण्यान्यर्जय तदपि स्वस्य कृतेऽपीह कुशलस्य।।

**(1855) महागृध्र:**

उदपद्यत हृद्देशे काचिदतृप्तिर्दुरन्तपूरेव।
यस्य स नूनमभूदिह मनुष्यरूपो महागृध्र:।।

**(1856) महीयसी करुणा**

ईश्वर इति गॉड इति त्वं नाम्ना तमभिधेहि केनापि।
जागर्ति सैव नित्यं महीयसी काचिदिह करुणा।।

**(1857) सुपर्णः**

अयमुड्डयेत नभसः पारं यावत् तदत्र देयोऽस्मै।
कोऽप्यवसरो गरुत्मान् मनुष्यनामा सुपर्ण इति।।

**(1858) कवित्वम्**

न जगन्नाथ! कवित्वं तावकमाकर्षतीति विदितं नः।
प्राकृतजनगुणगानं नास्त्यत्रेति प्रसीदामः।।

**(1859) बधिरे श्रुती**

कवयो वयमिति कामं केचित् कविमानिनः प्रगल्भन्ताम्।
प्रायो जनस्य कविता-विषये बधिरे श्रुतीदानीम्।।

**(1860) विस्तीर्णं हृदयम्**

विस्तीर्णे हृदि तावत् सुहृन्मयं सर्वमेतदाभाति।
सङ्कीर्णे परमस्मिन् न मिलेदेकोऽपि कोऽपि सुहृत्।।

**(1861) विपदां निवेदनानि**

पुर एतेषां विपदां निवेदनानीह रे किमर्थानि।
सर्वमपीदं व्यर्थं बधिरेष्वन्धेषु मूकेषु।।

**(1862) रत्नानि**

प्रायः परीक्षकाणामभाव एवेह कोऽपि सञ्जातः।
दिवसेष्वेष्वपि मन्ये लभ्येरन्नेव रत्नानि।।

**(1863) स्वीयत्वम्**

भवति स्वीयः कश्चित् कस्यचिदपि दृष्टिपात एकस्मिन्।
स्वीयत्वमभ्युदेति न दृक्पथपतितेषु नैकेषु।।

**(1864)**

तिष्ठन्तोऽनुभवामः सुखमस्मिन्नन्धतमस एतर्हि।
यद्यप्यकार्ष्म दिष्ट्या ज्योत्स्नायाः पानमाजन्म।।

**(1865) उपयोगित्वम्**

अस्य कदाचित् सिध्येदुपयोगित्वं कृते समाजस्य।
उपहासस्य विषयतां नय न जगन्नाथमेतर्हि।।

**(1866) रामस्य भक्ताः**

रामस्य भक्त इति न प्रमाणपत्रं प्रदीयतामस्मै।
बहवो हि रामभक्ताः प्रमाणपत्रं विनाऽपि मताः।।

**(1867) हृद्गतो धर्मः**

वैष्णव इति शैव इति स्वं केचित् ख्यापयन्ति तिलकेन।
तिलकादयस्तु बाह्यास्तदुभयमपि हृद्गतो धर्मः।।

**(1868) चमत्कारः**

मन्यन्ते कवितायां कमपि चमत्कारमेव सर्वस्वम्।
केचिद् रसजन्यं वा केचिदलङ्कारजन्यं वा।।

**(1869) जीर्णान्यरण्यानि**

क्व रसोच्छलिता भावा भावोच्छलिताः क्व चेह सँल्लापाः।
दृक्पथमायान्ति दिनेश्वेषु तु जीर्णान्यरण्यानि।।

**(1870) 'मा भैषीः'**

पदमप्यग्रे सर्तुं घनेऽन्धकारे यदोत्सहे नाहम्।
मा भैषीरिति कर्णे तदैव मम केनचिद् भणितम्।।

**(1871) वाणिज्यम्**

ज्ञानस्यैव न केवलमिह वाणिज्यं विशेषतः प्रसृतम्।
वणिजामपि नाभावो विभाव्यते धर्मपण्यानाम्।।

**(1872) चातुर्यम्**

अधिकारक्षेत्रं नहि चातुर्यं किमपि राजनीतिविदाम्।
सर्वे तदेव साधनमिह साफल्याय मन्यन्ते।।

**(1873) कवित्वम्**

शिष्टेष्वेव जनेषु व्यनक्ति न कवित्वमेतदात्मानम्।
सामान्या अपि लोके दृश्यन्ते सुष्ठु कवयन्तः।।

**(1874) अस्तित्वस्य महत्त्वम्**

यावन्नास्तित्वस्य स्वस्य मनुष्यो महत्त्वमिह वेत्ति।
सर्वेऽपि धर्मगुरवो मन्ये तावत् प्रगल्भन्ते।।

**(1875) मनुष्यत्वम्**

त्यागेन भवति लोके कोऽपि मनुष्यो महानिति ख्यातः।
किन्त्वेकया करुणया स्पृशति मनुष्यो मनुष्यत्वम्।।

**(1876) निश्चिन्तः**

स जगन्नाथः सम्प्रति शयान आभाति हन्त निश्चिन्तः।
विगतायां निशि चौरैः प्रविश्य हृतमस्य सर्वस्वम्।

**(1877) नियमवैपरीत्यम्**
दिवसेष्वेषूद्याने सञ्जातं नियमवैपरीत्यमिव।
रक्षन्ति कण्टकान् बत सुमनस एता अहोरात्रम्।।

**(1878) वाङ्मयधारा**

संस्कृतवाङ्मयधारा न लक्ष्यते बाह्यया दृशा यदपि।
अनुभूयते तदपि सा हृदयान्तर्वाहिनीव सताम्।।

**(1879) ध्वंसावशेषः**

ता गोष्ठयो न क्वापि क्वापि न ते सन्ति हन्त गोष्ठीनाः।
स्वं परितः पश्यामो दृश्यं ध्वंसावशेषस्य।।

**(1880) उपलब्धिः**

आत्मानं पूर्णत्वं निनीषुरेषोऽहमन्ततः श्रान्तः।
रिक्तत्वस्यानुभवः स्वीयैकैवेयमुपलब्धिः।।

**(1881) समानधर्मा**

बहवः सुपरिचिता मे मिलिता नैके च जगति सुहृदोऽपि।
हन्त न मिलितः कश्चित् समानधर्मा कुतोऽप्येकः।।

**(1882) बोधिवृक्षस्य छाया**

तव सैव बोधिवृक्ष! च्छाया विदधीत सन्मनुष्यं माम्।
यस्य तव च्छायायां सिद्धार्थः कोऽपि बुद्धोऽभूत्।।

**(1883) योगः**

अवलम्ब्य केऽपि योगं नैके जगतीह योगिनोऽभूवन्।
योगः सम्प्रति जगति प्रदर्शनस्याभवद् विषयः।।

**(1884) भागीरथी**

भागीरथ्याः सम्प्रति कथाप्रसङ्गे प्रवर्तमानेऽस्मिन्।
वैकल्यमेति चेतो भवति च वाणी निरुद्धेव।।

**(1885) प्रशस्ति-गानम्**

प्राचामेव कवीनां प्रशस्तिगाने प्रवृत्तिरिह नासीत्।
दिवसेष्वेष्वपि कवयः प्रशस्तिगानाय लभ्यन्ते।।

**(1886) भाग्यविधातृत्वम्**

येषां मनसि वचसि च प्रतिभात्यतिमात्रमन्तरं प्रायः।
तानेवाधिश्रितमिह भाग्यविधातृत्वमस्माकम्।।

**(1887) महास्रजः**

याः स्वेष्टदेवताभ्योऽस्माभिरभूवन् समर्पिताः पूर्वम्।
अर्प्यन्ते नृपशुभ्यो महास्रजस्ता दिनेष्वेषु।।

**(1888) सत्यम्**

कामं दर्शन-पटवो मिथ्येति व्याहरन्तु जगदेतत्।
उन्मीलदिव निरन्तरमस्मिन् प्रतिभाति मे सत्यम्।।

**(1889) धन्यत्वम्**

काममनेन मनुष्यः स्पृशतु न दिव्यत्वमंशमात्रमपि।
अस्तित्वं सद्भावो नयति मनुष्यस्य धन्यत्वम्।।

**(1890) औत्सुक्यम्**

आयाहि स्वयमथवा सन्देशहरं स्वमेव वा प्रहिणु।
वयमिह दिदृक्षवस्त्वां तव वा शुश्रूषवो वाचः।।

**(1891) कठोरः**

जातः कियान् कठोरस्त्वमुपस्थातुं न चेष्टसे नूनम्।
निजसन्देशहरादपि न त्वं प्रहिणोसि सन्देशम्।।

**(1892) गृध्राः**

रुग्णे गजे मृतेऽस्मिन् जग्धिर्भवितेह मासपर्यन्तम्।
स्वस्वकुलाय निलीनाः प्रतीक्षमाणाः स्थिता गृध्राः।।

**(1893) प्रसादः**

सारस्वतः प्रसादो यस्य स्पृशतीव किमपि हृद्देशम्।
कविता सहृदयता वा द्वयमेवोत्पद्यते तस्मिन्।।

**(1894) सत्यम्**

सत्यं डिण्डिमघोषैः प्रकाशयन्तीह हन्त ये केचित्।
जानन्ति ते न, सत्यं प्रकाशमायाति मौनेऽपि।।

**(1895) अवसरः**

यस्य पुरः पृथिवीयं सुविस्तृता विस्तृतञ्च हन्त नभः।
प्रचलितुमुड्डयितुं वाऽस्त्येवावसरः कृते तस्य।।

**(1896) शिबिकाः**

क्वापि न ते दृश्यन्ते शिबिकामधिरुह्य ये चलन्ति स्म।
शिबिका न सन्ति नापि च शिबिकावाहा दिनेष्वेषु।।

**(1897) वैकल्यम्**

जलबिन्दावेकस्मिन् वैकल्यं यादृशं त्वया निहितम्।
प्रतिभाति मे समुद्रे तादृशमेवेह यत्किञ्चित्।।

**(1898) प्रेम्णः परिभाषा**

स्वार्थपरैः परिभाषा प्रेम्णः परिवर्तिता दिनेष्वेषु।
प्रेम्णो व्यवहारेषु प्रायो वणिज्यमायातम्।।

**(1899) आदर्शः**

रामस्यादर्शत्वं संशयपदमानयन्त इह केचित्।
रावणमादर्श इति प्रेक्षन्ते भारतेऽपि जनाः।।

**(1900) राजनीतिः**

जगतीह राजनीतिर्भवति यदा स्वार्थभावसंल्लिप्ता।
शूर्पणखेव तदैव प्रतीयते पूतनेव च सा।।

**(1901) दैत्यत्वम्**

स्वसमस्यानां केचिद् हिंसायां मन्वते समाधानम्।
तेषु मनुष्यत्वस्य स्थाने दैत्यत्वमुत्पन्नम्।।

**(1902) अस्तित्वम्**

तथ्यमिदं नाद्यावधि किञ्चिद् वेत्सीति तावदाश्चर्यम्।
न जगन्नाथ! सहन्ते नैके जगति त्वदस्तित्वम्।।

**(1903) कोलाहलः**

कोलाहलः समुदयन् नीडेभ्यः कश्चिदेवमाभाति।
नभ उत्पातितुं विततं देहि विनिर्बाधमस्मभ्यम्।।

**(1904) छाया**

जीवनमातप इव मां यद्यप्यकरोन्निरन्तरं विकलम्।
शान्तिं तथापि कामपि समदात् त्वदनुग्रहच्छाया।।

## (1905) उद्यानम्

उद्यानस्यास्तित्वं शङ्कास्पदतां गतं दिनेष्वेषु।
प्रायः समैर्विहङ्गैः स्वस्वकुलायेभ्य उड्डीनम्॥

## (1906) सूचीवेधः

कामं महास्त्रजामिह समर्पणेनोपजायते मोदः।
सूचीवेधव्यथितं कोऽपि सुमनसां निवारयतु॥

## (1907) अपठनीयम्

संस्कृत-वाङ्मयमेतत्प्राचीनं तावदित्यपठनीयम्।
इति मन्यन्ते केचित् सचेतसोऽप्येषु दिवसेषु॥

## (1908) सहानुभूतिः

सम्पदि विपदि च बिभ्रति सहानुभूतिं जनस्य ये स्वहृदि।
सम्प्रति सुदुर्लभास्ते सञ्जाता नेतृपदवाच्याः॥

## (1909) कवित्वम्

सुगृहीतयाऽपि मन्ये न शिक्षयोत्पद्यते कवित्वमिह।
स्वयमुपसृत्य न रसनां यावद् वाग्देवता स्पृशति॥

## (1910) स्निग्धत्वम्

हसितेषु येषु किञ्चित् स्निग्धत्वं हन्त नानुभूयेत।
हसितानि तानि मन्ये निर्गन्धानीव पुष्पाणि॥

**(1911) सत्यम्**

यद्यप्युड्डयमानं प्रतीतिमायाति सत्यमिति तत्त्वम्।
न भवति तथाऽपि यत्ने कृतेऽपि कस्यापि हस्तगतम्।।

**(1912) स्वसुखम्**

अस्तित्वस्य स्वस्य स्वस्य कृते सर्व एव यतमानाः।
स्वं सुखमेव प्रायः सर्वो बहु मन्यमानश्च।।

**(1913) दृष्टि-विस्तारः**

दृष्टौ नय विस्तारं कमपि जगन्नाथ! यद् दिनेष्वेषु।
श्रेयस्करं न मन्वत इह केचिद् दृष्टिसङ्कोचम्।।

**(1914) जगन्नाथः**

नाद्यावध्यधिगन्तुं समजनि सामर्थ्यमेतदस्मासु।
एश जगन्नाथोऽपि स्मृतिपथमानीयते कविषु।।

**(1915) हिमाद्रिः सिन्धुश्च**

शृङ्गाणि मां हिमाद्रेरेकत आमन्त्रयन्ति तुङ्गानि।
आकर्णयामि सिन्धोरन्यत आमन्त्रणध्वनितम्।।

**(1916) विश्वनाट्यम्**

दृष्टिं प्रसार्य सुतरां पश्यामो विश्व-नाट्यमेतर्हि।
न मनुष्यस्योदेति क्वचिदपि करुणार्द्र-चित्तत्वम्।।

**(1917) संस्कृतम्**

संस्कृतमियं पुराणी न सुराणामेव केवलं भाषा।
भाषाणामपि जननी नैकासां भारतीयानाम्।।

**(1918) आरोपः**

पद्भ्यां दलितानि मया न क्वचिदपि कानिचित् प्रसूनानि।
प्रस्तरकठिनोऽयमिति प्रायो मय्येष आरोपः।।

**(1919) कवीनां वाक्**

कवयो यथार्थवादिन इत्यनुभवतो विरुद्धमाख्यातम्।
हन्त तथापि कवीनां वाचि जनोऽद्यापि विश्वसिति।।

**(1920) स्वोदरपूर्तिः**

व्यापृत आयातीह स्वोदरपूर्त्यर्थमेव सर्वोऽपि।
कोऽपि न शोचत्यस्यास्तित्वस्योद्देश्यमन्यदिति।।

**(1921) जीवन–सन्ध्या**

क्व गतं शैशवमथ च क्व गतं मे यौवनं न जानेऽहम्।
मज्जीवनसन्ध्येयं मत्कर्णे किञ्चिदभिधत्ते।।

**(1922) प्रवर्तमानम्**

रामस्य राज्यमस्य प्रवर्तमानस्य कल्पनाविषयः।
राज्यं परमेतर्हि प्रवर्तते रावणस्यैव।।

**(1923) अहमहमिका**

स्वस्वावसरं मन्ये प्रतीक्षमाणो न हन्त कोऽपीह।
अहमहमिकाऽनुभूयत एका चेतःसु नृत्यन्ती।।

**(1924) भूषणत्रितयम्**

प्राङ्गणमेकं फलदः पादप एकश्च धेनुरेका च।
प्रत्येकं गृहकस्यासीदेतद् भूषणत्रितयम्।।

**(1925) रमणी**

प्रत्येकमेव यस्याः कवितेव स्फुरति दृष्टिनिक्षेपः।
कामपि सौन्दर्यविदो रमणीत्याहुर्नु तामेव।।

**(1926) उदारचरिताः**

आसीदेषा वसुधा सुविस्तृता वस्तुतः कुटुम्बमिति।
साम्प्रतमुदारचरिता जना न ते क्वापि लभ्यन्ते।।

**(1927) गङ्गातटानि**

गङ्गातटेषु काश्या जनसम्मर्दः क्व सायमेतर्हि।
क्व स नौकासु विहारः स क्व च तौर्यत्रिकोल्लासः।।

**(1928) शतकत्रयम्**

इह नीतिः शृङ्गारो वैराग्यञ्च क्रमादधीतानि।
भर्तृहरे! तव शतकत्रयमस्मज्जीवनाधारः।।

### (1929) श्रव्यत्वं सरसत्वञ्च

किमपि श्रव्यत्वं यदि यदि सरसत्वञ्च ते कवित्वगतम्।
तन्नः श्रुतिगोचरतां गमय जगन्नाथ! यत्किञ्चित्।।

### (1930) औचित्यम्

नायकनायिकयोर्यत् प्रावर्तत भेदमूलमध्ययनम्।
तस्य किमौचित्यमिति प्रश्न उदेत्येषु दिवसेषु।।

### (1931) विकसद् राष्ट्रम्

जनसामान्योऽनुभवति न विकासं हन्त कञ्चिदद्यापि।
परिगण्यत इह भारतमधुना विकसत्सु राष्ट्रेषु।।

### (1932) विडम्बना

आजन्मनः सुमनसां यापितमिह कल्पनासु येन मया।
दिवसान्नयामि सोऽहं कण्टकनिचयस्य मध्यगतः।।

### (1933) हिमगिरेः शृङ्गम्

शृङ्गं यावदुपेतुं सामर्थ्यं हिमगिरेर्न मय्यस्ति।
उड्डयमानेन मया स्वप्नेष्वसकृत् तदारूढम्।।

### (1934) सान्निध्यम्

जगतः कोलाहलतो दूरे तिष्ठन्ति ये विचारपराः।
लभते कोऽपि न तेषां सौभाग्येनैव सान्निध्यम्।।

**(1935) काव्यमार्गः**

सुगमो न शास्त्रमार्गः प्रतिभाति त्वत्कृते जगन्नाथ!
ऋजुरेष काव्यमार्गोऽवलम्बनीयस्त्वया चलता।।

**(1936) विसङ्गतिः**

यस्मिन् क्षेत्रे स्थातुं नाकाङ्क्षे हन्त दिवसमेकमपि।
निर्मातुमेष तत्र स्वगृहमिदानीं प्रवृत्तोऽस्मि।।

**(1937) सचेतसामनुभवः**

स्वमभिव्यनक्ति कविरिह यद्यपि शब्दैश्च कैश्चिदर्थैश्च।
अनुभूयते तथापि द्वयमपि तदतीत्य तद्विद्भिः।।

**(1938) दर्शनानामपि दर्शनम्**

दर्शनपदमधिरोढुं नार्हेन्मन्ये कथञ्चिदपि कविता।
प्रतिभाति दर्शनानामपि दर्शनमित्यसौ सुधियाम्।।

**(1939) समीहितं सिद्धम्**

त्वय्यायत्तं धातः पश्यामस्तावदेतदस्तित्वम्।
सिद्धं समीहितं ते कृत्येनैतेन कच्चिच्च।।

**(1940) निवेदनम्**

विनिवेदयाम एते किमपि यथाशक्ति नाम भूतार्थम्।
बद्धोष्णीषेषु वयं न पण्डितेष्वेषु गणनीयाः।।

**(1941) दैवस्य विक्रीडितम्**

संयोगेन न भाव्यं तेन वियोगोऽस्तु यस्य परिणामः।
विक्रीडितमप्युभयोरनयोर्दैवस्य जागर्ति।।

**(1942) स्थाणुः**

उपकृतये न परस्य स्वमर्पितं येन तावदस्तित्वम्।
तिष्ठन् स्थाणुरिवासौ समर्पणीयोऽग्नये नूनम्।।

**(1943) प्रतीक्षमाणः**

जगतो रङ्गादस्मात् प्रायः स्वीयाः समेऽपि निष्क्रान्ताः।
तिष्ठ प्रतीक्षमाणः स्वमितोऽवसरं जगन्नाथ!।।

**(1944) द्विजिह्वत्वम्**

सर्पेष्वेव न केवलमिह द्विजिह्वत्वमास्यतः स्फुरति।
नैके हन्त मनुष्येष्वपि द्विजिह्वाः प्रतीयन्ते।।

**(1945) अधिकारः**

उत्पतनस्य विहायसि कामं न समानमस्तु सामर्थ्यम्।
अधिकारस्तु समानः प्रत्येकं पक्षिणस्तस्मिन्।।

**(1946) उद्यानम्**

उद्यानं स्याद् विधिना सुरक्षितं केन सर्वतो दिग्भ्यः।
इति सम्मिलितैश्चिन्त्यं सर्वैरुद्यानवास्तव्यैः।।

**(1947) मनुष्यत्वम्**

अणुरपि दयोदयः स्याद् दलितान् प्रति यस्य हृदि दिनेष्वेषु।
तस्य च तत्सदृशस्य च न शङ्कनीयं मनुष्यत्वम्।।

**(1948) भाषाभेदः**

'बिस्मिल्ले'त्यभिदधते केचिच्च श्रीगणेशमभिदधते।
पश्यामोऽन्तरमनयोर्नहि भाषाभेदमतिरिच्य।।

**(1949) स्मृतिः**

तस्य स्पर्शस्य स्मृतिरद्यावधि निर्गता न हृद्देशात्।
असकृत् कृतः प्रयत्नस्तां विस्मर्तुं मया यदपि।।

**(1950) पन्थाः**

निर्दिष्टाः पन्थानो विविधा ग्रन्थेषु सन्ति नैकेषु।
निर्दिशतीह जनस्य स्वबुद्धिदीपोऽपि पन्थानम्।।

**(1951) विडम्बना**

वाणिज्यस्य न विद्या क्षेत्रमिति व्याहरन्ति विद्वांसः।
वणिजामेषु दिनेषु प्राचुर्यं ज्ञानपण्यानाम्।।

**(1952) चातुर्यम्**

स्वार्थः सिद्ध्यति मन्ये चातुर्येणैव केवलेनेह।
स्वस्वार्थसिद्धिरेका चतुराणां राजनीतिरिह।।

**(1953) बुभुक्षा**

जनसामान्यः सहतामेष बुभुक्षां कियन्तमिह कालम्।
भारतभाग्यविधातृभिरविलम्बितमेव सुविचार्यम्।।

**(1954) कल्याणमित्राणि**

स्मयमानेषु मिलत्सु च सत्स्वपि मित्रेषु जगति नैकेषु।
दौर्लभ्यमेव मन्ये सम्प्रति कल्याणमित्राणाम्।।

**(1955) शब्दः प्रमाणम्**

आधुनिकाः शब्दस्य प्रामाण्यं हन्त नैव मन्यन्ते।
सिद्ध्यै नहीश्वरस्य प्रमाणमिह शब्दमतिरिच्य।।

**(1956) उपदेशकः**

कोऽपि न मे सन्देशो नापि च वितरामि कञ्चिदुपदेशम्।
उपदेशकेषु काङ्क्षे गणनीयं नाहमात्मानम्।।

**(1957) मानवता**

संवेदनमिह यावन्मानवहृदि किमपि नाम जागर्ति।
मन्ये ततो न भविता मानवता तावदुच्छिन्ना।।

**(1958) अर्थभेदः**

प्रत्येकमेव शब्दो बोधयतीव स्वमर्थमिह भिन्नम्।
नहि कश्चिदर्थभेदो गृध्नत्वं गृध्नुतेत्यनयोः।।

## (1959) प्रत्युत्तरम्

प्रत्युत्तरमुपहर्तुं तस्मै सुतरां क्षमोऽहमिति जाने।
बाण इवैतल्लग्नं तद्धृदि भवितेति विरतोऽस्मि।।

## (1960) हृद्दीपः

प्रज्वलित एष तिष्ठेद् वितरेदालोकमन्तरपि चेति।
स्नेहेन पूरयाशु स्वमिह जगन्नाथ! हृद्दीपम्।।

## (1961) महार्हतमम्

जगति महार्हाण्यस्मिन् कामं नैकानि सन्तु रत्नानि।
जीवनमिति यदवाप्तं तदिह तु रत्नं महार्हतमम्।।

## (1962) भारतीया नारी

पुरुषेशु न रामत्वं कथमेषा हन्त तावदुत्सहताम्।
नार्येव भारतीया सीतात्वं भारमिव बोढुम्।।

## (1963) काव्यतत्त्वविदां जगत्

नान्दोलितमद्यावधि जगदेतत् किमपि काव्यतत्त्वविदाम्।
विरम जगन्नाथ! निजादस्मात् कविकर्मणोवितथात्।।

## (1964) पलायनम्

न जयः पराजयो वा युद्धक्षेत्रे विचारणीयो मे।
किमपि पलायनमस्माद् वैराग्यस्यास्य नोद्देश्यम्।।

### (1965) हृद्द्वयस्यैक्यम्

दिवसेष्वेषु प्रेम्णो भाषा परिवर्तितेव यत्किञ्चित्।
सीताया रामस्य च सममैक्यं हृद्द्वयस्य कुतः।।

### (1966) संस्कृतगवी

गुणरहितेष्वस्मासु स्यादेषोपस्नुता कथङ्कारम्।
संस्कृतगवीह तिष्ठति पश्यत विमनायमानेव।।

### (1967) लोकसामान्यः

शान्तो य एव दृश्यत उपर्युपरि जगति लोकसामान्यः।
उत्तिष्ठत्यस्यान्तः किमपि सहस्रं तरङ्गाणाम्।।

### (1968) विश्वं भारतञ्च

सम्पूर्णमेव विश्वं परितोऽग्निः प्रज्वलन्निवाभाति।
अग्निपरीतं गृहमिव भारतमेवास्ति नेदानीम्।।

### (1969) नेतृत्वम्

स्वसुखे स्वे च कुटुम्बे येषां सङ्कीर्णताश्रिता दृष्टिः।
तेष्वेतर्हि प्रायो निहितं राष्ट्रस्य नेतृत्वम्।।

### (1970) शास्तारः

लोकहितार्था येषां नीतिर्न खरा मृदुश्च नात्यर्थम्।
ते भारतस्य सम्प्रति शास्तारो नैव दृश्यन्ते।।

**(1971) सुप्तयः**

हन्त न जाने क्वासि प्रहिणोसि न कमपि हन्त सन्देशम्।
सुप्तय एवेदानीमाशाकेन्द्रं त्वदुपलब्धेः।।

**(1972) आशाबन्धः**

आशाबन्धो यो मम जीवितकस्यास्ति कश्चिदाधारः।
शिथिलीभवन्तमिव तं दिवसेष्वेष्वनुभवामीह।।

**(1973) विजयस्य कोऽर्थः**

कामं मन्यस्व न रे पराजयं स्वस्य तावदुपलब्धम्।
विजयस्य तेऽस्य कोऽर्थश्चातुर्येणोपलब्धस्य।।

**(1974) उदारचरितत्वम्**

निज एष एष पर इति दृष्ट्या स्मः क्षुद्रया वयं ग्रस्ताः।
हन्त विनष्टमिदानीमुदारचरितत्वमस्माकम्।।

**(1975) शरीरधर्मा**

सुप्तमिव प्रतिभाति प्रायश्चैतन्यमेषु दिवसेषु।
न शरीराद‌तिरिक्तः शरीरधर्मा जनो जातः।।

**(1976) धर्मो नीतिश्च**

वार्ता न जगन्नाथ! प्रवर्तयैतर्हि धर्मनीत्योस्ताम्।
कालस्यैतौ विषयौ विगतस्येति त्वमवधेहि।।

**(1977) जनसामान्यस्य हितम्**

जनसामान्यस्य हितं स्पृशति कवित्वं न यस्य यत्किञ्चित्।
न सुवर्णकारमपि तं कविमिह बहु मन्यते वाणी।।

**(1978) सुधियः**

पश्यत परानपेक्षा केचित् सुधियोऽपि हन्त राजपथे।
स्वध्वजमुत्तोल्य स्वयमिह दृश्यन्ते प्रधावन्तः।।

**(1979) काकोलूकम्**

शान्तिप्रियाणि यस्मिन् पतत्रिणां शेरते स्म युग्मानि।
काकोलूकं दृश्यत उद्याने साम्प्रतं तस्मिन्।।

**(1980) सङ्घर्षः**

सङ्घर्ष एव यस्मिन् संवृत्तो जीवनस्य शैलीव।
कालः स एष विस्मृतमस्माभिः प्रेमसम्मिलितम्।।

**(1981) वाग्देव्याः प्रसादः**

वाग्देव्यास्त्वयि मन्ये स जगन्नाथ! प्रसाद इति येन।
कविरिति मन्यन्ते त्वां कवित्वगुणहीनमपि नैके।।

**(1982) स्वार्थः स्वार्थत्यागश्च**

स्वार्थं समीहमानो यदपि प्रतिभाति जगति सर्वोऽपि।
स्वार्थत्यागपरा अपि तदपि कुतश्चिन्मिलन्त्येव।।

**(1983) अविश्वसनीया:**

सर्वेऽपि राजनीत्या व्यवहारा जगति सम्प्रवर्त्यन्ते।
नहि राजनीतिवत्सु प्रायो जन एष विश्वसिति।

**(1984) वराक:**

महिमा तवैव मन्ये कृपाकटाक्षस्य वाणि! लब्धस्य।
यदिह बिभर्त्यस्तित्वं जगति वराको जगन्नाथ:।।

**(1985) विश्वकाव्यम्**

प्रतिभाति विश्वमेतत् कवेरदृश्यस्य कस्यचित् काव्यम्।
रमणीयत्वं कामं शङ्कन्तामस्य केचिदिह।।

**(1986) शैवो वैष्णवश्च**

मन्ये न भेददृष्टि: काचित् तस्येह शैववैष्णवयो:।
काममिमौ मन्येतां प्रियोऽहमेवेह तस्येति।।

**(1987) द्वन्द्वातीत:**

सगुणोऽथ निर्गुणो वा स रूपवान् वा स रूपरहितश्च।
इत्यस्मासु द्वन्द्वो द्वन्द्वातीत: स कोऽपि महान्।।

**(1988) हिंसा**

यद्येवमेव हिंसा सुरसाया मुखमिव प्रवर्धेत।
अस्तित्वमेव नश्येद् वसुन्धरायां मनुष्यस्य।।

**(1989) दुष्प्रभाव:**

उच्छिन्नानि वनानि स्रोतांसि यदम्भसाञ्च शुष्यन्ति।
अनुदिनमुपैति शृणुमो भूगोलकमग्निगोलकताम्।।

**(1990) सम्पन्नेतराणां प्रवेशो निषिद्ध:**

लब्धुं शक्य: सम्प्रति सम्पन्नानां गृहे सतां सङ्ग:।
न जगन्नाथसदृशा: प्रवेष्टुमर्हन्ति निर्द्रव्या:।।

**(1991) कवित्वम्**

स्वीकुर्वते कवित्वं तव न जगन्नाथ! काव्यमर्मज्ञा:।
वर्त्म तदवलम्बस्व त्वमिदानीमेतदतिरिक्तम्।।

**(1992) गतानुगतिकत्वम्**

निन्दन्तीह प्रायो गतानुगतिकान् जनान् जना लोके।
सौभाग्येन तु लभ्यं गतानुगतित्वमिह सुधियाम्।।

**(1993) परिवर्तनम्**

उड्डयमाना नैके न पक्षिणो नभसि हन्त दृश्यन्ते।
उच्छेद: समजायत नैकेषां वन्यजन्तूनाम्।।

**(1994) घनश्याम:**

मन्दं मन्दं निनदन् विद्युत्परिवेष्टितो जलार्द्रार्द्र:।
आर्द्रीकुरुते कस्य न चेत:क्षेत्रं घनश्याम:।।

**(1995) 'हठी'**

न जगन्नाथः स्वे हृदि यद्यपि धत्ते दुराग्रहं कमपि।
हन्त हठीत्यभिदधते तथापि तं केचिदविनीताः।।

**(1996) कदर्थीकृतः**

एकं त्वमेव मन्ये यदतिष्ठन् कण्टकाः सुपरिवृत्य।
पाटल! तत्कथमात्माऽऽत्मना कदर्थीकृतो भवता।।

**(1997) पक्षतिच्छाया**

अस्मान् सदा विपद्भ्योऽरक्षदितो यस्य पक्षतिच्छाया।
सोऽद्य प्रवया जनकः प्रविहायास्मान् गतः स्वर्गम्।।

**(1998) शोचनीयः**

स्वार्थपरायां सम्प्रति न राजनीतौ हितं जनस्यास्य।
किङ्कर्तव्यविमूढः स शोचनीयस्तदेतर्हि।।

**(1999) मनुष्यत्वम्**

अनपेक्ष्य जातिमथवा वर्गं देशञ्च कालमनपेक्ष्य।
अवतरदिव करुणार्द्रं भणति मनुष्ये मनुष्यत्वम्।।

**(2000) अकारणद्वेषः**

केनापि कारणेन द्विषन्ति ये मां मम प्रिया इह ते।
ये मां विनैव कारणमिह द्विषन्ति द्विषो मम ते।।

**(2001) समानधर्मा**

अङ्गीकुर्वन्त्वेते न जगन्नाथस्य काममस्तित्वम्।
क्वचिदिह समानधर्मा कदाचिदस्यापि लभ्येत।।

**(2002) मनुष्यत्वम्**

सभ्यत्वस्य मनुष्यः सीमानं यदपि साम्प्रतं स्पृशति।
नानेन तदपि मन्ये विस्मर्तव्यं मनुष्यत्वम्।।

**(2003) मनुष्यत्वम्**

धर्मो न शोचनीयो नैकत्वं शोचनीयमीशस्य।
यच्छोचनीयमधुना तदेकमेतन्मनुष्यत्वम्।।

**(2004) कुक्कुटः**

खाद्यो भवितास्मीति स्वं कुक्कुट एष वेत्ति परिणामम्।
प्रत्येकं जागरयति जनं स्वयं प्रातरुत्थाय।।

**(2005) अबलात्वम्**

धर्मान्धा इति निपुणानपि तान् मन्यामहे वयं पुरुषान्।
प्रख्यापित इह यैर्बत नार्या धर्मोऽबलात्वमिति।।

**(2006) मनुष्यनामा जन्तुः**

स्वबलेन स्वधिया च स्वसमस्यानां समापतन्तीनाम्।
जन्तुर्मनुष्यनामा शक्तः कर्तुं समाधानम्।।

**(2007) विहग इव मनः**

विहग इवोड्डयमानं सन्ततमासीन्मनो मदीयं मे।
परिसरमपि नगरस्य न लङ्घितवानस्मि निजपद्भ्याम्।।

**(2008) तत्त्वज्ञः**

यस्य निजोदरपूर्तिर्जीवनसन्धारणस्य लक्ष्यमिह।
पशुसामान्ये तस्मिन् कश्चिल्लभ्येत तत्त्वज्ञः।।

**(2009) रजांसि**

नीचानीति कृतानि त्वयाऽऽहतानीह यानि रे पद्भ्याम्।
तानि रजांसि तवैवारूढान्युत्थाय मूर्धानम्।।

**(2010) मरुभूमावुद्यानम्**

येनास्यां मरुभूमावुद्यानं निर्मितं परिश्रम्य।
तस्य समाधिर्लभते खर्जूरस्यापि न च्छायाम्।।

**(2011) मृदुः कठोरश्च**

कविता कुसुममृदुत्वं कविता वज्रस्य तत् कठोरत्वम्।
सामानाधिकरण्यं मार्दव-काठोर्ययोश्च कवौ।।

**(2012) परिवर्तनम्**

यस्त्वं पदातिरासीरध्वगतो रेणुरुषितः पूर्वम्।
स जगन्नाथ! प्रचलसि सम्प्रति गजराजमधिरूह्य।।

**(2013) गीतानां कर्णकटुत्वम्**

श्रुतिमधुराणां तेषां दिनानि यातानि हन्त गीतानाम्।
उद्वेजयन्ति सम्प्रति गीतानि श्रोत्रपतितानि।।

**(2014) जगन्नाथः**

स्मयमानो योऽदृश्यत कथाप्रसङ्गेषु मित्रमध्यगतः।
एकाकी विनिमीलति स जगन्नाथो दिनेष्वेषु।।

**(2015) विडम्बना**

यं मामनुगच्छन्तोऽनेकेऽभूवन् गतेषु दिवसेषु।
सोऽहंताननुगच्छन् नयामि दिवसान् दिनेष्वेषु।।

**(2016) उत्तरं प्रतीक्षमाणः**

अवशिष्टं न किमपि तद् यदभिहितं हन्त तावदिह न मया।
उत्तरमाकर्णयितुं प्रतीक्षमाणोऽहमेतर्हि।।

**(2017) शान्तः**

अहमहमिकासु जगति प्रत्यहमेव प्रवर्धमानासु।
जन एकोऽपि न दृश्यत इह यः शान्तः क्षणं तिष्ठेत्।।

**(2018) नृत्यारम्भः**

सम्प्राप्ता प्रावृडिति प्रसृता वार्ता वने समग्रेऽपि।
न परं नृत्यारम्भः केनचिदपि बर्हिणेन कृतः।।

**(2019) अचिन्त्या स्थितिः**

शक्तेरेष मनुष्यः कामं निर्माणमस्त्वचिन्त्यायाः।
तस्यैव कल्पनायाः किन्न भवेत् सा चमत्कारः।।

**(2020) संस्कृतगवी**

रक्षन्ति भारतीया न गृहे यां साऽतिदैन्यमापन्ना।
संस्कृतगवीह सम्प्रति तिष्ठत्यसुरक्षितेव बहिः।।

**(2021) सतां हृत्सु स्थानम्**

कामं भवन्तु बहवः परकायेषु प्रवेश इह निपुणाः।
कतिपय एवार्हन्ति स्थानं मन्ये सतां हृत्सु।।

**(2022) आर्याणां निर्माणम्**

'आर्याणां' निर्माणे द्वित्रा एवेह सिद्धिमलभन्त।
कश्चित्स जगन्नाथः प्रगल्भतां नाम काममिह।।

**(2023) शरसन्धानपराः**

स्वं प्रच्छाद्य त्वाम्प्रति कथय जगन्नाथ! हेतुना केन।
तिष्ठन्ति सन्दधाना धनुषि शरान् केचिदद्यापि।।

**(2024) वैवश्यम्**

छायाया अपि यस्य स्पर्शो नासीत् कदापि मदभीष्टः।
तमनुव्रजामि दिवसेष्वेषु च्छायेव नित्यमहम्।।

**(2025) पटाक्षेपः**

विदितः स नैव तेन प्रवर्तितो हन्त पूर्वरङ्गविधिः।
दृश्यस्य नाटकान्तर्यस्य प्राप्तः पटाक्षेपः।।

**(2026) अव्याख्येयम्**

प्रत्येकमेव रूपे सङ्गीतस्य प्रतीयते रागः।
यद्यपि न तस्य शक्यं व्याख्यानं कर्तुमस्माभिः।।

**(2027) कविता**

लक्षणपञ्जरबद्धा कविता विहगी न शक्यते कर्तुम्।
यद्यप्येनां बन्धुं पूर्वमपि प्रायतन्त बुधाः।।

**(2028) लघ्वी विहगी**

त्वरयोड्डीयोड्डीय प्रत्येकं पादपेषु तिष्ठन्ती।
लघ्वी काऽपि सुवर्णा विहगी प्रतिभाति कविता मे।।

**(2029) भारतीयत्वम्**

सत्यपि विचारभेदे भाषाभेदे च भारतीयेषु।
उल्लसति तत्त्वमेकं यत्किञ्चिद् भारतीयत्वम्।।

**(2030) भारतोद्यानम्**

नित्यं भारतवासिभिरिह सम्मिलितैस्तथा विधातव्यम्।
नोच्छिद्येत यथैतद् भारतमित्येकमुद्यानम्।।

**(2031) म्लाना: सुमनस:**

म्लाना: सुमनस एता स्रज उपयुक्ता न हन्त निर्माणे।
विधिना केन स्वागतमधुनाऽभिमतस्य कर्तव्यम्।।

**(2032) धर्मगुरव:**

कोऽयं धर्मगुरूणां हठवाद: स्वस्वधर्ममधिकृत्य।
अन्येषां धर्माणां समादरोऽपेक्षणीयस्तै:।।

**(2033) कविरिति निर्णय:**

कविसमवायो दृश्यत एषु प्रायो दिनेषु सर्वत्र।
को नाम वस्तुत: कविरिति निर्णेतुं न शक्यमिह।।

**(2034) स्वाधिकार:**

झटितीव स्वाधिकृतं वस्तु ग्राह्यं करेण समुपेत्य।
किमपि न शक्यं लब्धं प्रदर्शनेनेह विनयस्य।।

**(2035) सुरापगा**

ये पल्वले रमन्ते ते भेका मानसं न लब्धार:।
य इह सुरायां मग्ना भाग्ये न सुरापगा तेषाम्।।

**(2036) प्रतीक्षारता:**

लब्धस्त्वद्भवने यै: प्रवेश इह वेत्सि किन्तु तानेव।
अपि विदिता इह केचित् तव प्रतीक्षारता द्वारि।।

**(2037) 'गान्धिनो' वानराः**

न वयं मूका न वयं बधिरा जगतीह किञ्च नाप्यन्धाः।
इच्छामो व्यवहर्तुं 'गान्धिन' इह वानराः सन्तः।।

**(2038) दृङ् निक्षेप्या**

खादतपिबता दृश्यत इह सर्वत्रैव तावदस्माभिः।
यत्र जलान्नाभावो दृङ् निक्षेप्यैव तत्रापि।।

**(2039) अनुगतः**

न चलत्यवमत्यायं वाल्मीकिव्यासकालिदासादीन्।
तदनुगतेषु तदपि न स्मरन्ति केचिज्जगन्नाथम्।।

**(2040) सहचरः**

क्वचिदातप इह मिलितो मिलिता छाया मम क्वचिच्च पथि।
हन्त न कश्चिन्मिलितः सहचर इह कोऽपि मे चलतः।।

**(2041) अहमहमिका**

अन्योन्यं सङ्घट्टो नान्यः कोलाहलस्तथा नान्यः।
अहमहमिका प्रवृत्ता सिंहासनमारुरुक्षूणाम्।।

**(2042) बाह्या दृष्टिः**

मन्यत इतो हिमाद्रिर्नगाधिराजो न देवतात्मेति।
गङ्गा केवलमेका नदी न देवापगेतीह।।

**(2043) आधुनिकाः**

न परम्परासु सम्प्रति विश्वासो वा सनातने धर्मे।
ईशस्यानस्तित्वं मन्यन्ते केचिदाधुनिकाः।।

**(2044) जगन्नाथः**

अभ्यस्तो राजपथे न जगन्नाथः कदापि सञ्चरितुम्।
नय रे पदातिमेनं जनसामान्योचितेन पथा।।

**(2045) सर्वथा जडः**

रम्याणि वीक्ष्य मधुरान् निशम्य शब्दांश्च नान्तरुत्सहते।
न स्मृतिपथमायान्ति च जननान्तरसौहृदानीह।।

**(2046) सनातनो धर्मः**

धर्मः सनातनो यः पूर्वमभूद् भारतस्य सर्वस्वम्।
दिवसेष्वेषु स जीर्यति जीर्णग्रन्थेषु निक्षिप्तः।।

**(2047) क्षीरसमुद्रः**

क्षारः कोऽपि समुद्रः प्रतीतिमायाति हन्त जगदेतत्।
श्रूयत इतः सुदूरे क्षीरसमुद्रोऽस्ति कश्चिदिति।।

**(2048) अस्तित्वम्**

स्वीकार्यमस्तु तेषां न जगन्नाथस्य काममस्तित्वम्।
येषामस्तित्वमितः सिद्धमकिञ्चित्करं तावत्।।

### (2049) गन्धस्य शीलस्य च स्थानम्

वर्णप्रकर्षवत्सु स्थानं गन्धस्य यत् प्रसूनेषु।
जगतीह मानवेषु स्थानं शीलस्य तन्मन्ये।।

### (2050) अस्तित्वम्

ध्वनदाभाति निरन्तरमस्तित्वं यस्य नाम यत्किञ्चित्
स चमत्कारः कस्यचिदङ्गुल्या घट्टितस्यैव।।

### (2051) कवित्वम्

नास्य जगन्नाथस्यानुभूयते निर्मितौ चमत्कारः।
आभासते कवित्वं तथापि तस्यामिति ब्रूमः।।

### (2052) अन्तर्नादः

हरतश्चित्तमुभावपि घण्टानादश्च शङ्खनादश्च।
कश्चित्त्वन्तर्नादो निमज्जयति चित्तमानन्दे।।

### (2053) खेदकरः

जनयति खेदं सुधियां प्रवर्तमानः प्रवर्धमानश्च।
अश्वमहिषयोरिवि यः स विरोधः पाक-भारतयोः।।

### (2054) उद्यानम्

वृक्षैः फलपुष्पभरैर्नोद्यानस्यास्य केवलं शोभा।
परमुल्लासो विहगैर्नानास्वरवर्णभृद्भिश्च।।

**(2055) आशानदी**

आशा नाम नदी साऽवर्तत भरिता मनोरथाम्भोभिः।
दिवसेष्वेषु भृशं सा प्रतीतिमायाति शुष्यन्ती।।

**(2056) प्रभावः**

यद्यप्यन्ये कवयः प्रभावमातन्वते स्वकविताभिः।
अस्य जगन्नाथस्य तु तथापि कश्चित् प्रभावोऽन्यः।।

**(2057) मृदुः**

मृदुना भाव्यमवश्यं तथापि भाव्यं न हन्त मृदुनैवम्।
भस्मचयं मन्वानस्त्वामास्कन्देत कोऽपि पदा।।

**(2058) उच्छ्वासः**

शृण्वन्तु श्रोतारोऽवधारयन्त्वेनमादरेणेह।
सम्प्रति कथाप्रसङ्गः स्वमन्त्यमुच्छ्वासमाप्नोति।।

**(2059) चक्रव्यूहः**

चक्रव्यूहं रचयितुमभितस्त्वां केचन प्रवर्तन्ते।
कुर्या न जगन्नाथ! प्रमादमधुनेति वच्मि त्वाम्।।

**(2060) वाग्व्यवहारः**

वाग्व्यवहारं कविता न व्यभिचरतीति मन्वते बहवः।
मन्ये वाग्व्यवहारः कोऽप्यतिरिक्तः स कवितेति।।

## (2061) 'नेतारः'

जनसामान्येन समं दिनमप्येकं न नेतुमिच्छन्ति।
तस्य सुखाय सचिन्तास्तथापि तिष्ठन्ति 'नेतारः'।।

## (2062) विहगाः

तरुशाखासु स्थित्वा बहु मन्ये सुमृदुकूजतो विहगान्।
उड्डयमाना मह्यं ते रोचन्ते भृशं नभसि।।

## (2063) विरोधाभासः

स्वान्तःसुखमित्येकं प्रवर्तयत्येव किञ्चिदभिधातुम्।
किमपि श्रावय नहि मामित्यभिधत्तेऽथ कोऽप्येत्य।।

## (2064) अभिभवः

नैकेऽभिभूय मामिह पथि दूरे निर्गताः प्रतीयन्ते।
मन्ये मयाऽपि केचिच्चलितेनाग्रेऽभिभूताः स्युः।।

## (2065) विवादोपशमः

सिद्धान्तधीः सुधीभिर्विषये सत्यस्य नाश्रिताऽद्यापि।
उपशाम्येत विवादो विधिना केनेति तैश्चिन्त्यम्।।

## (2066) भूषा

साभिप्रायैर्यद्यपि भूषां धत्ते विशेषणैः कविता।
भूषा तथापि तस्यां प्रतीयते भारभूतेव।।

**(2067) काकानामाधिकारः**

आम्रफलेष्वधिकारः काकानामेव हन्त पक्वेषु।
वर्तयतामुद्याने कोकिलको येन केनापि।।

**(2068) गुरुगोविन्दसिंहस्य श्येनः**

येन स्थितं कराग्रे सद्गुरुगोविन्दसिंहदेवस्य।
को वर्णयितुं शक्यस्तस्य श्येनस्य सौभाग्यम्।।

**(2069) जगन्नाथः**

व्याकीर्णतां गतानि प्रायश्छन्दांसि यस्य कवितायाः।
तमपि जगन्नाथं यत् कविरित्याहुस्तदाश्चर्यम्।।

**(2070) आलोकस्याश्वासनम्**

संवर्धने प्रयासो येषां लोके सदाऽन्धतमसस्य।
हन्त त एवाश्वासनमालोकस्याधुना ददति।।

**(2071) मनुष्याकृतयः पशवः**

न मनुष्यत्वस्येतः सिद्ध्ये किञ्चित् प्रमाणमाकारः।
हन्त मनुष्याकृतयः क्रूराः पशवोऽपि दृश्यन्ते।।

**(2072) असन्तः सन्तश्च**

स्वोद्दश्यसाधने खलु भवन्त्यसन्तः सदैव फलितार्थाः।
तस्मिन् प्रायो विफला अभिलक्ष्यन्ते जनाः सन्तः।।

**(2073) जनसामान्यः**

उत्साहस्याभावो जनसामान्यस्य हन्त यो हृदये।
मन्ये स एव विपदामासां संवर्धने हेतुः।।

**(2074) त्रिवेण्या मालिन्यम्**

गङ्गैव नाम मलिना न च मलिना हन्त केवलं यमुना।
किञ्च सरस्वत्यपि सा बिभर्ति मालिन्यमेतर्हि।।

**(2075) तेजस्विनोऽधीनमस्तु**

तेजस्वि तस्य मन्ये तदधीनं किमपि सम्यगिह यत्नात्।
उन्मीलितेव दृष्टिर्येनाभूदस्य विश्वस्य।।

**(2076) मनुष्यस्य पशोश्चान्तरम्**

उपदिष्टं यत्पशुनाऽन्तरं मनुष्यस्य नाम नः पूर्वैः।
काले प्रवर्तमाने तद् भाति क्षीयमाणमिव।।

**(2077) सिंहासनार्थमहमहमिका**

सिंहासनमहमिकयाऽऽरोढुं नैकेऽत्र सन्ति यतमानाः।
बलवत्तमो य एकः स एव सफलो भवेदेषाम्।।

**(2078) पलालजालम्**

य इतः सङ्घटयन्ते शब्दसमूहं पलालजालमिव।
अधिकाव्यगोष्ठि तेषामपि गणनीयत्वमिति खेदः।।

## (2079) दूरदर्शिनामन्धत्वम्

प्रथयन्ति केचिदात्मन इह ये भृशमेव दूरदर्शित्वम्।
तेषामन्धत्वमपि प्रायो जगति स्फुटीभवति।।

## (2080) सुमनसां खेदः

प्राप्ते वसन्तकाले नवत्वमुद्यानमाप्तवद् भाति।
आकारेषु सुमनसां तदपि प्रतिभाति खेद इव।।

## (2081) मौनमभिनन्दनम्

स्मयमानास्तिष्ठामः प्रयत्नतो यस्य वासरेष्वेषु।
अभिनन्दामः सम्प्रति तमदृश्यं हन्त कैः शब्दैः।।

## (2082) सौभाग्यवन्तः

आयान्ति भाग्यवन्तो दृष्टिपथं यत्र तत्र सर्वत्र।
किन्त्वङ्गुलिगणनीया दृष्टाः सौभाग्यवन्त इह।।

## (2083) सत्याभासः

सामग्र्येण न सत्यं शक्यं केनापि तावदधिगन्तुम्।
सत्याभासं बहवो मन्वानाः सन्ति सत्यमिति।।

## (2084) वाङ्मयस्य हितम्

संवर्धयन्ति केचित् स्वशब्दराशिं पलालजालमिव।
सिद्ध्येत् कियदेतेनाण्वपि कथयत वाङ्मयस्य हितम्।।

### (2085) बुभुक्षा

ते भोजनस्य कथमिव सुखमनुभवितुं कदाचिदर्हेयुः।
प्राप्ताऽनुभवविषयतां न बुभुक्षाऽऽजन्मनो येषाम्।।

### (2086) गमनोत्साहः

कामं प्रवर्ततां क्वचिदिह कश्चिन्मेऽवरोद्धुमध्वानम्।
मन्ये गमनोत्साहं न शक्नुयात् किञ्चिदवरोद्धुम्।।

### (2087) वैलक्षण्यम्

न जगन्नाथ! कवित्वं चारु प्रतिभाति तावकं यदपि।
वैलक्षण्यं तदपि प्रायस्तस्यास्ति यत्किञ्चित्।।

### (2088) कोषाणां वैयर्थ्यम्

प्रायः समेऽपि शब्दा निरर्थकत्वं गता दिनेष्वेषु।
शब्दार्थवाचकानां कोऽप्युपयोगो न 'कोषाणाम्'।।

### (2089) स्वान्तःसुखम्

श्रोष्यति समानधर्मा मत्कवितामिति न रे प्रवृत्तः स्याः।
स्वान्तःसुखाय नैके कवयन्तोऽद्यापि दृश्यन्ते।।

### (2090) कविता, जनसामान्यस्य भाषायाम्

जनसामान्यः कवितां यद्यपि न श्रोतुकाम आभाति।
भाव्यं परं कवितया जनसामान्यस्य भाषायाम्।।

**(2091) वंशीनादः**

आगच्छागच्छेति ह्वयमानाः सन्ति केचिदात्मीयाः।
तव वंशीनादो मां प्रवर्तयत्यग्रतो गन्तुम्।।

**(2092) अस्तित्वम्**

स्वस्मिन्नहमन्वभवं यदैव यत्किञ्चिदेष दातृत्वम्।
रिक्तं तदैव लक्षितमात्मन एतन्मयाऽस्तित्वम्।।

**(2093) स्मितम्**

प्रतिभाति कस्यचित् स्मितमिह मे विकसन्मृदु प्रसूनमिव।
शूकशिखेव तु कस्यचिदुद्वेजयतीव हृदयगता।।

**(2094) प्रेतावासः**

क्वेदानीं ते सुहृदस्तेषामार्द्रं क्व तच्च सौहार्दम्।
प्रेतावास इवात्मन एतत्सञ्जातमस्तित्वम्।।

**(2095) दृग्गोचरो भव**

त्वामहमेकमनेकेष्वेषु दिदृक्षुर्भ्रमामि दृश्येषु।
क्वासि कदाचित् सकृदपि मम गोचरतां दृशोर्गच्छ।।

**(2096) कविम्मन्याः**

कवितायाः स्वप्नेऽपि स्पर्श इहाजन्मनो न यैर्लब्धः।
अधिकाव्यगोष्ठि तेऽपि स्थिताः स्मयन्ते कविम्मन्याः।।

### (2097) कविता

यत्पश्यामि स्वदृशोर्विनिमीलितयोर्मुहूर्तमेकान्ते।
प्रायस्तदैव मन्ये कवितापदमादधाति मम।।

### (2098) अनपेक्षितो वाचामुपयोगः

स्वयमाकृतिर्मदीया मदीयमन्तर्गतं यदभिधत्ते।
कथमेतर्हि स्वाभिर्मयाऽभिधातव्यमिह वाग्भिः।।

### (2099) आत्मीयानामभावः

केनालपेयमिह सममिह तिष्ठेयञ्च हन्त केन समम्।
मम समदुःखसुखानामात्मीयानामभाव इह।।

### (2100) झञ्झावातः

वासन्तिकं समीरं प्रतीक्षमाणोऽस्मि कञ्चिदिह यावत्।
कोऽयमुदीतोऽकस्माज्झञ्झावातः पुरस्तावत्।।

### (2101) मनुष्यत्वम्

दुर्लभमप्यस्माकं जनयेत् तोषं मनुष्यजन्म नहि।
यावदुदारमुदीतेऽस्मासु न किञ्चिन्मनुष्यत्वम्।।

### (2102) श्येनाः

उड्डयमाना गगने न कपोताः क्वापि हन्त दृश्यन्ते।
केचित् प्रतीक्षमाणाः श्येनाः सीमासु तिष्ठन्ति।।

**(2103) सितासिते नद्यौ**

असकृत् प्रदर्श्य रूपं जनय न मयि दिल्लि! मोहमेतर्हि।
स्वीयान् नयामि दिवसान् मध्ये नद्योः सितासितयोः।।

**(2104) कविसमवायः**

सुकवीनां समवायस्तिष्ठत्यत्रावधेहि वच्मि त्वाम्।
पठनीयं सुविचार्य प्रत्येकं पाठ्यमेतर्हि।।

**(2105) शिवानां कलकलः**

उत्तिष्ठ सिंह! निद्रां निजां परित्यज्य रे सकृद् गर्ज।
कलकल उदीयमानः पुनः शिवानां तव द्वारि।।

**(2106) दातृत्वम्**

साम्प्रतमस्मास्वधिकं प्रवर्धमानं यथा ग्रहीतृत्वम्।
ह्रसमानमस्त्युदारं तथैव दातृत्वमस्माकम्।।

**(2107) कोलाहलः**

कोलाहल इव कश्चित् त्वां परितो बाढमेष जागर्ति।
क्वचन जगन्नाथेन त्वयेत एतर्हि गन्तव्यम्।।

**(2108) बिडालाः**

तिष्ठत समेऽप्रमत्ता उद्यानस्यास्य नीडवास्तव्याः।
वन्याः केऽपि बिडालाः प्रवेष्टुमातन्वते यत्नम्।।

**(2109) मानवता**

आक्रन्दतीव सम्प्रति मानवता द्रौपदीव सीतेव।
प्रकटीकुरु स्वमथवा प्रहिणु घनश्याम! दूतं स्वम्।।

**(2110) भवभूतिः कालिदासश्च**

समवायेऽत्र कवीनां मन्ये तिष्ठन्त्यनेकशो येषु।
प्रच्छन्नौ स्तः सुतरां भवभूतिः कालिदासश्च।।

**(2111) संस्कृतगवी 2**

चलितश्चलेत् स्थितायां तिष्ठेच्छायेव सेवमानो यः।
संस्कृतगवी दिलीपं प्रतीक्षमाणेव तं कमपि।।

**(2112) विवेकानन्दः**

समुदेत्यन्धतमसमिव पश्चिमदिग्व्योम्नि किमपि गर्जदिव।
कोऽपि विवेकानन्दः पूर्वस्यां भानुमानुदियात्।।

**(2113) दीपशिखा**

व्यासे सूर्येऽनुदितेऽनुदिते वाल्मीकिनाम्नि चन्द्रे च।
दीपशिखैका मार्गप्रदर्शनायालमद्यापि।।

**(2114) काकोलूकम्**

राज्यं प्रतिष्ठितं स्यात् काकानां वा किमप्युलूकानाम्।
काकोलूकमिदानीमुद्याने जायमानमिव।।

**(2115) स्वरसंवादः**

कोलाहलभरितेऽस्मिन् रागाः किमु विस्मृतास्त्वया वाणि।
अनुभवमायाति तव स्वरसंवादो न वीणायाम्।।

**(2116) मानवता**

सन्ततमिदं ययाऽऽसीदुद्यानं सुरभि शोभमानञ्च।
पददलिता सा क्लिश्यति हन्त वराकीह मानवता।।

**(2117) साहित्यसङ्गीतयोः स्रोतः**

सङ्गीतं कर्णामृतमिह क्व तत् तत् क्व चेह साहित्यम्।
सम्प्रत्यनयोः स्रोतो भुवि क्वचिल्लीयमानमिव।।

**(2118) अवसरवादः**

न रहस्यवादमथवा प्रयोगवादं न चावलम्बन्ते।
अवसरवादे प्रायः कवय इदानीं निषीदान्ति।।

**(2119) दिल्ली**

केषाञ्चित् कृत आस्तां कामं नेदीयसी मता दिल्ली।
अस्मादृशां तु पक्षे दवीयसी सा सदैव मता।।

**(2120) युद्धं शान्तेरनुपायः**

लब्धोऽपि युद्धविधिना विजयो नैवेह वस्तुतो विजयः।
भ्रममेव किञ्च मन्ये युद्धं शान्तेरुपाय इति।।

**(2121) दुराग्रहः**

पन्थानः सर्वेऽपि त्वामभिलक्ष्य प्रयान्ति यदपीह।
अस्माकमेव पन्थाः श्रेष्ठ इति त्वाग्रहः कोऽयम्।।

**(2122) सुमनसः**

सन्धारयन्तु केचित् काममुपेक्षां तथापि लोकेऽस्मिन्।
न कथञ्चिदपि सुमनसां पददलितत्वं किमप्युचितम्।।

**(2123) स्मित-भेदः**

स्मयमाना इह केचिन्मन्ये वर्षन्ति जगति पुष्पाणि।
केषाञ्चन स्मितन्तु प्रस्तरखण्डस्य पर्यायः।।

**(2124) गृध्रगोमायू**

रसवादेषु कलायां साहित्ये साम्प्रतञ्च विरतेषु।
श्रूयत एषु दिनेषु तु संवादो गृध्रगोमाय्वोः।।

**(2125) ग्रीष्मस्य साम्राज्यम्**

सुबहोः कालादास्मिन् ग्रीष्मस्यैवास्ति हन्त साम्राज्यम्।
भविता किन्नु वसन्तागम उद्याने न भूयोऽपि।।

**(2126) भारतस्य संस्कृतिः**

निर्भरमेकाऽपि सती यस्या मूर्तिस्त्वनेकधा बिभिदे।
तां भारतस्य संस्कृतिमेते वन्दामहे रुचिराम्।।

**(2127) सिंहासनम्**

सिंहासनानि मन्ये जगतीह स्थापितान्यनेकानि।
यस्मिन् स कोऽपि तिष्ठति तत् खलु सिंहासनं त्वन्यत्।।

**(2128) सद्भाव-सुमनसः**

विद्वेषकण्टकानामुद्याने नित्यमेष उत्कर्षः।
क्व नु सद्भावसुमनसां कृतेऽवकाशो भवेत् तत्र।।

**(2129) मानवस्यास्तित्वम्**

विरमतु नाम विवादो नास्तीत्यस्तीति चेशमभिलक्ष्य।
शङ्कास्पदमस्तित्वं सञ्जातं मानवस्यैव।।

**(2130) कालिदासो भवभूतिश्च**

झङ्कारो वाग्देव्या वीणायाः कोऽपि कालिदास इह।
कर्णामृतमिह मन्ये भवभूतिर्नूपुरक्वणितम्।।

**(2131) पथप्रदर्शकः**

ऋजवः कुटिला नैके पन्थानः सर्वतः प्रतिष्ठन्ते।
उचितः पथप्रदर्शक इह नहि बत वस्तुतो मिलति।।

**(2132) गवाक्षाः**

यस्य गृहस्य गवाक्षाः पिहितास्तिष्ठन्ति हन्त सर्वेऽपि।
लभतां कथं प्रवेशं तस्मिन् पवनः प्रकाशो वा।।

# जगन्नाथसुभाषितम्

(भागः - 3)

**(1)**

एषां वचःसु कुर्यात् कः प्रत्ययमत्र राजनीतिविदाम्।
प्रातर्ये भाषन्तेऽन्यत् सायं ये ततोऽन्यदिह।।

**(2)**

महता सौभाग्येन प्राप्यत इह कोऽपि सहचरो जगति।
बहवोऽन्यथेह दिवसान् नयन्त एकाकिनो दृष्टाः।।

**(3)**

सौन्दर्यज्ञोऽस्मीति प्रायः सर्वोऽपि मामवोचदिह।
सौन्दर्यमेतदिति मां नाद्यावधि निरदिशत् कोऽपि।।

**(4)**

न मयाऽर्जिता प्रतिष्ठा कविता निर्माणलब्धदाक्ष्येषु।
मम सौभाग्यं यदहं गतानुगतिकोऽभवं तेषाम्।।

**(5)**

आङ्गलैर्भारतराष्ट्रे निजाधिकारः समुज्झितो यदपि।
भारतगवी प्रविश्यान्तरश्नुवाना तदप्याङ्ग्लीम्।।

**(6)**

कमपि महाकारुणिकं महानुभावं पुनर्भुवि प्रहिणु।
आर्तस्वरो भुवोऽस्या यदि गच्छेत् कर्णगोचरताम्।।

**(7)**

लेखन्या यदि सुष्ठु स्वादु च लिख्येत पद्यमेकमपि।
तस्यै समर्पयेयं निजपद्यानां सहस्रमपि।।

**(8)**

पूर्वं काशी मथुराऽयोध्योज्जयिनी च दर्शनीयासु।
आसन् पुर्यः सम्प्रति मुम्बय्याकर्षणायालम्।।

**(9)**

सत्यं नाम ज्योतिः पिहितं भुवि बलवताऽप्यसत्येन।
चक्षुष्मतां पुरस्तात् प्राप्तेऽवसरे परिस्फुरति।।

**(10)**

सम्मर्दिताः स्वपद्भ्यां यदपि सुमनसस्त्वया कठोरेण।
तदपि तवैतो कठिनौ ताभिः सुरभीकृतौ चरणौ।।

**(11)**

कैव विधातः! प्रकृतिस्तव, कारुण्यं प्रवर्तमानेऽस्मिन्।
हृत्सु जनानां जनयन् कार्पण्यं यत्त्वमाचरसि।।

**(12)**

दोषे कथं परेषां क्षिपसि जगन्नाथ! दृष्टिमात्मीयाम्।
दोषेषु सत्सु सुतरां गणयितुमात्मन्यशक्येषु।।

**(13)**

स्मृतिपथमानीतेषु स्रवदश्रुषु हन्त तेऽक्षिकोणेषु।
कथमपि न पारयामि स्वधैर्यमेकान्तमवरोद्धुम्।।

**(14)**

त्वद्देशात् त्वत्प्रहितस्त्वत्सन्देशं कदाचिदादाय।
अप्यायास्यति कश्चिन्मदन्तिकं तावको दूतः।।

**(15)**

सुस्नातस्य न दिवसाः सुखशयितस्येह नापि यामिन्यः।
उत्पन्नाय युगेऽस्मिन् मन्ये न सुखं मनुष्याय।।

**(16)**

तासां कथाप्रसङ्‌गे परिवर्तयसे स्वमाननं प्रायः।
न सुमनसामेतावान् कठोर आसीः पुरा विषये।।

**(17)**

जनयन्तीह विवादं विषयाः सर्वत्र सर्व–धर्मस्य।
मन्ये विवेक एको बिभर्ति निर्णायकत्वमिह।।

**(18)**

स्वस्यास्तित्वस्य कृते यतमाना जन्तवोऽत्र दृश्यन्ते।
आनीयतेऽत्र सर्वः कालेन च नीयते तेन।।

**(19)**

प्रतिसंवत्सरमतिथय इमे प्रयागं सुतीर्थमुपयान्ति।
एते खगा न वस्तुत एते नः पूर्वजा एव।।

**(20)**

सुतरामुमाधवस्य क्षेत्रं वा माधवस्य कामं स्यात्।
नाल्पीयानपि काशीप्रयागयोर्भक्तिभेदो नः।।

**(21)**

धनमेव तावदेकं सर्वस्येहेप्सितं वरीवर्ति।
सम्प्रति तपोधना अपि विक्रीय तपोऽर्जयन्ति धनम्।।

**(22)**

तप इति मन्वानानां प्रवृत्तिरासीत् कलाकृतां पूर्वम्।
नहि लभ्यतेऽत्र सम्प्रति कलाकृतां सा कलादृष्टिः।।

**(23)**

नैकविधासु स्वस्मिन् हृद्ग्रन्थिष्वासु विद्यमानासु।
ग्रन्थग्रन्थीनां स्याद् विमोचने कोऽर्थवान् यत्नः।।

**(24)**

यद्यपि सत्यस्यैकं स्वरूपमित्यत्र नास्ति सन्देहः।
तस्य व्याख्याभेदस्तथापि मन्येऽलमनिवार्यः।।

**(25)**

यद्यप्यहमात्मानं स्वशरीरादनतिरिक्त इति जाने।
भिन्नोऽस्मीति तथापि प्रत्यय एषोऽपि समुदेति।।

**(26)**

विद्योतसे त्वमेव व्योम्न्यादित्यादिरूपमधिगत्य।
प्रवहसि नित्यं भूमौ त्वमेव गङ्गादिरूपेण।।

**(27)**

विश्वस्मिन्नन्योन्यं प्रवर्तमानासु ते शुभेच्छासु।
मानव! न त्वत्पिण्डं मुञ्चति हा राक्षसी हिंसा।।

**(28)**

स्वीकुरु न स्वीकुरु वा त्वामुपगच्छेन्नवेयमुपगच्छेत्।
त्वामन्तरेण गच्छेत् क्व वराकी मामकी प्रणतिः।।

**(29)**

अस्मद्भीता रिपवः पलायमाना पुरा नु येऽभूवन्।

दुःखं तेभ्यो भीता वयं पलायेम हीदानीम्।।

**(30)**

सिंहो गुरुगोविन्दः स्मृतिपथमानीयतामरे चेतः!

यस्य महद् बलिदानं स्मरतामश्रूणि निर्यान्ति।।

**(31)**

तृष्णे ! त्यज मत्पिण्डं लघूकृतस्त्वामहं समासेव्य।

लालाटिकोऽस्मि तेषां ये दृष्टा नाक्षिकोणेन।।

**(32)**

काव्यस्य लक्षणं यत् प्राचीनैः स्वीकृतं सचेतोभिः।

साम्प्रतिकैस्तत् साम्प्रतमुपहसनीयत्वमापन्नम्।।

**(33)**

कः स्यादिह त्वदन्यो भाग्यविरहितो जनो जगन्नाथ!

शत्रुत्वमाचरन्ति प्रकाममिह यस्य मित्रतमाः।।

**(34)**

लघ्वी काचिद् विहगी चूङ्कृत्येतो विनिर्गता सहसा।

तस्याः किमभिप्रेतं चूङ्कारेणेति विमृशामि।।

**(35)**

साक्षान्नारायण इव हसिते बालस्य निर्मले हसति।

नैर्मल्यं व्याख्यातुं तस्य समर्थो न कश्चिदपि।।

**(36)**

गोप्यस्ता नहि लब्धाः सा मीरा नापि कुत्रचिल्लब्धा।

आयुष्येतावत्यपि नावगतः प्रेमशब्दार्थः।।

**(37)**

यत्रोद्यानान्यासन् स्थाणव एवात्र तत्र दृश्यन्ते।

यत्रादृश्यन्त शुकास्तत्र निमीलन्ति गृध्राश्च।।

**(38)**

स्वस्मिन् कणोऽपि रजसः शतं रहस्यानि संबिभर्ति यदा।

तस्य ब्रह्माण्डस्य स्यादिह को वा रहस्यज्ञः।।

**(39)**

अवसरमस्मै देहि स्वपितुमशान्ताय किञ्चिदेकान्ते।

आसीद् दिवसं यावद् रुदन् वराको जगन्नाथः।।

**(40)**

यक्ष! वियोगदिनानि क्वचिदन्यत्रैव यापय स्वानि।

स्निग्धच्छायातरवो न रामगिर्याश्रमाः सन्ति।।

**(41)**

क्रय-विक्रययोर्यस्यां व्यवहाराः साम्प्रतं प्रवर्त्यन्ते।

प्रतिमार्गं प्रतिरथ्यं सा विपणिः साम्प्रतं प्रसृता।।

**(42)**

हन्त कदर्थयितासि स्पृहाशतेनेह मां कियन्मात्रम्।

धावन्नितस्ततोऽहं श्रान्तः काङ्क्षे सुखं शयितुम्।।

**(43)**

सुबहोः कालाद् भारं वहन्नितः श्रान्त एष वर्तेऽहम्।

मां कुरु निर्भारमरे निक्षिप सानुग्रहां दृष्टिम्।।

**(44)**

विषये स्वर्गस्याहं श्रुतवानाजन्मनो मुखात् सुधियाम्।

स्वर्गस्य कोऽपि मिलितो नैव प्रत्यक्षदर्शीह।।

**(45)**

मम मालाकारस्य स्रग्रचना जीविकेति बाध्यत्वम्।

इह रोचते न मह्यं सूचीवेधश्च सुमनःसु।।

**(46)**

अबलाः सुरक्षिताः स्युर्न शासने यस्य शासकस्येह।

सिंहासनेऽधिकारः क्षणार्धमपि तस्य न स्थातुम्।।

**(47)**

तटमुपगतस्तटाके दृषत्कणान् निक्षिपन् यदाऽभूवम्।

अपि कोऽपि मेऽपराधस्तदा तटाकेन पृष्टोऽहम्।।

**(48)**

शङ्कास्पदतां प्राप्तं प्रेम्णः पावित्र्यमेषु दिवसेषु।

विपणिषु विक्रेतुमिदं कैश्चिन्नीतं वणिग्भिर्यत्।।

**(49)**

अयमपि कोऽप्युपकारः सुप्तेः प्रतिभाति यज्जनं स्निग्धम्।

क्षणमानयति समीपं दूरस्थं भ्रान्तिरूपाऽपि।।

**(50)**

अतिदूरस्थं काङ्क्षे न त्वामथवेह नातिनिकटस्थम्।
यदुभयथाऽपि द्रष्टुं न शक्नुयामेष भावस्थम्।।

**(51)**

कोऽपि मदन्तिकमायानवश्यमेव क्षणं विचारयति।
स जगन्नाथः सेत्स्यति कस्मै लाभाय मिलितोऽपि।।

**(52)**

या रसनेह क्लिन्ना महात्मनां सततमेव निन्दाभिः।
स्रवदमृतमपि नु तस्याः प्रतीतिमायाति गरलमिव।।

**(53)**

स्वां गोटिकां निधातुं विजयस्थाने समेऽपि चेष्टन्ते।
विश्वमिदं सञ्जातं सम्प्रति चतुरङ्गपटलमिव।।

**(54)**

हिंसैषा कस्याश्चिन्न समस्यायाः क्वचित् समाधानम्।
जनयन्तीं प्रतिहिंसां दृष्टा जगतीह सर्वत्र।।

**(55)**

त्वामुल्लङ्घ्य प्रायः सुदूरमग्रे विनिर्गताः सर्वे।
न जगन्नाथ! चरन् पथि शनैश्चरो वस्तुतस्त्वमसि।।

**(56)**

धर्मक्षेत्रे जगति प्रवेशमाप्तेषु हन्त धूर्तेषु।
प्रायः समजनि धर्मक्षेत्रमिदानीं कुरुक्षेत्रम्।।

**(57)**

कतिपय एव लभन्ते सञ्चाराय प्रशस्तमिह मार्गम्।

पथि सञ्चरन्ति बहवोऽन्धकारबहुले सबाधे च।।

**(58)**

मन्ये तव हृद्देशे भावैरीर्ष्यादिभिर्भृशं ग्रस्ते।

न जगन्नाथ! समुचितस्त्वद्वदनाच्छान्तिपाठ इह।।

**(59)**

सद्भावस्यास्तित्वं स्फुटतां यावद् बिभर्ति ते न हृदि।

आभूषणानि नैतान्यवेहि तावद् विभूषायै।।

**(60)**

आधत्स्व विनयमात्मनि विधेहि नतमात्मनश्च मूर्धानम्।

तत इह कुरु प्रवेशं धर्मक्षेत्रं यदेतदरे।।

**(61)**

गच्छानेनेत्युक्त्वा विरतो भवतीह मार्गनिर्देष्टा।

आरब्धं कर्तव्यं गन्तुस्तदनन्तरं भवति।।

**(62)**

मम तटगतस्य पुरतो न केवलं वहति काऽपि सरिदेका।

समनुभवामि यदन्या प्रवहति काचिन्मदन्तरपि।।

**(63)**

यत्त्वां विनेह नैते मधुमासा यापिता मया जगति।

अपि नाम कश्चन स्याद् दुष्परिणामोऽपराधस्य।।

**(64)**

दर्शं दर्शं सङ्गममम्बुधिपत्न्योर्द्वयोः सितासितयोः।

समजनि कश्चिन्मोहः शनकैः शनकैः प्रयागमनु॥

**(65)**

काव्यं काव्यामृतमिति कस्याप्यभिधीयते तदैव कवेः।

वाग्देवता निषिञ्चति यदा स्मितेनेव तत् स्वेन॥

**(66)**

कामपि पृथिवीमन्यां विज्ञानिन आशु हन्त मृगयध्वम्।

यदियं पृथिवी नूनं निवासयोग्येति नाभाति॥

**(67)**

सिंहासनमारूढो नार्हः सर्वोऽपि भवति तस्येह।

तदनर्हाः सर्वेऽपि प्रायो लक्ष्यन्त एतर्हि॥

**(68)**

यस्यैकमात्रमासीत् सञ्जीवनमत्र भारतद्वेषः।

म्रियमाण इव स पाकः प्रतिभाति स्वेन गरलेन॥

**(69)**

'प्रेमे'त्येव न केवलमन्यः शब्दोऽपि यो दिनेष्वेषु।

प्रतिभाति स्वानर्थांस्त्यजन् स एवेति विमृशामि॥

**(70)**

सन्तोऽस्मद्भणितीनां विदधीरन् स्वागतं न किञ्चिदिह।

पूजागृहस्य न स्याद् वस्त्विति रचयामि नहि तेभ्यः॥

**(71)**

आनन्दकाननेऽस्मिन् पृच्छसि मां किमनुभूत आनन्दः।

योऽनुभवः सः प्रकटीकर्तुमशक्यो मया वाग्भिः।।

**(72)**

अद्यावधि तल्खिखितं मत्पत्रस्योत्तरं न सम्प्राप्तम्।

अविलिख्यैव स्वोत्तरमुत्तरितं तेन मत्पत्रम्।।

**(73)**

असकृत्त्वां विस्मर्तुं यावान् क्रियते मयाऽऽत्मना यत्नः।

स्मृतिपथमुपैषि तावान् हठादिव त्वं विनिर्बाधम्।।

**(74)**

नानुभवन्ति क्षणमपि कथञ्चिदाकर्षणं यतः सन्तः।

प्रथितस्यापि कवेस्तद् भणितं मन्ये पलालमिति।।

**(75)**

दिवसेष्वेषु क्व गतो हृद्देशान्मानवस्य सद्भावः।

ग्रीष्मे सर इव साम्प्रतमौदार्यं शुष्यदाभाति।।

**(76)**

अस्माकं हृद्देशो नासीदेवं कदापि सङ्कुचितः।

आसीन्निलीयमानं तस्मिन् विश्वं विशालमिदम्।।

**(77)**

स्वहृदुद्गारान् स्फुटतां नेतुं प्रयते मितैर्मितैः शब्दैः।

नानुभवामि स्वस्मिन् यद्यपि वाग्ग्मित्वमल्पीयः।।

**(78)**

केवलमिह गङ्गायाः पानीयत्वं न तावदुच्छिन्नम्।

शङ्कास्पदमिव तस्याः स्नानीयत्वं दिनेष्वेषु।।

**(79)**

प्रायोऽनेनैव पथा स जगन्नाथो गतागतं कुरुते।

जानीमहे न, कस्मादस्माकं सद्म नोपैति।।

**(80)**

अनुमीयतेऽनुभावः साम्प्रतमपि वाहनं समभिलक्ष्य।

यद्यप्यश्वगजादीनधिरूढानां गता दिवसाः।।

**(81)**

द्वित्रेष्वेव प्रायो निपतति दृग् भारतस्य रत्नेषु।

रत्नानां तु सहस्रं प्रच्छन्नं भारतस्य भुवि।।

**(82)**

नायातीति न भग्ना कथञ्चिदिह काऽपि मामकीनाऽऽशा।

आमन्त्रणमायास्यति कदाचिदिति तावदाशासे।।

**(83)**

सर्वं क्षणिकं सर्वं मिथ्येति च नैव सर्वथोपेक्ष्यम्।

रचनाकौशलमेतद् रचनाकारस्य कस्यचन।।

**(84)**

अवसानमस्य कीदृग् भविता नाट्यस्य शौर्यभरितस्य।

प्रस्तौति पूर्वरङ्गः सङ्केतं नाम यत्किञ्चित्।।

**(85)**

संयोगं नहि कामं मन्यस्व त्वं परन्तु मन्येऽहम्।

मिलितौ प्रेरणयाऽऽवां यदितः कस्याप्यदृश्यस्य।।

**(86)**

कश्चिददृश्यो देवः श्रद्धायाः पात्रमस्तु केषाञ्चित्।

सम्प्रति जन एवैष प्राप्तो लोकस्य देवत्वम्।।

**(87)**

यद्यपि धन्धित एव प्रवर्तते लोक एष सर्वत्र।

अन्तः कामपि दृष्टिं तथापि सूक्ष्मां बिभर्त्येषः।।

**(88)**

पण्डित इतीह गर्वं न जगन्नाथ! त्वमुद्वह स्वस्मिन्।

त्वमिव भ्रमन्ति शतशो नगरेऽस्मिन् पण्डितम्मन्याः।।

**(89)**

रावण एवेदानीं सन्नद्धो योद्धुमत्र रामेण।

रामः कृतप्रयत्नः स्वस्यैवास्तित्वरक्षायै।।

**(90)**

अनुदिनमुद्घाट्यन्तेऽस्मभ्यं द्वाराणि सर्वसौख्यस्य।

अस्मास्वनुग्रहस्याकारणमेषा कथं वृष्टिः।।

**(91)**

हृदयानि प्रत्येकं द्यूतकरः कश्चन प्रविष्ट इव।

द्यूतेनैव हि सर्वः परस्वमपहर्तुकाम इह।।

**(92)**

यस्य पतङ्गस्येव द्वित्राण्यायुर्दिनानि गीतस्य।
अहमहमिका किमेषा तद्गतमास्वादमुपलब्धुम्।।

**(93)**

महिलासु ग्राम्यासु स्वारस्यं यदिह नृत्य–निरतासु।
नृत्यन्तीषु न मन्ये तदस्ति भरतस्य विधिनेह।।

**(94)**

नाम्नां तस्य सहस्त्रं जपाम ईशस्य नित्यमेव वयम्।
येनेच्छसि सम्बोधय तं नाम्ना जप च तेनैव।।

**(95)**

प्रतितिष्ठति ते श्रद्धा यस्मिन् रूपे च नाम्नि यस्मिन् वा।
ध्याय तदेव सुरूपं ह्वयस्व तेनैव नाम्ना तम्।।

**(96)**

यद्यपि दोषेष्वेकं मन्वत एतद् गतानुगतिकत्वम्।
विदुषां गतानुगतिकास्तथापि भाग्येन जायन्ते।।

**(97)**

न प्रतिभा त्वयि न गतिर्व्याकरणच्छन्दसोर्न कोशे च।
तदपि जगन्नाथ! त्वं प्रगल्भसे काव्यनिर्माणे।।

**(98)**

शङ्कामहे कदाचिद् वयं जगन्नाथ! ते न योग्यत्वम्।
असकृत्त्वयाऽनवसरे प्रयतितमित्यस्यसफलस्त्वम्।।

**(99)**

यल्लुप्तानि सरोभ्यो न तदाश्चर्यं सखे! सरसिजानि।

प्रायो नंक्ष्यन्त्यस्माज्जगतो नूनं सरांस्येव॥

**(100)**

तमसां संघातेन क्षमोऽस्ति योद्धुं प्रदीप एकोऽपि।

दीपाः सहस्रमपि न क्षमाः समूहेन वातानाम्॥

**(101)**

सर्वेषामिह लोके प्रवृत्तिरासीत् पुरा परार्थैव।

स्वार्थान्ध एव जातः सम्प्रति लोकस्तु लोकेऽस्मिन्॥

**(102)**

त्वयि राजहंस! सुचिरादस्माल्लोकाद् गते समुच्छेदम्।

नीरक्षीरविवेको गुणोऽपि भुवि विस्मृतोऽस्माभिः॥

**(103)**

त्वामभिलक्ष्यावोचत् सम्राड् हर्षो महान् भुजङ्ग इति।

बाण! स्तुमो वयं त्वां त्वया स सम्राड् यथोत्तरितः॥

**(104)**

लोल्लटशङ्कुकसहितो रसविषये भट्टनायकः पठितः।

पठितोऽभिनवोऽपि परं रसो ममावातरन्न गलात्॥

**(105)**

आसन्नितः कियत्यः सन्ति कियत्यश्च तावदाकृतयः।

कः कल्पयेद् विधातुः सौन्दर्योद्भावनक्षमताम्॥

**(106)**

प्रेम्णो विषये साम्प्रतमादर्शत्वं गता नटाः प्रायः।

साधितमिह यैः प्रेम क्वचन निलीय स्थितास्त इतः।।

**(107)**

यस्मै फलाय सुतरां त्वमुन्मुखो लक्ष्यसे दिनेष्वेषु।

पूर्वमुपेत्य गृहीतं तत्तु जगन्नाथ! केनचन।।

**(108)**

स्पृहणीयत्वं मन्ये विजयेष्वेव प्रतिष्ठितं नैव।

स्पृहणीयतराः केचित् पराजया अपि भवन्तीह।।

**(109)**

क्षणमपि येभ्यो दूरेऽवस्थानं हन्त सह्यमिह नासीत्।

वसतां तेभ्यो दूरेऽस्माकं विगतानि वर्षाणि।।

**(110)**

आर्द्रकलशुनादीनां विक्रयकर्तार एषु दिवसेषु।

रामायण–प्रवचने प्रगल्भगाना निशम्यन्ते।।

**(111)**

अन्विष्यन्ति स्वगुणज्ञातॄन् रत्नानि वासेरेष्वेषु।

मृग्यन्ते स्म गतास्ते रत्नानि तु वासरा अधुना।।

**(112)**

पूर्वे स्वहृद्यहिंसां व्यवहृतवन्तो निधाय नित्यमिह।

व्याप्याधुनेह तिष्ठति हिंसैकाऽस्माकमस्तित्वम्।।

**(113)**

प्रीतिः सुपुष्पिताऽभूद् येषां हृत्सु क्व ते दिनेष्वेषु।

द्वेषाख्यकण्टकेन व्याप्तहृदां जातमाधिक्यम्।।

**(114)**

क्षणमालोकं लब्धुं यं बहवो द्वारि सम्प्रतीक्षन्ते।

तिष्ठति स जगन्नाथं प्रतीक्षमाणं क्षणं मिलितुम्।।

**(115)**

सौभाग्यादेव जनः सहधर्मा मिलति कश्चिदेकोऽपि।

तस्यान्यथा प्रतीक्षा सिद्ध्यति विफलैव वर्षेषु।।

**(116)**

येषामादर्शत्वं विषये त्यागस्य सिद्धमिह लोके।

सङ्ग्रह एवेदानीं ते तु निमग्नाः प्रतीयन्ते।।

**(117)**

स्वान् संस्कृतान् विहाय क्व जगन्नाथाभिधेहि गन्तासि।

ग्रामेष्वसंस्कृतेषु व्याहर्ता स्वागतं कस्त्वाम्।।

**(118)**

तस्मै स्रजमुपहर्तुं कथमपि नोत्तिष्ठतः करावेतौ।

स्रजमादरादुपहृतां नोपक्रमते य आघ्रातुम्।।

**(119)**

धर्मध्वजेषु सर्वत इह जगति प्रविचरत्सु निर्द्वन्द्वम्।

विचर ध्वजमधुनैको न जगन्नाथ! त्वमुत्तोल्य।।

**(120)**

उड्डयितुं निर्द्वन्द्वं न जगन्नाथ! त्वमुत्सहस्व सखे।

त्वामनु सन्धाय शरं नैके व्याधाः प्रतीक्षन्ते।।

**(121)**

कस्मैचिदुपगताय त्वया न दत्तं पिपासवे सलिलम्।

न बुभुक्षवे च भोजनमपि च जगन्नाथ! मनुजस्त्वम्।।

**(122)**

श्रूयत इतो ध्वनन्ती मदन्तरन्तर्नु काऽपि घण्टेव।

प्रस्थानायैष स्यात् कश्चिदयं नाम सङ्केतः।।

**(123)**

यास्यन्त्यायास्यन्ति च नैराश्यस्यासकृन्ममावसराः।

सकृदप्याशातन्तुर्न स्याद्धृद्देशतश्छिन्नः।।

**(124)**

बहवोऽत्र पुष्पहासाः प्रथमदृशा जगति सम्प्रतीयन्ते।

अन्ते तु चन्द्रहासा इव कर्तितुमारभन्त इह।।

**(125)**

ईप्सितमिह स्वमास्याद् गमय जगन्नाथ! मा बहिः क्वचन।

ईप्सिततमं तु किमपि स्वान्तादपि मा कृथाश्च बहिः।।

**(126)**

ज्योत्स्नाया विषये तं न जगन्नाथं कदाचिदपि पृच्छ।

आतप एव भ्रमता दिनानि नीतानि येनेह।।

**(127)**

त्वमतृप्तः सन् गन्ता यां यां सरितं तथा सरो तत् तत्।
सा सा तत्तच्च लघु त्वां समतृप्तं निवारयिता।।

**(128)**

जातस्त्वमशालीनो वाचालश्चातिमात्रमिह जातः।
न जगन्नाथ! कदाचित् पूर्वमिहासीस्त्वमेतादृक्।।

**(129)**

नाम्नां तस्य सहस्रं जयाम ईशस्य नित्यमेव वयम्।
येनेच्छसि सम्बोधय तं नाम्ना जप च तेनैव।।

**(130)**

प्रतितिष्ठति ते श्रद्धा यस्मिन् रूपे च नाम्नि यस्मिन् वा।
ध्याय तमेव सुरूपं ह्वयस्व तेनैव नाम्ना तम्।।

**(131)**

कस्य न चित्तं हरतः श्यामश्यामे तदक्षिणी एते।
यस्मिन् क्षेत्रे पततो भवति श्यामायमानं तत्।।

**(132)**

तर्काः पक्षेऽस्माकं पक्षेऽस्माकं तथा प्रमाणानि।
धर्मो महनीयो नः महनीयः सम्प्रदायश्च।।

**(133)**

आर्तस्वरो मदीयस्त्वां सम्प्राप्तोऽथवा न सम्प्राप्तः।
जानीयां विधिनाऽहं केन दवीयांस्त्वमेतावान्।।

**(134)**

योऽन्योन्यं प्रणयाख्यो व्यापारः कश्चिदावयोर्मध्ये।
वाणिज्यस्य स तस्मिन् पर्यायो नैव मन्तव्यः।।

**(135)**

आर्तस्वरे मदीये वैवश्यं मामकीनमालक्ष्य।
यदि शृणुयाः प्रविहायानिवार्यमपि कार्यमागच्छेः।।

**(136)**

प्रायस्तेभ्यो येषां संवेदनशालि हृदयमिह मन्ये।
प्रस्तरहृदयास्त्वस्मिन् जगति सुखं शेरते पुंसः।।

**(137)**

ग्रन्था इति मन्यन्तां द्वित्रा रामायणादयः कामम्।
सन्त्यस्माकं सुचिरादन्तःसञ्चारिणः प्राणाः।।

**(138)**

प्रज्वाल्यन्ते दीपा देवायतनेषु नैव रजनीषु।
दिवसेष्वेषु न शङ्खा न ध्वन्यन्ते, कथङ्कारम्।।

**(139)**

ध्यातव्यमेष शनकैर्न सञ्चरेद् वर्त्मनीति सारथिना।
अवरोधोऽप्यनिवार्यः प्रधावतो वायुवेगेन।।

**(140)**

अग्रे गन्तुमकार्षं कदाचिदपि कस्यचिन्न यत्नमहम्।
शतशस्तथापि लोके मामनुगच्छन्त इति दृष्टाः।।

**(141)**

हृन्मन्दिरे मदीये त्वच्चित्रं केवलं समुल्लसति।

प्रज्वाल्याशानाम्नीं प्रदीपिकां तदहमर्चामि।।

**(142)**

यद्यप्युल्लासस्य न किमपि प्रतिभाति मे निमित्तमिह।

चित्तं तथापि सन्ततमुल्लसदिव तावदाभाति।।

**(143)**

एतत् स्मयमानत्वं नैसर्गिकमेव किञ्चिदस्माकम्।

सौषम्यं चास्यास्मिन् न किञ्चिदेव प्रयोज्यत्वम्।।

**(144)**

सामग्र्येणात्मानं प्रकटीकुरुते न सत्यमिह यदपि।

अनुसन्धानं सन्ततमपेक्षते तदपि जगतीह।।

**(145)**

नाकृष्टव्या तन्त्री येन त्रुट्येत किञ्चिदेतावत्।

नापि च शिथिला कार्या निर्गच्छेन्न स्वरो येन।।

**(146)**

द्वित्राण्येव दिनानि स्वस्यास्तित्वस्य पञ्चषाण्यथवा।

एतावत्स्वेव जनः प्रमाद्यति स्वत्वमविचार्य।।

**(147)**

याऽमृतमित्येकत्र म्रियमाणेत्युच्यते च साऽन्यत्र।

सुरभारत्या विषये न मतैक्यं राजनीतिविदाम्।।

**(148)**

शैत्ये वपुषि निपातो जलपृषतां गोलिकाप्रहार इव।

ग्रीष्मे रविकरतापो वह्नेर्मध्ये प्रवेश इव।।

**(149)**

ग्रामीकृतमस्माभिर्यद्यपि भूगोलकं समग्रमिदम्।

स्वीयं हृदयं न परं विशालतां तावदानीतम्।।

**(150)**

सुमनःपत्रफलाढ्या य इतस्तरवोऽथ हन्त दृश्यन्ते।

केषुचिदापत्स्यन्ते स्थाणुत्वं वत्सरेष्वेव।।

**(151)**

नासीत् कदाचिदेतत् पूर्वेषां कल्पनासु किञ्चिदपि।

मानवतैव समग्रा भविता संवेदनाशून्या।।

**(152)**

गमय ज्योतिस्तमसो मामिति सम्प्रार्थितं मयाऽऽजन्म।

सम्प्रार्थितमद्यावधि न तव श्रुतिगोचरं जातम्।।

**(153)**

अनुभावस्य कृतेऽत्र स्वस्य स्वस्येह चिन्तितः सर्वः।

परदुःखदुःखितानामत्यन्ताभाव इव जातः।।

**(154)**

अस्माभिर्द्रष्टव्यं जीवद्भिः सम्प्रति स्वनेत्राभ्याम्।

सिंहस्यासनमासीद् यदिह शृगालैस्तदधिरूढैः।।

**(155)**

शिर आधाय भुजस्योपरि स्वमेतर्हि मित्र! मा तिष्ठ।

त्वत्कृत एषा पृथिवी कियत्पदं, चलितुकामः स्याः।।

**(156)**

नैषु निधेहि श्रवसी धूर्ताख्यानानि सन्ति सुबहूनि।

धूर्तैः पराजिता अपि विजयिन इत्येव मन्यन्ते।।

**(157)**

जगदेतन्मिथ्येति प्रायो दृष्टाः पलायिता नैके।

अनितरसाधारणतां नय स्वमस्मिन् स्थितो जगति।।

**(158)**

ज्वलिते 'हरमस्यो'परि दीपे ज्वलिते च 'सोमनाथस्य'।

दृष्टो यदेक एव प्रकाश इति 'मीर!' शंसामः।।

**(159)**

न पुराणं सर्वमपि प्रशस्यमित्यनुभवोऽपि मामाह।

साम्प्रतिकमपि कवित्वं प्रशस्यमिति तावदाभाति।।

**(160)**

न त्वां कोऽपि श्रोष्यति न त्वामिह कोऽपि संवदिष्यति वै।

क्वचन जगन्नाथ! गतो यापय दिवसानतो विरसान्।।

**(161)**

मेघाच्छन्नं दुर्दिनमित्याहुर्नाम केचिदिह सुधियः।

मेघविरहितं दिनमपि दुर्दिनमित्येव मे भाति।।

**(162)**

नहि कोऽपि धार्मिकोऽहं न च धर्मस्यास्मि कश्चिदुपदेष्टा।

धर्मध्वजमुत्तोल्यादिशन्ति तन्मां कथं गन्तुम्।।

**(163)**

लाभस्य यस्य हेतोर्दण्डादण्डि प्रकुर्वते केचित्।

न जगन्नाथो दृश्यत उत्सहमानस्तदर्थमिह।।

**(164)**

कुर्वत इहार्तनादं न पर्वताः केवलञ्च सरितश्च।

सम्पूर्णैव धरित्री त्राहि त्राहीति कुर्वाणा।।

**(165)**

यामाश्रित्य दिनानि स्वानि नयत्यन्तरन्तरुन्मत्तः।

प्रयतत एष च्छेत्तुं विहगस्तामेव तरुशाखाम्।।

**(166)**

चरमं साध्यं किञ्चिन्न मनुष्यस्योदरस्य पूर्तिरिह।

अनिवार्यं परमेतत् साधनमिति किन्नु वक्तव्यम्।।

**(167)**

स्वसुखाय स्वसमृद्ध्यै जीवितमिति नाम दृष्टिरनुदारा।

परहितसाधनमूलं महानुभावत्वमादर्शः।।

**(168)**

आरोपित इह पूर्वैर्नानाशाखः सुपर्णसुफलाढ्यः।

विनतः स्निग्धच्छायो भारतनामा महान् वृक्षः।।

**(169)**

स्वेषां पराजयानां निवेदिताः सर्व एव वृत्तान्ताः।

एषु श्रुतेषु नहि रे किमपि श्रोतव्यमवशिष्टम्।।

**(170)**

कीटैर्व्याप्तं मातर्गङ्गे तव केवलं न परिधानम्।

दुर्मलिनादप्यस्माद् दुर्गन्धश्चापि समुदेति।।

**(171)**

कीटैर्व्याप्ता मलिना यत्त्वं दुर्गन्धदूषिता चेह।

मातर्गङ्गे! तत्र प्रकृतिखलास्त्वत्सुता हेतुः।।

**(172)**

स्पर्शादप्यात्मानं रक्षति येषां सदैव वाग्देवी।

तेषां गुणानुवादैर्गच्छत्यस्माकमिह कालः।।

**(173)**

नाधीताष्टाध्यायी भाष्यं पातञ्जलञ्च नाधीतम्।

कियती विडम्बनेयं तदपि वयं संस्कृतज्ञाः स्मः।।

**(174)**

सरितो न रक्षिता न स्निग्धच्छायाश्च रक्षितास्तरवः।

साम्प्रतमरक्षितं नः सञ्जातं तावदस्तित्वम्।।

**(175)**

निहितान्यस्माभिरितो विक्रयविषयाणि सर्ववस्तूनि।

विद्यैव न विक्रीयत आत्मा विक्रेतुमिह शक्यः।।

**(176)**

स्वजनेष्वपि येषु मनाङ् न सहृदयत्वं प्रतीतिमायाति।

सम्पर्कमिह विधातर्मा लिख भालेषु नस्तेषाम्।।

**(177)**

पठ मां पठ मामिति मां प्रत्येकं ग्रन्थ आह समुपेत्य।

पठनाद् विरमेति तु मामसकृन्मे चक्षुषी वदतः।।

**(178)**

पूर्तेरुदरस्यैव प्रश्नः प्रत्येकमद्य तरुणस्य।

अध्ययनाद्येतर्हि द्वितीय एव स्थितं स्थाने।।

**(179)**

स्वजनेऽस्तीव प्रायो यस्मिन् यस्मिन् मयेह विश्वसितम्।

तस्मिंस्तस्मिन् विवशश्चिन्तितुमहमन्यथैतर्हि।।

**(180)**

योगं पतञ्जलिर्यं प्रवर्तयामास साधनेतीह।

वाणिज्यमद्य कैश्चित् प्रवर्त्यते तमलमवलम्ब्य।।

**(181)**

कोऽपि मृदङ्गध्वनिरिव सुगभीरः श्रूयते निशीथेऽस्मिन्।

ग्रामटिकावास्तव्यैर्मन्ये निजनृत्यमारब्धम्।।

**(182)**

न हि कण्ठस्थीकरणाद् धर्मग्रन्थस्य धार्मिकत्वं स्यात्।

किन्तु तदुपदेशानां स्वस्मिन्नवतारणादेव।।

**(183)**

यत्रैव राजनीतिः प्रविशति तत्र प्रवर्तते युद्धम्।

धर्मक्षेत्रमिदानीं ततः कुरुक्षेत्रतां प्राप्तम्।।

**(184)**

प्रतिभावानपि कः स्यात् क्षमोऽभिधातुं कविर्नवं वस्तु।

यद्यभिदध्यान्नवमिव किञ्चिच्चेत् तस्य साफल्यम्।।

**(185)**

छन्दोव्याकरणादि–ज्ञानमपेक्ष्यं कवित्वनिर्माणे।

मन्ये प्रतिभावत्त्वं तावत् तस्मादपेक्ष्यतरम्।।

**(186)**

अस्तीश्वर इति हृदयं मनुते नास्तीति बुद्धिरभिधत्ते।

उपशाम्यति न द्वन्द्वं मध्ये हृदयस्य बुद्धेश्च।।

**(187)**

अग्निपरीक्षेह स्याद् भूयः कस्याश्चिदपि न सीतायाः।

वनवासो रामस्य स्याद्भूयो नैव कस्यापि।।

**(188)**

गोष्ठ्यामस्यां मिलितास्तिष्ठन्त्येते समेऽपि वक्तारः।

श्रोतृभिरन्यैरपि तान् भाव्यं धैर्येण तिष्ठद्भिः।।

**(189)**

कोऽपि कवित्वस्यास्मिन् न जगन्नाथेऽनुभूयते स्पर्शः।

केचित् तथापि कविरित्याहुर्यदिमं तदाश्चर्यम्।।

**(190)**

वृद्धं मदतिथयो मां प्रणन्तुमाशीर्गिरं ग्रहीतुञ्च।

सम्प्राप्नुवन्ति न परं वार्तालापं प्रकुर्वन्ति।।

**(191)**

विग्रहवन्तं धर्मं यं रामं मन्वतेऽत्र धर्मज्ञाः।

इतिहासज्ञाः केचिन्नाहुस्तमितिहासतः सिद्धम्।।

**(192)**

यस्य समाजस्य कृतेऽर्पितमामृत्योर्बुधेन सर्वस्वम्।

किमकारि तेन कस्मै बुधाय सुधिया समाजेन।।

**(193)**

एतावन्त उपाधय एतावान् मामकश्च सम्मानः।

दिवसा यान्ति प्रायः कस्यचिदेतत् प्रदर्शयतः।।

**(194)**

यद् भारः स्याद् बुद्धेरुपनय मह्यं न तदिह पाण्डित्यम्।

कामयते मत्प्रतिभा लघ्वी पतगी खमुत्पतितुम्।।

**(195)**

कामपि पाषाणमयीं प्रतिमां बुद्धस्य पश्यतां सहसा।

कारुणिकः कोऽपि महानिति जागर्तीव धीर्हृत्सु।।

**(196)**

यमिह जगन्नाथमहं तृणमासं मन्यमान आजन्म।

क्षणमेकं तमकस्माद् समपश्यं प्रज्वलन्तमपि।।

**(197)**

क्वचिदपि स जगन्नाथः परिभ्रमन् दृष्टिगोचरो जातः।

इत्वर इति यं केचित् प्रमत्त इति केचिदिह चाहुः।।

**(198)**

अन्नं ददति प्रायो बुभुक्षवे केऽपि धर्म इति मत्वा।

सोऽपि मनुष्यो जीवितुमधिकारः किन्न तस्यापि।।

**(199)**

मानवतयैव मानव एष भवितुमर्हतीह महनीयः।

नहि धर्मेण न जात्या नापि च पाण्डित्यभारेण।।

**(200)**

नैकेऽपीह शृगालाः स्थानं सिंहासनेषु गृह्णन्ति।

एतावता न तेषामपैति किञ्चिच्छृगालत्वम्।।

**(201)**

प्राप्तानि कृत्रिमत्वं येषामिह हसितभाषितादीनि।

दूरस्था शोभन्ते ते मन्ये सानुमन्त इव।।

**(202)**

दुःखाकुर्याद् यदि चेदस्तित्वं मादृशोऽपि यान् किञ्चित्।

नियतेरेव विधानं प्रबलं हेतुं ततो मन्ये।।

**(203)**

स्वातन्त्र्येणोत्पतितुं प्रचेष्टते यो नभः प्रविस्तीर्णम्।

तस्य खगस्य कदाचित् पञ्जरबन्धो महत्पापम्।।

**(204)**

किन्नु कवीनां विषये केषाञ्चिद् भाषितव्यमस्माभिः।

य इहासत्यपि दुःखे दृश्यन्तेऽश्रूणि मुञ्चन्तः।।

**(205)**

यशसेऽर्थाय च कवयो य इतो लालायिताः प्रतीयन्ते।

वाग्देवी सोल्लासं नृत्यति तेषां न रसनासु।।

**(206)**

श्रीगुरुचरणरजोभिः स्वमनोमुकुरं सुनिर्मलीकृत्य।

यत्किञ्चिद्वक्तुमसावधुनाऽऽरभते जगन्नाथः।

**(207)**

सञ्जातेषु पिपासुषु सलिलस्रोतःसु नूनमेतर्हि।

लोकस्तृषितः पश्यतु कान्याशावानिवाजस्रम्।।

**(208)**

न बधान सज्जनानां पंक्तिष्वेनं न दुर्जनानाञ्च।

एष जगन्नाथः खलु मध्यगतः कश्चिदप्युभयोः।।

**(209)**

एकाकिनमिह पुरुषं नारि! त्वं जगति पूर्णतां नयसि।

द्वावपि मिलितौ प्रभवत एकत्वं वस्तुतो यातः।।

**(210)**

यानि जलानि समुद्रे दृश्यन्ते ताण्डवं प्रकुर्वन्ति।

लीनानीव च लास्ये सरसि प्रतिभान्ति तान्येव।।

**(211)**

एषोऽध्ययनावसरे नासीदविनीत इव जगन्नाथः।

अस्यासीन्न कदाचित् सामञ्जस्यं परं गुरुभिः।।

**(212)**

रुग्णालय इव यद्यपि लोकः प्रतिभाति मे समग्रोऽयम्।

अस्मिंस्तथापि जीवितुमिच्छामि, न कामये मर्तुम्।।

**(213)**

राष्ट्रस्यास्य न महतो बिभर्ति कोऽपीह मार्गदर्शित्वम्।

उत्पद्यस्व विवेकानन्द! समायाहि गान्धिंश्च।।

**(214)**

अभिशप्तोऽहं स्वप्ने निश्येकस्यां ममैव सद्गुरुभिः।

न जगन्नाथ! स्वस्य श्रोतारं क्वापि लब्धासि।।

**(215)**

यद् विदधति 'नेतारः' प्राप्त्यै सिंहासनस्य जगतीह।

तस्य विधाने बिभ्रति सङ्कोचं दस्यवोऽप्यधुना।।

**(216)**

चारित्र्याद्याः शब्दा लब्धा एतर्हि यातयामत्वम्।

धूर्तत्वमेव सम्प्रति शिष्टाचारेषु मन्यन्ते।।

**(217)**

स्वं सङ्गोप्य स्वस्मिन् स्वान् दिवसान् यापयेह कूर्म इव।

स्वस्य जगन्नाथ! सखे! प्रकाशनायैष नावसरः।।

**(218)**

अप्युपयोगित्वं ते युगे कुतश्चित् प्रवर्तमानेऽस्मिन्।
पृच्छ जगन्नाथ! स्वं पृच्छ जगन्नाथ! सुजनांश्च।।

**(219)**

वदसि गुहायां निहितं तत्त्वं धर्मस्य तत्त्वमेव पुनः।
प्रकटीकरोषि जगति त्वमिह स्वं धर्मतत्त्वज्ञम्।।

**(220)**

शब्दान् गुरुगम्भीरान् धर्माचार्यास्यतो विनिर्गलितान्।
शृण्वन्तोऽनुभवामश्चेतसि कञ्चिच्चमत्कारम्।।

**(221)**

क्षुद्रः क्षुपोऽहमेकः कस्यचिदग्रे वटस्य विततस्य।
तदपि न किं गणनीयं ममापि यत्किञ्चिदस्तित्वम्।।

**(222)**

तत्त्वज्ञत्वं बहवः स्वस्मिन्नाधाय पण्डितायन्ते।
रथ्यास्वपण्डिता अपि परिभ्रमन्तीह तत्त्वज्ञाः।।

**(223)**

नृपतेरनुग्रहादिह 'भारतरत्नं' जनो भवेत् कामम्।
अन्विष्यत मिलितारो भारत-रत्नानि नैकानि।।

**(224)**

श्रान्तं स्वमनुभवेद् यदि यत् काव्यं कोऽपि पाठकोऽत्र पठन्।
तस्य रचयितुर्मन्ये सति सामर्थ्येऽपि वैफल्यम्।।

**(225)**

पूर्वं यो नगरस्य प्रायो रथ्यासु पर्यटन् दृष्टः।

द्वारं पिधाय सम्प्रति स जगन्नाथो गृहे स्वपिति।।

**(226)**

हृद्यमृतं बिभ्राणो यः स्मयते यो विषञ्च बिभ्राणः।

भेदेन केनचिद्वा भाव्यं मन्ये तयोः स्मितयोः।।

**(227)**

प्रवहति धर्मसरिदियं श्रद्धाविश्वासनीरमध्यगता।

सौभाग्यवन्त एनामवगाहन्तेऽनिशं सुधियः।।

**(228)**

बहवो विषादमलिनां दृष्टिं विनिपातयन्ति जगतीह।

तस्या न भाजनं स्यास्त्वमिति जगन्नाथ! नाथोऽहम्।।

**(229)**

कौटिल्यमेव सम्प्रति तव स्वभावो मनुष्य! किं जातः।

आर्जवमेषु दिनेषु त्वया किमिव विस्मृतिं नीतम्।।

**(230)**

प्रकृतिर्जलस्य शैत्यं सचेतने शोभते न सा मनुजे।

आस्कन्देत न कश्चित् त्वां प्रज्वलता वदग्निरिव।।

**(231)**

यद्यस्मासु कदाचित् सिध्येत् सौभ्रात्रमेव चेदेकम्।

कल्याणमस्य महतो राष्ट्रस्य स्यात् तदाऽस्माकम्।।

**(232)**

सरितां सरोवराणां स्वच्छानि न हन्त सन्ति सलिलानि।

नास्माकमपि मनांसि स्वच्छान्यद्य प्रतीयन्ते।।

**(233)**

उपदेशकत्वमात्मानि सत्यं न बिभर्मि किञ्चिदप्यत्र।

उपदेशान् भारमिव प्रायो मन्यन्त एतर्हि।।

**(234)**

इह मोहनः स गान्धी देवः कश्चित् कृते युगस्यास्य।

सत्यमहिंसा चेति द्वयं महांस्तस्य सन्देशः।।

**(235)**

रामायणमेकान्ते पठन्ननुभवामि तृप्तिमत्यन्तम्।

उच्चैरखण्ड-पाठो न रोचते तस्य मह्यमिह।।

**(236)**

आम्रोद्याने स्पृष्टे वसन्तकालेन भृङ्गसम्भरिते।

स्वयमायाति कुतश्चिन्मुखरः पुंस्कोकिलो प्रीतः।।

**(237)**

औत्सुक्यं त्वां वक्तुं नहि मे न च किमपि तावकं श्रोतुम्।

त्यज मामेकाकिनमिह निश्चिन्तः स्वपितुमिच्छामि।।

**(238)**

चलितं मया सुदूराद् यद् गन्तव्यं निजं विनिर्णीय।

तदकस्मान्मम दृष्टेः सम्प्रति जातं विलीनमिव।।

**(239)**

द्वारि स्थितोऽस्मि यमिह प्रतीक्षमाणो नयामि दिवसानि।

तस्य स्वरूपमेव स्मृतेरकस्माद् विलीनमिव।।

**(240)**

मृत्योः पश्चाद् या गतिरस्यास्तित्वस्य नाम भवतीति।

स्फुटतां नेतुं न गतो निवर्तते हन्त कोऽपि पुनः।।

**(241)**

पश्यन्नस्मि चिरात् त्वामिति यो मां पूर्वमुक्तवानसकृत्।

न परिचिनोमि त्वामिति मामाहाद्येह सोऽकस्मात्।।

**(242)**

आविर्भावात् पूर्वं ब्रह्माण्डस्यास्य यो महानादः।

आविर्भूतः सोऽस्मिन् प्रत्येकं पिण्ड एवास्ति।।

**(243)**

मत्स्मृतिकरण्डिकायां नानावर्णानि सन्ति कुसुमानि।

कस्मै निवेदयानि प्रायो म्लानानि तानीति।।

**(244)**

तुलसीदासे रमतां जायसिनीतश्च कोऽपि वा रमताम्।

एकस्मिन् माधुर्यं मन्ये लावण्यमन्यस्मिन्।।

**(245)**

परिवर्तितं न गुरुभिर्निजोपदेशैस्त्वदीयमिह जाड्यम्।

स्वेन जगन्नाथ! त्वयि सामर्थ्यं किन्तु निर्णेतुम्।।

**(246)**

तव रे कियन्त्यनाम्नः स्मरणीयानीह सन्ति नामानि।

मूकाननुगृह्णासि त्वत्तो न परो दयालुरिह।।

**(247)**

न कवित्वस्य स्पर्शो येषां प्रतिभाति वाचि किञ्चिदपि।

तेऽपि कविषु साम्प्रतमिह परिगण्यन्ते कविम्मन्याः।।

**(248)**

हृदि नो वर्षशतेभ्यः प्रतिष्ठितो यो विनैव सन्देहम्।

रामस्य तस्य विषये केचिज्जनयन्ति सन्देहम्।।

**(249)**

बहु भाषमाण इव मे कश्चित् प्रतिभात्यभाषमाणोऽपि।

तदनुक्ता अपि शब्दाः प्रभावयन्तीह हृदयानि।।

**(250)**

कियता स्पर्शेण कियान् स्वरः समुत्पद्यते समधुर इति।

स्पर्शस्य यन्महत्त्वं तत् कञ्चिद् वैणिकं पृच्छ।।

**(251)**

केचित् स्वं गन्तव्यं सरलतया प्राप्नुवन्तु तमसीति।

केचिन्मया स्फुलिङ्गाः स्वे पथि चलता विनिक्षिप्ताः।।

**(252)**

गच्छत्वेष यथेच्छं निवारयैनं नरे जगन्नाथम्।

आबाल्यादस्य हठः स्वभावतोऽस्माभिराकलितः।।

**(253)**

हृदि धारयेयमाशां कामप्यहमेष रे कथङ्कारम्।

पिहितानि द्वाराणि तुं भवितव्यानां तु सर्वाणि।।

**(254)**

आरम्भश्चान्तश्च द्वावप्यस्येह तुल्यतां भजतः।

भूमेरुत्पन्नोऽन्ते भूमौ प्रविलीयते लोकः।।

**(255)**

क्व गतः स समुल्लासस्तानि क्व गतानि चाट्टहसितानि।

दष्टं सर्वमजायत केनचिदिव काल–सर्पेण।।

**(256)**

समधीतसर्वशास्त्रा विद्वांसो विदितवेदितव्याश्च।

प्रतिरथ्यं य इहासन् सम्प्रति तैः काशि! शून्याऽसि।।

**(257)**

कियतीभिरपि न शक्यः प्रशस्तिभिर्गर्दभोऽश्व इति वक्तुम्।

गर्दभ इति साधयितुं शक्योऽश्वो नापि निन्दाभिः।।

**(258)**

कस्यचिदपि नाभावाद् भवति जगच्चक्रमेतदवरुद्धम्।

राम इहागत्य गतो गताश्च नैके महावीराः।।

**(259)**

प्रस्तूय स्वं कूजितमुद्यानात् साधयन्ति पत्ररथाः।

द्वित्राणि पञ्चषाणि च दिनानि निवसन्ति सर्वेऽपि।।

**(260)**

पक्षिषु हंसाः केऽपि श्रुतिं गताः केऽपि राजहंसाश्च।
न परमहंसो दृष्टो कश्चिज्जगतीह मनुजेषु।।

**(261)**

सुजनेषु न सौजन्यं न सुहृत्सु च सम्प्रतीह सौहार्दम्।
स्थितिमेनामेव किमु प्राज्ञा युगधर्म इत्याहुः।।

**(262)**

शरणागतस्य रक्षणमित्यस्माकं परम्परेत्याहुः।
परमेतत् प्रतिकूलं दृग्गोचरतामुपैत्यधुना।।

**(263)**

सर्वः स्वे स्वे नीडे स्थित उद्यानस्य नीरवो विहगः।
व्याधः कश्चित् प्रविशन्नुद्यानं दृष्ट इति वार्ता।।

**(264)**

स्वस्याननस्य कृत्रिममुपरि निधायाननं जनः प्रायः।
व्यवहरतीह, न कोऽपि भ्राम्यतु धीमान् जगद्रङ्गे।।

**(265)**

एकत एते ग्रन्था मन्ये जनयन्ति बुद्धिसामर्थ्यम्।
विकसन्त्यामपि बुद्धौ जाड्यं जनयन्ति चान्यत्र।।

**(266)**

न मिलत्यत्र प्रायः कविर्बुधो वा प्रशस्तिनिरपेक्षः।
ईशोऽप्यपेक्षमाणः स्वायतनेषु प्रशस्तिमिह।।

**(267)**

ऋषयः सन्दिश्येतो गता गता रामकृष्णबुद्धाश्च।

तेषामेष मनुष्यो नाद्यापि स्मरति सन्देशान्।।

**(268)**

आवर्त्त्यन्ते प्रेम्णः कथाप्रसङ्गा इतोऽन्वहं यदपि।

प्रेम्णः परिभाषामपि न मनुष्योऽधीतवांस्तदपि।।

**(269)**

हस्ते धनुरादाय भ्रान्तं सर्वत्र हन्त जगति मया।

शर–सन्धानं तु मम प्राप्तं सर्वत्र नैष्फल्यम्।।

**(270)**

जगदाख्याया विपणेर्नाद्यावधि कोऽपि निर्गतोऽच्छलितः।

व्यवहर्तारो यद्यपि 'महाजनाः' सन्ति सर्वेऽपि।।

**(271)**

शिशुहसितेन कदाचित् खगकूजितकेन मां कदाचिच्च।

जाने त्वत्सन्देशः पथेह नैकेन समुपैति।।

**(272)**

केचित् काश्यां केचित् काबाक्षेत्रे गवेषयन्ति त्वाम्।

अभिधेहि क्व मिलिष्यसि दृग्गोचरतां गतस्त्वमिह।।

**(273)**

भरितोदराः कुशलिनः कथमेतत् किमपि वेत्तुमर्हन्ति।

कुरुते विधिना केन स्वोदरपूर्तिं जनो जगति।।

**(274)**

दूरे स्थिता क्व गायसि वादयसि च भारति! क्व वीणां त्वम्।

तृप्तिं नय कर्णावप्यस्माकं रे समीपस्था।।

**(275)**

त्वदनुग्रहः प्रवर्षति जानामो रे विनैव हेतुमिति।

म्लाना हृदयसुमनसः स्थास्यन्ति तु नः कियत्कालम्।।

**(276)**

उपजनयन्ति प्रायस्तव स्मृतिं जगति नैकवस्तूनि।

पूर्णश्चन्द्रः श्यामा घनाः प्रसूनानि विकसन्ति।।

**(277)**

प्रज्वालितोऽसि किमपि स्नेहं दत्वा प्रदीप! केनापि।

विनिधाय पत्र–पुटके प्रवाहितश्चासि गङ्गायाम्।।

**(278)**

नीराजनाभिरेनां गङ्गां सम्भावयन्तु कियतीभिः।

विधिनाऽनेन कदाचिन्नैषा शक्या प्रसादयितुम्।।

**(279)**

राज्ञो भवने कश्चिच्छिखरे देवालयस्य कश्चिदिह।

निःस्वालये तु कश्चिज्ज्वलति प्रदीपो न वा ज्वलति।।

**(280)**

कृषका एतेऽस्मभ्यं वर्तन्ते वस्तुतोऽन्नदातारः।

विदधति त आत्महत्यामिति यत् तच्चिन्त्यमस्माभिः।।

**(281)**

बृहदुष्णीषा: सुबृहत्-श्मश्रव एते समे मठाधीशा:।
'अजगर'वृत्त्याजीवा: श्राम्यन्तो नैव दृश्यन्ते।।

**(282)**

मन्वानो यानभवं स्वजना इत्यात्मना बहो: कालात्।
परिचिन्वन्ति न मां ते वर्त्मनि मिलिता दिनेष्वेषु।।

**(283)**

य: पश्यतोहराणां गृहीतजन्माऽस्ति वंश एतस्मिन्।
स्वं पश्यतोहरत्वं स निवारयितुं कथं प्रभवेत्।।

**(284)**

न क्रूरतैव केवलमस्यास्माकं श्रुतिं गता जगति।
करुणार्द्रचित्तताऽपि प्रथिताऽत्यर्थं मनुष्यस्य।।

**(285)**

उत्पादयति विधाताऽङ्गुलिमालं कञ्चिदेकत: क्रूरम्।
करुणार्द्रचित्तमन्यत उत्पादयतीह बुद्धमपि।।

**(286)**

अमृतस्य कामनायामितस्ततोऽनेन धावनेनालम्।
आदे: कालान्मानव एष ह्यमृतस्य पुत्र इति।।

**(287)**

मम चेतसि द्रढीयांस्त्वद्विषयो यावदस्ति विश्वास:।
भ्रान्तोऽपि न भवितास्मि त्वन्मार्गाद् विच्युतस्तावत्।।

**(288)**

अस्तित्वमन्धतमसादभिन्नमपि जगति कस्यचिद् भवति।

ज्योत्स्नाविषयस्तं प्रति तव रे प्रश्नः कियानुचितः।।

**(289)**

कवयो नैके मिलिता निर्मातारोऽत्र नैककाव्यानाम्।

क्वचिदेकोऽपि न मिलितः सहृदय इह वस्तुतो यः स्यात्।।

**(290)**

रविकर इव मालिन्यं शनैः शनैः सायमाप ह्रासोऽस्य।

तिष्ठ व्यावृत्य मुखं साम्प्रतमस्यान्धकार इव।।

**(291)**

द्रव्याण्युपार्जयेयं येन परान् पश्यतोऽपि सम्मोह्य।

तमुपायमेव पृच्छति गुरुमुपसृत्याधुना शिष्यः।।

**(292)**

सर्वसमस्यानामपि ये हिंसां मन्वते समाधानम्।

कामं ते चतुराः स्युर्न दूरदर्शित्वमिह तेषु।।

**(293)**

गर्दभ इव यो घोषं सन्ततमासीदितः प्रकुर्वाणः।

उच्चैः स्वरेण नर्दन् स्वं प्रथयति सोऽश्वघोष इति।।

**(294)**

हासाः परिहासाश्च स्वास्थ्यायैव जगति सिध्यन्ति।

'सर्वत्र वर्जयेदति' तेषां विषयेऽपि मन्तव्यम्।।

**(295)**

आसीत् पूर्वमहिंसा परमो धर्मः कदाचिदिह जगति।
अङ्गीकृतैव सम्प्रति हिंसैवैका मनुष्येण।।

**(296)**

कस्यचिदस्वास्थ्यस्य प्रायो नैकानि कारणानीह।
भगवदनुग्रहमेकं स्वास्थ्यस्य तु कारणं मन्ये।।

**(297)**

मध्येमार्गं त्यक्त्वा योऽस्माल्लोकाद् गतः परं लोकम्।
भविताऽपि तेन साकं मिलनं कच्चित् परे लोके।।

**(298)**

नाटकमिव जगदेतत् प्रदर्श्यमानं प्रतीयते किमपि।
सञ्चालयत्यदृश्यः स्थितः क्वचित् सूत्रधारो यत्।।

**(299)**

देशस्य न सीमायामिह बद्धं कोकिलस्य कूजितकम्।
तस्य न कश्चिद् धर्मो न हि कश्चन सम्प्रदायश्च।।

**(300)**

सैव न शिबिका केवलमारोहन्तीह यां नरश्रेष्ठाः।
गच्छन्ति साऽपि शिबिका यामारुह्य श्मशानमनु।।

**(301)**

नृत्यावसरे भारति! पदनिक्षेपस्त्वया कृतो यस्याम्।
उत्पद्यत इव तस्यां रसनायां साधु साहित्यम्/सङ्गीतम्।।

**(302)**

सामञ्जस्यं सेत्स्यति न कदाचित् तेजसोऽन्धतमसेन।

सङ्गच्छध्वमितीमं द्वे अपि कामं शतं जपताम्।।

**(303)**

कामं रामस्य स्यात् ख्यातो जगतीह कश्चिदितिहासः।

रामत्वस्य तु मन्ये न कश्चिदादिर्न कोऽप्यन्तः।।

**(304)**

वाल्मीकिर्व्यासश्च त्वद्वीणाया यदि स्वरौ कौचित्।

वाग्देवि! तावकीनं स कालिदासः स्मितं किमपि।।

**(305)**

यत्रैव स्वोद्याने लाभः परिकल्पितः प्रसूनानाम्।

तत्रैव कण्टकानामनिवार्यतयोद्गमो भविता।।

**(306)**

वज्रादपि सुकठोराः कुसुमादपि ये च सुमृदवोऽभूवन्।

द्रष्टुं नय सौभाग्यं धातस्तेषां कमप्येकम्।।

**(307)**

पङ्कात् कथमेतावन्नयसि जगन्नाथ! दूरमात्मानम्।

पङ्कजमुपलम्भयितुं पङ्केनावश्यमिह भाव्यम्।।

**(308)**

एवमपि क्षणमिह यैराभाषितुमीहते न मच्चेतः।

तैः सह वर्षाणि मया विधिना केनेह नेयानि।।

**(309)**

'गुरुरहमित्यपि' भारं मन्ये शिरसस्तथापि जगतीह।

संधारयंल्लघुत्वं क्षणमपि न स्थातुमाकाङ्क्षे।।

**(310)**

जनसामान्यस्य हितैर्यत् सम्बद्धं न धर्मशास्त्रमपि।

तन्मन्ये बुद्धिमतां वाग्विलसितमेव नान्यदिति।।

**(311)**

उदरम्भरयः केवलमथवा जगतोऽस्य वस्तुतः सन्तः।

न मठाधीशानामिह विषये प्रभवामि निर्णेतुम्।।

**(312)**

कामं वैयाकरणाः शब्दानां साधयन्तु साधुत्वम्।

तेषां प्रयोगचतुराः कवयो जानन्ति विन्यासम्।।

**(313)**

विरम जगन्नाथ! कथं प्रवर्तसे त्वमिह काव्यनिर्माणे।

न श्रोष्यति कोऽपि त्वां न चापि तव पाठको मिलिता।।

**(314)**

नैकेऽस्मिन् पन्थानो जगति परं तत्त्वमेकमुपलब्धुम्।

अवलम्बन्ते पथिकाः सर्वे स्वस्वानुसारेण।।

**(315)**

जगदितिहासो हासैः प्रतिभात्येषोऽश्रुभिश्च सम्भरितः।

छायातपयोरेतत् प्रवर्तते क्रीडितं सततम्।।

**(316)**

न प्रतिवादः कैश्चिन्नापि विवादश्च कैश्चिदस्माकम्।

सत्यप्येवं कामं स्वं रिपुमिह केऽपि मन्यन्ताम्।।

**(317)**

त्वदभावान्नालक्ष्यत गोष्ठ्या नैयून्यमन्ततस्तस्याः।

तदपि जगन्नाथ! त्वामन्विष्यन्ति स्म नेत्राणि।।

**(318)**

अनुगन्तुं न समर्था वयमेते दूरदेशपथिकं त्वाम्।

स्मर्तास्मश्चिरमन्तस्तप्ताः पन्थास्तवास्तु शिवः।।

**(319)**

सुमनःसूद्यानस्य प्रायः सर्वास्वपि प्रसुप्तासु।

अपि तावकः प्रवेशो भ्रमर! समुचितो निशीथेऽस्मिन्।।

**(320)**

जाग्रति नैके प्रश्नाः प्रत्यहमस्तित्वमेतदधिकृत्य।

परमेकस्याप्युचितं लभे न किञ्चित् समाधानम्।।

**(321)**

प्रविधीयतामुपायो निवारणायाशु कश्चिदेतस्य।

बहिरेव न शून्यत्वं प्रत्युत तत्किञ्चिदन्तरपि।।

**(322)**

न द्वाराणि पिधेहि स्वानि च वातायनानि मा घटय।

चतसृभ्यश्च प्रविशतु दिग्भ्यः सुरभिर्मृदुः पवनः।।

**(323)**

एक: कदाचिदासीद् वस्तुत इह कोऽपि शङ्कराचार्य:।

तत्स्थानस्था नैके साम्प्रतमलभन्त तद्धर्मम्।।

**(324)**

न मन: कस्यचिदेतद् रञ्जयितुं नापि च प्रसादयितुम्।

आह जगन्नाथो यद् यत्किञ्चिदितो विचारयितुम्।।

**(325)**

सुमनस एता यानि च लोकेऽस्मिन् सम्मिलन्ति सु-मनांसि।

पर्याप्तं तैरेव नु कल्याणायास्य लोकस्य।।

**(326)**

स्वरलहरीभिर्यद्यपि हृत्तन्त्री ते विभाति भरितेव।

न जगन्नाथ! तथापि श्रुतिमेत्यस्या नवो राग:।।

**(327)**

साहित्येमेव केवलमनपेक्षिततां गतं न कालेऽस्मिन्।

सङ्गीतमपि न शास्त्रानुकारि शुश्रूषते लोक:।।

**(328)**

सन्देशहरात् प्राप्त: सन्देश: कैश्चिदीश्वरस्येह।

केषाञ्चिदेत्य पुरत: स गोपवेषोऽकरोन्नृत्यम्।।

**(329)**

केषाञ्चिदेव दृष्टि: प्रकाशमधिगत्य नित्यमुदमीलत्।

यापितमितस्तु बहुभि: प्रवितत एवान्धतमसेऽस्मिन्।।

**(330)**

उत्पादयति प्रतिपदमिह बाधां जगति यो न धर्मः सः।
प्रतिबध्नाति स वस्तुत इह प्रधावन्तमविचार्य।।

**(331)**

येऽन्धाश्च पङ्गवो ये तेभ्यो दातुं करावलम्बमिह।
सत्वरमुपैति यस्तं दयालुमहमीश्वरं मन्ये।।

**(332)**

अर्हति कर्तुमभिनयं रामस्येह प्रशिक्षितः कोऽपि।
न तु रामवदाचरितुं शक्नोतीह प्रबुद्धोऽपि।।

**(333)**

न हि शङ्क्यमत्र भारतमस्माकं स्वाभिमानकेन्द्रमिति।
अस्माभिरर्जिता खलु भाग्यैरिह मातृभूमिरियम्।।

**(334)**

प्रेम तपोभिस्त्यागैः स्वस्य सुखस्येह लभ्यते यदिह।
स्वार्थपरैस्तत् कैश्चित् नीतं वाणिज्यविषयत्वम्।।

**(335)**

स्वार्थपरायणतामिह केषाञ्चिद् वीक्ष्य राजनीतिविदाम्।
भारत–माता मन्ये स्वयमेव स्याद् विनम्रशिराः।।

**(336)**

शिरसि च्छत्रच्छाया कस्यचिदासीन्न हन्त जगतीह।
कोऽपि जगन्नाथेऽस्मिन् सकरुण आसीद् घनश्यामः।।

**(337)**

भ्रामं भ्रामं नित्यं यैर्जागृत जागृतेति निनद्भिः।

आचरितं प्रहरित्वं ते सम्प्रति दुर्लभा जगति।।

**(338)**

विधिनोपशाम्यतीयं केन पिपासाऽनुभूयमानैषा।

सलिलस्रोतःस्वधुना सततं प्रक्षीयमाणेषु।।

**(339)**

रामायणादयो यत् सिद्धरसाः सन्त्युपेक्षिता ग्रन्थाः।

विद्धि जगन्नाथ! दशा भविता का त्वद्विरचितानाम्।।

**(340)**

गुरुकुल एतस्मिन्नहमधीतविद्योऽस्मि मामका गुरवः।

आसन् प्रतिष्ठिता इति शिष्यगणाः प्राहुरन्योन्यम्।।

**(341)**

जगति त्वया बहु श्रुतमिह बहु भणितं तथा च बहु दृष्टम्।

अधुना पिधेहि कर्णौ स्थगय वदनमक्षिणी च निजे।।

**(342)**

यै राजनीतिविद्भिः समादरेणेह येऽनुगन्तव्याः।

अनुगच्छन्तस्तान् बत त एव दृश्यन्त एतर्हि।।

**(343)**

सौहार्दमेव विघटितमस्मिन् प्रतिकूल आगते काले।

सम्पूर्णमेव नष्टं विश्वसनीयत्वमेतर्हि।।

**(344)**

स्वीयोऽपि भागधेयं ग्रहीतुमायाति किमपि नैतस्मिन्।

स्वीयं जनेन दुःखं जगति स्वेनैव सोढव्यम्।।

**(345)**

भारतवास्तव्यानामस्माकं दैववैपरीत्येन।

मलयजशैत्यं नासौ भारतमातुर्बिभर्त्यङ्कः।।

**(346)**

नेतृत्वस्येदानीं भाव्यं परिभाषयाऽन्ययैवेह।

दोलायत इव नेतृषु जनसामान्यस्य विश्वासः।।

**(347)**

त्वत्पदरजसेषदपि स्पृष्टं यत् तत्पवित्रमेतीह।

कोऽप्यस्तु चित्रकूटस्तदस्तु वृन्दावनं किमपि।।

**(348)**

विद्याव्यसनं सम्प्रति मन्वत इह नैव केचिदुपयोगि।

उपयोगिषु नैकेषु व्यसनेष्वितरेषु विलसत्सु।।

**(349)**

सर्वत्र दोषबुद्धिर्यथा समुचिता न जातु जगतीह।

नेह तथैव समुचिता मन्ये सर्वत्र गुणबुद्धिः।।

**(350)**

किमियं युगस्य धर्मः प्रवृत्तिरेषाऽस्ति किन्नु जगतोऽस्य।

अथवा कलेः प्रभावो हिंसा व्याप्य स्थिता विश्वम्।।

**(351)**

तेऽन्ये वर्त्माक्षुण्णं य इह स्वोत्साहतोऽवलम्बन्ते।

क्षुण्णे वर्त्मनि सम्प्रति सञ्चारोऽस्मादृशां सुकरः।।

**(352)**

नहि कस्यचिद् दयाया वयमिह पात्रं समे कुशलिनः स्मः।

येष्वस्माकं तादृक् स्थितिरासीत् ते गता दिवसाः।।

**(353)**

कोऽपि चमत्कारः खलु विज्ञानस्यैव जगति जागर्ति।

काचिद् ग्रामटिकेव प्रतिभातीयं धराऽस्माकम्।।

**(354)**

स्वगुरुभ्यः समवाप्तं याचितकं यन्मया विनीतेन।

तेन सुपाथेयेन प्रवर्तते लोकयात्रा मे।।

**(355)**

मनुते कथं न जाने स जगन्नाथो विनीतमात्मानम्।

प्रतिभाति मे न किन्तु प्रकाममविनीत इत्येव।।

**(356)**

निर्णायकस्य पुरतस्तस्योपस्थापितः कदाचित् स्याम्।

मूको नताननः सन् कृतापराधश्च तिष्ठेयम्।।

**(357)**

स्नातं न तीर्थवारिषु किञ्चिन्नारायणश्च नाराधि।

अर्जितमेतत् केवलमाकिञ्चन्यं जगत्यस्मिन्।।

**(358)**

अवलम्बन्ते प्राय: समेऽनुदारा: पथोऽतिसङ्कीर्णान्।
गच्छन्त्युदारचित्ता राजपथेऽतिप्रशस्त इह।।

**(359)**

वन्यजना: स्वच्छन्दं गायन्तो वादयन्ति नृत्यन्ति।
तै: सह नि:सङ्कोचं प्रवृत्तिरुत्पद्यते गातुम्।।

**(360)**

य: कश्चिदन्वभूयत विलक्षणो जीवनेऽलमास्वाद:।
आभात्यनुदिनमधुना क्रमेण स क्षीयमाण इव।।

**(361)**

आशावानथ योऽहं सन्ततमुत्साहवांश्च समभूवम्।
सोऽहं सम्प्रति वर्ते निराश उत्साहरहितश्च।।

**(362)**

प्रत्यक्षं येऽस्माकं क्षणास्त्वदीयस्य सङ्गतस्यासन्।
स्मृतिविषयत्वमवाप्ता: सम्प्रति ते पीडयन्त्यस्मान्।।

**(363)**

इत्वर इवैष दिवसांश्चरन् व्यनैषीन्निजान् जगन्नाथ:।
मुग्धत्वमस्य नृपशोर्विदधात्यस्मानलं खिन्नान्।।

**(364)**

भिक्षोर्वस्तुत एका प्रकृतिरियं किमपि नि:स्पृहत्वमिति।
चरणेषु यस्य राज्ञां शिरांसि मुकुटैर्लुठन्ति समम्।।

**(365)**

अन्तः प्रविश्य पश्यत किमपि नहि प्रेक्षणीयमेतस्मिन्।
सौन्दर्यमिति तदेतद् दृग्भ्रममुत्पाद्य यन्नश्येत्।।

**(366)**

यक्षप्रश्ना एते शक्या नान्येन यत् समाधातुम्।
कश्चिद् युधिष्ठिरो यो गवेषणीयः स एतर्हि।।

**(367)**

आभ्यन्तरस्य मन्ये दौर्बल्यस्यैव कोऽपि परिणामः।
यैषा स्तुतिगानस्य प्रवृत्तिरिह यस्य कस्यापि।।

**(368)**

दुर्वृत्तेभ्यो यस्यामासनमत्यादरादुपह्वियते।
तस्यां नैव सभायां स्थेयं सुधिया मुहूर्तमपि।।

**(369)**

मन्ये, लोकादस्मान्न जगन्नाथं गतं जनः स्मर्ता।
जीवन्नपि न स कुत्रचिदासीद् विषयोऽत्र चर्चायाः।।

**(370)**

स्वीये पर्णकुटीरे यत्सुखशयितं मयोपलब्धमिह।
तन्न परस्य कदाचित् प्रासादेऽभ्रंलिहे लब्धम्।।

**(371)**

कश्चित् सुरभिर्वातः स्पृष्ट्वा मां निर्गतोऽन्तरागत्य।
अप्यधिगतस्त्वदीयस्तेन स्पर्शः परिभ्रमता।।

**(372)**

विषमपि कश्चिद् दद्यात् स्नेहात् तदहं सुखेन गृह्णीयाम्।

उपहृतमनादरान्न स्वीकुर्याममृतमप्येषः।।

**(373)**

ग्रन्थेषु सत्यगन्धः प्रतिपृष्ठं समनुशीलितो मयका।

यत्किञ्चिदेव केषुचिदनुभूतः किन्त्वतृप्तेन।।

**(374)**

प्रतिभाति प्रदहन्ती चितेव यत्किञ्चिदेतदस्तित्वम्।

शममेष्यति प्रदाहः कदेति वक्तुं न शक्नोमि।।

**(375)**

वाणिज्यस्योद्देश्यं लाभाधिक्यं विभाति जगतीह।

वणिगिव सम्प्रति जातः प्रायः प्रत्येकमेव जनः।।

**(376)**

अद्यापि न सौहार्दं न समाजे सामरस्यमद्यापि।

नेतृत्वेनास्माकं जातमकिञ्चित्करेणेव।।

**(377)**

पठितः स कालिदासः पठिता भवभूति–माघ–भारवयः।

हृदयादपैति न परं पण्डितराजो जगन्नाथः।।

**(378)**

न जन–समाजे यस्मिन् गीतं वाद्यञ्च साधु नृत्यञ्च।

अन्तःप्रेमविरहितः स सर्वथा दूरतस्त्याज्यः।।

**(379)**

बाल्याद् यौवनमाप्तं सम्प्रति वार्धक्यमाप्तवानस्मि।

अभिलाषा मम मनस: परिलक्ष्यन्ते युवान इव।।

**(380)**

ईप्सिततमेह लोके स्वोदरपूर्ति: न कस्य जीवस्य।

किन्त्वीप्सितेन भाव्यं मनुजस्याभ्युत्थितेन तत:।।

**(381)**

याता नायान्ति पुनर्विवादविषय: परं पुनर्जन्म।

आमृत्योरनुभवति स्वजनविरहदु:खमेव जन:।।

**(382)**

खद्योता: सूर्या इति मया समभिनन्दिता यत: प्राय:।

इह चारणोऽहमित्युपहसनीयोऽभवं लोके।।

**(383)**

धूर्तेष्वेषु प्राय: प्रतिरथ्यं सञ्चरत्सु नगरेऽस्मिन्।

मुग्ध जगन्नाथ! त्वां वदामि मा प्रविश मा प्रविश।।

**(384)**

सकृदपि परीक्षणीय: समुचितमस्मै प्रदाय कार्यमिह।

न न्याय्यं यत् कुर्यात् स जगन्नाथ: प्रमादमिति।।

**(385)**

श्रुतमस्माभिरवर्षन् देवा नभस: सुमानि पूर्वमिति।

सम्प्रति न सन्ति देवा: किं वा स्वर्गे न कुसुमानि।।

**(386)**

दिवसा मासाश्च गता गतानि वर्षाणि तिष्ठतो जगति।

जीवितकस्यास्य मया सार्थक्यं किमपि नावगतम्।।

**(387)**

श्रद्धां कुर्यां कस्मिन् कुर्यां कस्मिंश्च हन्त विश्वासम्।

श्रद्धेय इह न वा कश्चिद् विश्वसनीयो न वा कश्चित्।।

**(388)**

उत्पद्यन्ते प्रायो नित्यं कामा नवा नवा मनसि।

फलिता भवन्ति सर्वे कथय जगन्नाथ! कस्येह।।

**(389)**

नास्ति द्वेषोऽस्माकं वणिजा केनापि धर्मशीलेन।

तेषु य उदरम्भरयो विषयो द्वेषस्य तेऽस्माकम्।।

**(390)**

शब्दार्थयोर्न यस्मिन् विन्यासे किमपि भाति वैशिष्ट्यम्।

काव्यं किमपि न तत्खलु काव्याभासस्तु तन्मान्यम्।।

**(391)**

नैष मनुष्यो वाजिर्नैष मनुष्यश्च कश्चिदपि हस्ती।

यमिह ग्रहीतुमर्हसि वल्गास्वथवा यमालाने।।

**(392)**

काव्यं किमिति प्रश्नं बुधाः समादधति नैकधा सुचिरात्।

भूषणमेव न दूषणमिहैकमत्यस्य योऽभावः।।

**(393)**

आयोज्यन्ते प्राय: सर्वत्रैवोत्सवा दिनेष्वेषु।

न परं तेषूल्लासोऽनुभूतिपथमेति किञ्चिदपि।।

**(394)**

किमयं कले: प्रभावोऽथवाऽस्य कोऽप्यस्ति हेतुरन्य इह।

अविनय एवास्मासु प्रतिपदमनुभूतिपथमेति।।

**(395)**

इह कृत्रिमेषु नाना प्रसाधनेष्वद्य केऽपि सुलभेषु।

प्रच्छादयन्ति सहजं सौन्दर्यमपि स्वमेतर्हि।।

**(396)**

न स्वच्छताऽपि जनयति कदाचिदिह जगति तादृशीं शोभाम्।

न न्यूनं नाप्यधिकं श्यामिकयाऽपि क्वचिद् भाव्यम्।।

**(397)**

स्मयमाना वाग्देवी जिह्वाग्रं कस्यचित् सदा स्पृशति।

तदनन्तरमिह कविता निरन्तरं तन्मुखात् स्फुटति।।

**(398)**

गेहे शूरो यस्मिन् गेहेनर्दी न च प्रवेशार्ह:।

अवगन्तव्यं यदिदं धर्मक्षेत्रं कुरुक्षेत्रम्।।

**(399)**

अस्य जगन्नाथस्य प्रकृति: शक्या न सम्यगवन्तुम्।

सम्प्रति केनापि समं सिध्यति नास्यैकवाक्यत्वम्।।

**(400)**

धर्मग्रन्थाद् ददति प्रमाणमुद्धृत्य धार्मिकास्तेते।

सिध्यत्येतेनैषां दृढः स्वधर्मे न विश्वासः।।

**(401)**

प्रतिभाति राजनीतिः स्वार्थान्धा जगति वासरेष्वेषु।

न विना तयाऽद्य सिध्यति कस्यचिदपि कार्यजातमिह।।

**(402)**

सिंहासनात्त्वमवतर यदशक्तः शासने विभासि त्वम्।

त्वामन्यथा जनोऽयं बलात् प्रगृह्यावतारयिता।।

**(403)**

केचित्पराजिता अपि पराजयं स्वं किमप्यमन्वानाः।

अप्यक्षमाः प्रहर्तुं त्वरया धावन्ति शत्रुमनु।।

**(404)**

वरमेतदेव देहि प्रभो प्रसन्नोऽसि चेन्मयि त्वमिह।

न किमपि याचितुकामो गच्छेयं कस्यचिद् द्वारम्।।

**(405)**

कविता महाकवेरपि न कस्यचिद् भवति काऽपि गृहदासी।

ग्रामीणमपि कविं साऽनुयाति हृष्टा पुरो यान्तम्।।

**(406)**

ग्रीष्मे सत्यपि दृष्टावेकस्यां विलसतीह मधुमासः।

सत्यपि मधुमासे परमन्यामधितिष्ठति ग्रीष्मः।।

**(407)**

पृथ्वीं गतेह कामं सरस्वती जगति काऽपि लुप्ताऽस्तु।

सारस्वत: प्रवाह: सतां चिरञ्जयति चित्तगत:।।

**(408)**

गङ्गामधिकृत्यैव प्रोच्यत एतत् कथन्नु शंक्यत्वम्।

प्रत्येकमेव वस्तुत इहास्ति शङ्कास्पदं वस्तु।।

**(409)**

सर्वेषु धर्मवित्सु स्फुटं भवेत् तावदेकवाक्यत्वम्।

धर्मक्षेत्रं कथमपि न प्रविशेत् राजनीतिरिति।।

**(410)**

गीता–कुराणयोरिह कोऽपि विवादो न तावदद्यापि।

ईश्वर एक: सुतरां स च रहमानो रहीमश्च।।

**(411)**

कोऽपि न मयि प्रभावो वेदान्तस्याथवा न बौद्धानाम्।

जगतोऽस्य चाकचिक्यं मिथ्यादृष्टेर्न भिन्नमिति।।

**(412)**

कोलाहल एतावान् कथमभिलक्ष्य प्रवर्तमानो माम्।

निन्दा कृता न कस्यचिदिह परिहसितो न कश्चिच्च।।

**(413)**

अधिदेवालयशिखरं सायं शनकैर्ज्वलन्नसौ दीप:।

करुणामयीव दृष्टि: स्निग्धा प्रतिभाति देवस्य।।

**(414)**

कथमधुनाऽहमुपासे प्राप्तं प्राप्तं सुखञ्च दुःखञ्च।

यदनुभवामि स्वमहं पराजितं स्वेन हृदयेन।।

**(415)**

रोदनमेव प्रकृतिर्हसितं विकृतिर्यदस्य लोकस्य।

पारावारोऽश्रूणां समुच्छलन्नेष आभाति।।

**(416)**

पत्रं लिखामि यत् त्वां रुधिरमिदानीं निजं मषीकृत्य।

अपि तेन माामकीनः स्नेहो त्यज्येत यत्किञ्चित्।।

**(417)**

वर्त्मनि यस्मिन्नासन् स्वच्छाः सरितोऽमलाः सरस्यश्च।

तस्मिन्नभिलक्ष्यन्ते तासामस्तित्वचिह्नानि।।

**(418)**

एतान् कथा–प्रसङ्गान् श्रावं श्रावं नितान्तखिन्नोऽहम्।

श्रावय नवमथवाऽन्यन्नवमिव किञ्चित्कथावस्तु।।

**(419)**

कोऽनन्तपारमेनं क्षमोऽत्र विद्यामहोदधिं तर्तुम्।

केचित् कृतप्रतिज्ञाः परं स्वशक्त्या प्रगल्भन्ते।।

**(420)**

मम वार्धक्ये भविता स यष्टिरिति चिन्तितं मया पूर्वम्।

सम्प्रति स एव शनकैः प्रचलति धृत्वा मम स्कन्धम्।।

**(421)**

एतान्महात्मनोऽहं कथञ्चिदनुगन्तुमुत्सहे नेह।

क्रियते परिश्रमोऽन्यैः फलमुपभुञ्जन्त्यमी धूर्ताः।।

**(422)**

नैके सम्बन्धा मम सह त्वया सन्ति सर्वतः सिद्धाः।

स्वीकुरु यं कमपीच्छसि न त्वामतिरिच्य कोऽपि मम।।

**(423)**

उपदिष्टः केनास्मै कविता-मार्गः स्वभावविपरीतः।

विरतं कुर्यादस्मात् कोऽपि जगन्नाथमद्यापि।।

**(424)**

अपि कलिकालः साम्प्रतमन्तं गच्छन् प्रतीयमान इव।

एतावन्तो नासन् भक्ता रामस्य पूर्वमिह।।

**(425)**

या संस्कृतिरस्माकं कदाचिदिह जगति विश्ववाराऽऽसीत्।

साऽकस्माद् बत विश्वात् तिष्ठति विनिवारितेवाद्य।।

**(426)**

यैः कृतमाधानं मयि गुणस्य कस्यापि मे नतिस्तेभ्यः।

यैरपि निवारिता मम केचिद् दोषा नमस्तेभ्यः।।

**(427)**

स्वच्छन्दमत्र सत्स्वपि दशाननेषु स्मयेन विचरत्सु।

राष्ट्रं भारतमेतद् रामस्यैवास्ति, नहि तेषाम्।।

**(428)**

यः स्वप्नः 'पुनरत्र प्रवर्ततां रामराज्यमि'त्यासीत्।

स महात्मंस्तव भग्नो वयमपराद्धा इदानीं स्मः।।

**(429)**

सिंहासनमधिरुह्य न्याय्यं पन्थानमेकमवलम्ब्य।

यः शास्ति वस्तुतः स प्रशस्तिपात्रं जनः स महान्।।

**(430)**

उपदिश्येरन् कियदपि सिंहव्याघ्रादयः कदाचिदपि।

न फलाहारभुजस्ते हिंस्रा जगतीह भवितारः।।

**(431)**

कलिकारूपग्रहणादेताः प्रायः शनैर्विशीर्येरन्।

सुमनोभी रहितस्य स्यादुद्यानस्य का शोभा।।

**(432)**

परिकल्प्याद्य व्योम्नस्तुषारपातं सरोवरस्यास्य।

नलिनीनां सर्वासां प्रकम्पमानानि हृदयानि।।

**(433)**

सर्वेभ्योऽप्यस्मभ्यं कृषका येऽन्नस्य सन्ति दातारः।

ग्रस्ता बुभुक्षयेह श्रूयन्ते ते दिनेष्वेषु।।

**(434)**

वर्षिष्यन्ति पयोदा इति कियतो वासरान् प्रदानेन।

आश्वासनस्य शाल्यः प्राणान् सन्धारयिष्यन्ति।।

**(435)**

हासः प्रायोऽजायत कथा-प्रसङ्गान् निशम्य यान् पूर्वम्।
स्मारं स्मारं रोदिमि तानेवाहं दिनेष्वेषु।।

**(436)**

सार्वत्रिक इव जातो नियमः कोऽप्येष वाासरेष्वेषु।
प्रतिवेशिन उद्विग्नान् नायोज्यत उत्सवोऽकृत्वा।।

**(437)**

कवितामर्मज्ञैरिह नैकैरपि दर्शितेषु मार्गेषु।
कविता किमिति विचारो विराममद्यापि नोपैति।।

**(438)**

कवितैका प्रवहन्ती सरित्प्रसन्नेति चिन्तयाम्येषः।
अनुभवतीव स्नातो यस्यां स्वस्मिन्नवत्वमिह।।

**(439)**

एकस्याङ्गीकुरुते छन्दोबन्धं कवेर्न कवितेह।
छन्दोबद्धैव तु साऽन्यस्याते नुतसमुल्लासम्।।

**(440)**

एकः कोऽपि सुपर्णः संस्कृत्यब्धेर्वगाहनिपुणोऽन्यः।
श्रीमद्रवीन्द्रनाथः स च सुमहान् श्रीमदरविन्दः।।

**(441)**

एके स्वं पाण्डित्यं यतमानाः सन्ततं प्रदर्शयितुम्।
दुःखान्मानवमात्रं यतमाना अन्य उमुद्धर्तुम्।।

**(442)**

स्वस्योदरस्य भरणं प्राथम्येनेह जगति कर्तव्यम्।

एतावतैव सिध्येन्नहि कर्तव्यस्य ते विरतिः।।

**(443)**

त्वमसि दवीयानित्यहमुपगन्तुं नैष हन्त शक्नोमि।

आर्तस्वरो मदीयस्त्वामुपगच्छेत् कदाचिदयम्।।

**(444)**

भाषा नैका भाषितुमिमे प्रवीणा जना युगस्यास्य।

विस्मृतवन्तो मन्ये भाषामेकां परं प्रेम्णः।।

**(445)**

निपुणाः क्वापि निलीना मन्ये तिष्ठन्ति वासरेष्वेषु।

धूर्तत्वमेव जातो नैपुण्यस्येह पर्यायः।।

**(446)**

लोके मूढतमस्त्वं कोऽपि जगन्नाथ! वा प्रमत्तोऽसि।

हससि रुदत्स्वस्मासु त्वं रोदिसि हन्त विहसत्सु।।

**(447)**

चेष्टन्ते युद्धार्थं भाषन्ते शान्ति–शान्तिरित्यसकृत्।

प्रायो विश्वसनीया न भवन्ति हि राजनीतिविदः।।

**(448)**

वीणाझङ्कार इव श्लोकः कोऽपि क्षणं हृदि स्फुरति।

उषसः किरणस्येव स्पर्शः प्रतिभाति हृदि कोऽपि।।

**(449)**

सम्मार्जनीव कविता वागर्थाभ्यां विनिर्मिता कविभिः।

या सौन्दर्यं नयति स्फुटतां विनिवार्य धूलिमिव।।

**(450)**

कविता प्रायो भवति प्रसूनमिव कोमला च सुरभिश्च।

प्रकटीभवति कदाचित् प्रबलाऽग्निशिखेव दुर्वारा।।

**(451)**

विधिहस्तप्रतिनिधये नवमिव कर्तुं सदा प्रवृत्ताय।

ध्वंसेऽपि समर्थाय च नमो मनुष्यस्य हस्ताय।।

**(452)**

ग्रामीभूता सम्प्रति केवलमेषा न हन्त वसुधैव।

सङ्कुचिताऽभूदेषा स्वार्थान्धा दृष्टिरस्माकम्।।

**(453)**

हृदयसरोवरमधुनाऽस्माकमिदं सर्वथैव शुष्कमभूत्।

साहित्यं सङ्गीतं न न तावदनिवार्यमेतर्हि।।

**(454)**

न स्वं प्रदर्शयति न प्रगल्भते चेह काव्यनिर्माणे।

कामं कविरिति मनुतां न कश्चिदेनं जगन्नाथम्।।

**(455)**

तुलसीदासस्य पथाऽथवा कबीरस्य गच्छ येनेष्टम्।

द्वाभ्यामपि त्वमाभ्यां तदेकमेवेह लब्धाऽसि।।

**(456)**

छन्द:स्वरताललया: प्रतिभान्त्येते त एव तव गाने।
किमपि जगन्नाथ! नवं गानमिदानीं श्रुतिं गमय।।

**(457)**

नाभ्युत्सहन्त एते शब्दा अस्मन्मुखाद् विनिर्यातुम्।
त्वत्स्वागतमभिधातुं मन्येऽस्मन्मौनमुपयुक्तम्।।

**(458)**

सर्वेष्वेव समेन स्वरेण मधुरेण साधु गायत्सु।
विषम: कुतोऽप्यकस्मात् स्वरोऽधुना श्रूयमाण इव।।

**(459)**

सामान्योऽपि मया सह जन: प्रकुर्वीत कोऽपि संवादम्।
इति सरलीकृत्य मया यत्किञ्चिद् भणितमेतर्हि।।

**(460)**

प्रकटीकृतमक्षिभ्यां तेन स्वगतं किमप्यवदताऽपि।
किञ्चिदकिञ्चित्करतां गतं तदा तस्य मौनमपि।।

**(461)**

यद्यपि सुमहान् भेदोऽनुभूयते रामकृष्णयो: कथयो:।
भक्तास्तथापि ते वयमभक्तिभेदेन कलयाम:।।

**(462)**

शान्त: शृङ्गार इव स्वान्तं स्पृशतीव मामकं मन्ये।
भर्तृहरे: शतकद्वयमप्यविरोधीव मे भाति।।

**(463)**

भक्तेरभिनय एष प्रदर्शनीयस्त्वया न लोकेऽस्मिन्।
भक्तिस्त्वयि कियतीति प्रायो जानन्ति सर्वेऽपि।।

**(464)**

एते त्वदभिप्रायं न कथञ्चिदपीह वेत्तुमर्हन्ति।
अस्मात् तुषावघाताद् विरम जगन्नाथ! तदिह त्वम्।।

**(465)**

उपहसनीयं यदिदं समर्पितं तुभ्यमात्मनोऽस्तित्वम्।
आसीदस्ति च भविता तवैव तदिदं न मम किञ्चित्।।

**(466)**

धर्मो यैर्नियमित इव नितान्तविरसेषु कर्मकाण्डेषु।
विषये धर्मस्य न ते प्रमाणमिह भवितुमर्हन्ति।।

**(467)**

तेजस्तमसोर्मध्ये द्वन्द्वं छलितानि हसित-रुदिते च।
विश्वस्य रङ्गमञ्चे कश्चिन्नाट्यप्रयोगोऽयम्।।

**(468)**

सखि! कोऽपि रामनामा मणिरेको मूल्यवान् मयाऽवाप्तः।
मणिना केनापि समं तुलनीयो नैष विश्वस्य।।

**(469)**

छन्दः स्वरो लयश्च त्रयोऽपि मे विस्मृतिं गताः सद्यः।
गायामि गातुकामो विधिना केनाहमेतर्हि।।

**(470)**

वागर्थौ स्वच्छन्दं प्रवहत इव साधु गद्यबन्धेषु।
चेतो मामकमनयोश्छन्दोबन्धोऽपि बध्नाति।।

**(471)**

शाश्वतिकोऽस्ति विरोधो ययोर्द्वयोः प्राणिनोरितो मध्ये।
सम्भावितमपि हेतुं न कोऽपि तस्मिन् विचारयति।।

**(472)**

आयास्यति वार्धक्यं मयीति नहि चिन्तितं मया यूना।
नायास्यति मयि यौवनमिति वृद्धश्चिन्तयाम्यसकृत्।।

**(473)**

रामायणादि सम्यक् स्थित्वाऽऽकलनीयमात्मनैकान्ते।
प्रवचनकाराणामिह जगति सखे! नैव नैयून्यम्।।

**(474)**

नैकानि क्रीडनकान्यवलोकयतेह यापितं मयका।
क्रीडनकानतिरिक्तं यदवगतं तावदस्तित्वम्।।

**(475)**

अवतरितान्याकाशाद् भुवि नक्षत्राणि नेह रत्नानि।
रत्नानामेतेषां प्रसूरियं रत्नगर्भैव।।

**(476)**

न ज्ञातुं शक्तोऽहं पात्राणीमानि कीदृशानीति।
रङ्गे रुदन्ति यदितो हसन्ति मिलितानि नेपथ्ये।।

**(477)**

आतप-तापानुभवं विहाय नास्त्येव कोऽपि मेऽनुभवः।
श्रुतवान् कदाचिदासं स्निग्धा छायाऽपि भवतीह।।

**(478)**

जीवनमवदानं वा कश्चिद् भारस्त्वमेव जानासि।
आन्दोलिता भवामो मध्ये जिज्ञासयोरुभयोः।।

**(479)**

उपदेशकत्वमस्ति प्रकाममृजु वर्त्म वासरेष्वेषु।
सिंहासनमध्यास्य प्रवचनमारभ्यतां पूर्वम्।।

**(480)**

त्वमुपेक्षाविषयोऽपि स्वं धैर्यं मा नयेह शैथिल्यम्।
अपि न श्रुत'मानन्दो वर्षशतैरेति जीवन्तम्।।'

**(481)**

चन्दनकर्दमयोर्यदि भेदं निर्णेतुमुच्चलेद्भेकः।
विदितः कस्य नहि स्यात् स निर्णयस्तस्य पूर्वमिह।।

**(482)**

हेतुं कमिह वदेयं विनिपातस्यात्मनोऽहमेतर्हि।
सुख-दुःखयोः स्वयोरिह भवति जनो हि स्वयं हेतुः।।

**(483)**

नैकैस्तव सवयोभिर्जगतोऽस्मात् प्रस्थितं क्रमेण शनैः।
स्वं परिकरं बधान त्वमपि जगन्नाथ! गन्तुमितः।।

**(484)**

यस्य कठोरत्वमपि स्फुरति कृपासन्निधानमाप्तमिव।

श्रीचरणयोर्विलसतु प्रणतिर्नः काऽपि तस्य गुरोः।।

**(485)**

सिंहासनाधिरूढं कुरुते यः कमपि हस्तमवलम्ब्य।

प्रभ्रंशयति च तस्मात् स जनो दत्वाऽर्धचन्द्रमपि।।

**(486)**

कामं बका न हंसं मन्यन्तां गौरवास्पदं जगति।

नीरक्षीरविवेकावसरे मृग्येत हंस इह।।

**(487)**

स्वेन यथासामर्थ्यं गुणा जगन्नाथ! केचिदर्ज्यन्ताम्।

नात्यन्ताभावोऽजनि जगतीह गुणग्रहीतॄणाम्।।

**(488)**

एष जगन्नाथः खलु भार इवास्त्येव कोऽपि लोकस्य।

न गृहे नापि गृहाद् बहिरुपयोगं तस्य पश्यामः।।

**(489)**

कुत आयान्ति प्राणिन इमे न जाने कुतश्च निर्यान्ति।

प्रविभात्यस्य न किञ्चित् गतागतस्यान्तरुद्देश्यम्।।

**(490)**

याथार्थ्यमिह न सत्यं सत्यं याथार्थ्यतः परं किञ्चित्।

याथार्थ्यज्ञा बहवो न परं बहवोऽत्र सत्यज्ञाः।।

**(491)**

न वयं पुराणमेव प्रशस्तमिति पक्षमास्थिताः केचित्।

आकर्षणस्य विषयो नवमप्यस्माकमस्त्येव।।

**(492)**

आतनुते न विवादं केनचिदिह सर्वथेति पश्यामः।

संवादोऽस्ति प्रायो न जगन्नाथस्य केनापि।।

**(493)**

सत्यं वच्मि स्वस्मिन् पाण्डित्यं नानुभूतमेव मया।

अन्धतमसमिव केवलमनुभवपथमेति मेऽज्ञानम्।।

**(494)**

गीताऽप्येकः पन्थाः पन्था एकस्तथा कुराणमपि।

उभयोरप्यनयोरिह तदेकमेवास्ति गन्तव्यम्।।

**(495)**

न जगन्नाथं ज्ञास्यसि परिभ्रमन्तं पदातिमवलोक्य।

कञ्चित् कालं क्रियतां तेन समं तावदालापः।।

**(496)**

न जगन्नाथस्यास्मान् छलयत विषये वयं न मूढाः स्मः।

बहुभिर्भणितैः शक्यं नासत्यं सत्यतां नेतुम्।।

**(497)**

छलितः परैर्न केवलमेषच्छलितः पदे पदे स्वजनैः।

यूयं तावत् पृच्छत न जगन्नाथस्य विषयेऽस्य।।

**(498)**

यं प्रति यत्किञ्चिदहं बिभर्मि चेतो निकाम करुणार्द्रम्।
लोक स वाक्सुमनसामुपहारं मे न गृह्णीयात्।।

**(499)**

बहिरुद्यानं परित: सुरभे: स्पर्श: प्रतीतिमायाति।
ग्रीष्मोऽभिभवति कश्चित् सम्प्रति परमन्तरुद्यानम्।।

**(500)**

इह कस्यचित् पराजय इह विजय: कस्यचिच्च जायेते।
विजय-पराजययोरिदमस्त्यस्तित्वं कथाभूमि:।।

**(501)**

मन्त्रद्रष्टृभिरखिलैर्निर्व्यूढं यत्र मार्गदर्शित्वम्।
सन्दर्शयन्ति मार्गं तत्र नटा: केचिदेतर्हि।।

**(502)**

दृष्टेर्विस्तारं कुरु यदीहसे सत्यमात्मना द्रष्टुम्।
सङ्कीर्णयेह दृष्ट्या द्रष्टुं शक्नोति क: सत्यम्।।

**(503)**

उत्पश्याम्यात्मानं भुवि सपतितं सहस्रखण्डेषु।
मम परिचयो विभक्त: सहस्रधेवैष आभाति।।

**(504)**

सत्यं मदधीनमिति प्रायो यो व्याहरेदित: कोऽपि।
तेन मदधीनेन प्रायो मूढेन वा भाष्यम्।।

**(505)**

शक्य: स यावदासीत् सोढो भारो मयाऽत्र तावदिह।
नार्हत एतौ सोढुं शिथिलावेतर्हि मत्स्कन्धौ।।

**(506)**

य इत: पिधाय खड्गं सौहार्दाय प्रसारयन्ति निजहस्तम्।
स्मितपूर्वभाषिणस्ते ज्ञातुमशक्या दिनेष्वेषु।।

**(507)**

प्राप्तं यद् यत् तत् तन्मृदिति मया चिन्तितं विमूढेन।
सम्प्रति तेन विरहित: सुवर्णमिति तच्च विमृशामि।।

**(508)**

यदलमलङ्कर्तुमिमा: सुमनस एतां सुभूमिमस्माकम्।
नक्षत्रालङ्कारा व्योम सकुशलास्तवैव कृते।।

**(509)**

अहमिह गतानुगतिको महाकवीनां स्वनामधन्यानाम्।
ईषदपि हि किं कविना नूतनमुत्प्रेक्षितुं शक्यम्।।

**(510)**

वागर्थावाश्रित्य प्रवर्तते यदपि काव्यरचनेयम्।
नवविन्यासविशेषे स्फुरति तयोस्तदपि सौन्दर्यम्।।

**(511)**

अन्तर्गृहेऽश्रुवर्षं गृहाद्बहिर्ग्रीष्मघर्मसन्ताप:।
स्थातुं गृहे गृहस्थो शक्तो न गृहाद् बहिर्गन्तुम्।।

**(512)**

कालं कियन्तमस्मिन् शान्तेः पाठः प्रवर्तिता जगति।

गृहमिव वह्निपरीतं प्रतिभात्येतज्जगत् सर्वम्।।

**(513)**

धर्मः किमपि सरोवरमतिप्रसन्नाम्बुपूतपूतञ्च।

स्नातो यतोऽनुभवति स्वं भुवि दिव्यत्वमापन्नम्।।

**(514)**

न शुचीनीह सरांसि न सरोवराणीह च प्रसन्नानि।

पृच्छ न मनसो विषये न शुचि यन्न प्रसन्नञ्च।।

**(515)**

सिंहासनमास्तां ते कुशलि च्छत्रञ्च ते कुशल्यास्ताम्।

तरुमूलमासनं मे सच्छायो मे तरुश्छत्रम्।।

**(516)**

त्वद्भवनस्य यदग्रे दीपावल्यो भजन्ति निष्प्रभताम्।

प्रज्वालितः स कोऽपि स्वात्मन्येको मया दीपः।।

**(517)**

स्वच्छो जलमिव सरितां प्रकाशवांश्चानिशं प्रदीप इव।

धर्मः सनातनो नः, गतिशीलः पारदर्शी च।।

**(518)**

नैष प्रवचनकारो न सम्प्रदायस्य कस्यचिद् विद्वान्।

सुतरां स जगन्नाथो जनसामान्येषु गणनीयः।।

**(519)**

बहवो धिया विरहिता अभिधीयन्ते वृथैव धीमन्तः।

स जगन्नाथः श्रीमान् श्रिया विरहितोऽभिधीयेत।।

**(520)**

आलयमिह भागवतं पिब निवससि यत्प्रयागनगरे त्वम्।

सफलीकुरु नारायणमाराध्येह स्वमस्तित्वम्।।

**(521)**

कीटपतङ्गस्येव व्यत्येत्यस्तित्वमेतदिह यस्य।

मन्ये, सुखमथ शान्तिस्तस्य कृते नेह न परत्र।।

**(522)**

अन्विष्यता त्वया सुखमिह नीता वासराश्च मासाश्च।

अभिधेहि सत्यमपि रे त्वमिह जगन्नाथ! तृप्तोऽसि।।

**(523)**

कोऽस्मीत्यद्यावधि न प्रश्नस्यास्योत्तरं मया लब्धम्।

कुत आगतः क्व गन्तेत्यपि विदितं नैव चिन्तयता।।

**(524)**

यापयिता स्मो दिवसान् विरसानेतान् वनान्तरे तावत्।

आतनुते नहि तावत् कोऽपि रसालः समुल्लासम्।।

**(525)**

देशान्तरं गतेषु प्रायो हंसेषु वासरेष्वेषु।

सङ्कुलितानि वकेर्बत सरोवराणीह सर्वाणि।।

**(526)**

धनदुर्मदान्धमेते स्तुवन्ति कवयो मनुष्यमिह कामम्।

स्तुतिगानस्य हि पात्रं न मनुष्यः श्रीशमतिरिच्य।।

**(527)**

स्वादुषु गीतेषु त्वां त्वामुच्छलितेषु जातु नृत्येषु।

अनुभूतवानितोऽहं शिशोश्च मधुरेषु हसितेषु।।

**(528)**

विधिना केनापि मया शृङ्गमिवोत्तुङ्गमद्रिराजस्य।

आमृत्योरपि लभ्यं तदर्थमिह किन्नु यतितव्यम्।।

**(529)**

सकृदेव दृष्टिपातेऽनुभूतवानस्मि दृष्टपूर्वमिव।

परमेतन्न तु विदितं कदा क्व वाऽऽवाञ्च सम्मिलितौ।।

**(530)**

उदयति सूर्ये केचित् खगशिशवो यत्र तत्र कूजन्ति।

परमावृणोति शनकैर्मद्ग्रामटिकां गवां धूलिः।।

**(531)**

अनुगन्तुं न च नापि च सह गन्तुं कोऽपि मां प्रवर्तेत।

अनुगच्छन्ति विचारा नैके नैके च सह यान्ति।।

**(532)**

स्वं स्वं गन्तव्यमनु प्रचलन्तः सन्ति जगति सर्वेऽपि।

अन्ते सर्वेषामपि सिध्यति गन्तव्यमेकमिह।।

**(533)**

छन्दसि बद्धा कविता हृदन्तरुल्लासमेकमातनुते।
नृत्यन्त्यो गायन्त्यः क्षणं दिशः किञ्चिदाभान्ति।।

**(534)**

स्वेषु व्यापारेषु प्रायः सर्वे दिवानिशं निरताः।
परदुःखकातरत्वं लोकादस्माद् विभाति गतम्।।

**(535)**

परिवर्तितेव सम्प्रति जीवन-शैली जनस्य लोकेऽस्मिन्।
स्वाद-विरहितस्तावज्जीवन-नामा रसो जातः।।

**(536)**

स्वमपि वियोज्य प्राणैरन्येषां यो हरत्यहो प्राणान्।
द्वारमनावृतमुचितं स्यान्नरकस्यैव तस्य कृते।।

**(537)**

जन्तुर्मनुष्यनामा विभाजितो विविधजातिवर्णेषु।
जगदुद्यानस्य कृते शोभाशालित्वमित्येव।।

**(538)**

स्निग्धस्यैकस्य कृतेऽर्धदृष्टिपातस्य तावकीनस्य।
इह सङ्गमेषु सरितां देवायतनेषु च भ्रान्तम्।।

**(539)**

बिभ्रति न भेदबुद्धिं बहवोऽद्यापीह वाजिगर्दभयोः।
शृणुमो दीयत एभ्यः प्रायो निर्णायकत्वमिह।।

**(540)**

काले प्रवर्तमाने विषये स्वास्थ्यस्य कमपि मा पृच्छ।

अस्वास्थ्यमेव जातं स्थितिसामान्यं दिनेष्वेषु।।

**(541)**

क्रियते रागविरहितैः प्रदर्शनं सम्प्रतीह रागस्य।

तेषां प्रदर्शनानि ह्युपहसनीयानि सिध्यन्ति।।

**(542)**

सम्मानस्य बुभुक्षा विविधासु श्रूयते बुभुक्षासु।

अनुभूयते प्रवृद्धा नवेषु विद्वत्सु केषुचन।।

**(543)**

वागर्थयोर्निबद्धा मतिर्जगन्नाथ! तेऽस्ति विन्यासे।

भिन्नाऽपि भवति कविता काचिद् वागर्थ–विन्यासात्।।

**(544)**

नानालङ्कारैस्त्वं स्वमलङ्कुरुषे कथं दिनेष्वेषु।

अपि वेत्सीमे शोभां निसर्गजां नाम बाधन्ते।।

**(545)**

विद्यासरिद् युगेऽस्मिन् यथा यथा लोपमभ्युपैतीव।

मन्ये तथा तथैव प्राज्ञाभासाः प्रवर्धन्ते।।

**(546)**

तीर्थे तीर्थे भ्रान्तं तीर्थे तीर्थे निशासु सुप्तञ्च।

न शमस्तथाप्यवाप्तो जागरणे नापि सुप्तौ च।।

**(547)**

देवायतने मामपि नयाशु तत्रैव मा विलम्बस्व।

श्रीमद्भागवतस्य प्रवहति मधुरो रसो यत्र।।

**(548)**

क्व वसति मत्प्रियतम इति केन ज्ञातव्यमिह कदाचिदपि।

तन्निर्दिशेत् स कश्चित् तुलसीदासः कबीरो वा।।

**(549)**

मन्ये कदाचिदासीन्नहि रूपं पापवृत्तये किमपि।

सिध्यत्यनर्थकारि तु मन्ये तद् वासरेष्वेषु।।

**(550)**

हसितान्युपहसितानि च कामं स्वसुखाय नाम कल्पन्ताम्।

रोदितुमन्यांश्च परं प्रायो विवशान् प्रकुर्वन्ति।।

**(551)**

सुमनस एता मा स्पृश पश्यैताः केवलं दृशा निजया।

क्षणमन्यथा विकीर्णाः सर्वाः स्युस्तावदधिभूमि।।

**(552)**

रामे समर्पणीयं तुलसीशतमित्युदेति मच्चित्ते।

कविनक्षत्रशतानि च तुलसी-शशिनीह देयानि।।

**(553)**

रामो वा कृष्णो वा शिवोऽथवेष्वभेदबुद्धिर्नः।

सत्यपि नामसु भेदे जागर्त्येकत्वमेवैषु।।

**(554)**

पात्रीकृता मनुष्याः स्तुति-गानस्य त्वयेश्वरं त्यक्त्वा।
चक्षुष्मानप्यन्धस्त्वमिह जगन्नाथ! मे भासि।।

**(555)**

अल्पीयांसं मह्यं घट्टं दत्वा पलायितः कश्चित्।
तं सुखयितुमसमर्थं मद्व्यथितं स्यादितो मन्ये।।

**(556)**

दृश्यत एषा रीतिर्मध्ये भुवि जीवनस्य मृत्योश्च।
प्रज्वलति स्म शिखावान् यत्र चयो भस्मनां तत्र।।

**(557)**

ननु कश्चिदस्ति भेदः प्रदीपयोरेतयोर्द्वयोर्ज्वलतोः।
काबायां यो ज्वलति ज्वलति च यो देवतायतने।।

**(558)**

नाम गृहीतं न तवाद्यावधि रूपञ्च वर्णितं न मया।
गणयन्ति तदपि बहवो मामेते तावकीनेषु।।

**(559)**

हृदयं हरन्ति यद्यपि रूपाण्यन्यानि जगति केषाञ्चित्।
परमन्यदेव तव रे श्याम! सुरूपस्य हारित्वम्।।

**(560)**

जागरितस्य प्रतिमा नाधत्ते केवलं चमत्कारम्।
शयितस्याप्यातनुते बुद्धस्य च सा 'कुशीनगरे'।।

**(561)**

भावस्य वेद्मि भाषां भाषां वेद्मीह नैव तर्कस्य।

कविता तर्कान्म्लायति भावादुल्लासमातनुते।।

**(562)**

परिवर्तयन्ति वर्णं न केवलं स्वमिह राजनीतिविद:।

परिवर्तयन्ति चतुरा एते भाषामपि स्वीयाम्।।

**(563)**

ज्योतिष्पथेषु येषां मनोरथा: सर्वथैव धावन्ति।

साम्प्रतमपि जगतीह द्वित्रास्ते स्युर्महात्मान:।।

**(564)**

एतानि यापितानि त्वया दिनानीह किं त्वया लब्धम्।

लब्धं केवलमेतन्न किमपि लब्धं मयेहेति।।

**(565)**

सम्प्रति यान्ती विलयं जिज्ञासा ब्रह्मणोऽस्ति विलये यत्।

उत्पद्येत कथं सा विषये धर्मस्य जगतीह।।

**(566)**

उडुपेनानेनाहं सागरमुत्तर्तुमेनमसमर्थ:।

मम कर्णधार! सहसोपेत्य गमय पारमेतर्हि।।

**(567)**

जनसामान्य: प्रायो हसन्नुपैतीह दृष्टिगोचरताम्।

हसितेषु तस्य न परं प्रतीयते कश्चिदुल्लास:।।

**(568)**

संस्कृतविदोऽपि भाषां न संस्कृतां व्यवहरन्ति यदिदानीम्।

कथमिव तामधिगन्तुं समुत्सुकाः स्युः परे जगति।।

**(569)**

ग्रीष्मे प्रवर्तमाने स्नातुं यस्मै न दीयतेऽवसरः।

तस्य गजस्यालाने कियानसह्यो भवेद् बन्धः।।

**(570)**

सीतां प्रति सन्देशो नीतो रामस्य पवनपुत्रेण।

क्वासि, त्वाम्प्रति केन स्वं प्रहिणोम्येष सन्देशम्।।

**(571)**

प्रायः कैश्चित् स्वस्य प्रदर्शनेनानुभूयते तृप्तिः।

स्वस्मिन् दर्शनमेव प्रदर्शनात् साधु मन्येऽहम्।।

**(572)**

सङ्कोचेन स्वगतं न व्याहृवानहं पुरस्तस्य।

क्षणमनुमीय मदन्तर्गतञ्च तेनेषदिव हसितम्।।

**(573)**

गुरवोऽन्तरन्धकारं हरन्ति शिष्यस्य तत्त्वजिज्ञासोः।

शिष्येण भाव्यमन्तेवसता शुचिना विनीतेन।।

**(574)**

वंशीध्वनिं कदाचिन्मृदुं मृदङ्गध्वनिं कदाचिच्च।

ध्वनिमनुभवाम्यनाहतमेकान्तगतः कदाचिच्च।।

**(575)**

सर्वंसहेति नाम्ना प्रथिता प्रतिभाति मेदिनी माता।

असमर्थेवेदानीं कथञ्चिदिह सर्वमपि सोढुम्।।

**(576)**

महता काठिन्येन व्यतियान्तीमानि विरहदिवसानि।

रामो वा द्रष्टव्यो यक्षो वा मेघदूतस्य।।

**(577)**

कस्मादमुं सरस्वति! विजहासि न सर्वथा कविम्मन्यम्।

प्रतिभाति स्तुतिगानान्न जगन्नाथोऽधुना विरतः।।

**(578)**

मद्भणितानां श्रवणाज्जनसामान्यो निवर्ततां कामम्।

यद् गोष्ठीषु सहृदयाः श्रोतुं नेहन्त इति खेदः।।

**(579)**

स्मृतिमुत्पादय न सखे! धम्मिल्लस्येह तस्य विततस्य।

विरमति न प्रतिवर्षं प्रावृश्यस्माद् घनश्यामः।।

**(580)**

उत्पादितस्त्वयाऽहं जातौ हंसस्य तदपि धातर्मे।

मानससरोविहारस्त्वया न लिखितः कथं भाले।।

**(581)**

गुरुभिर्यैर्निर्दिष्टं कृतेऽस्य लोकस्य जगति गन्तव्यम्।

स्वेन स्वेन पथा ते गता गताः क्वेति कः कथयेत्।।

**(582)**

एका कुतोऽप्यकस्मात् पतत्रिणी चित्रकान्तवर्णमयी।

क्षणमधिगता मदीयं हस्तं क्षणमथ गतोड्डीय।।

**(583)**

नद्यः सलिलविरहिता नभो विरहितञ्च जलदवृन्देन।

संवेदनया विरहितमाभाति च हृन्मनुष्यस्य।।

**(584)**

मन्ये कश्चिद् भेदो वाचां भेदेषु मौनमप्येकः।

वाग्भ्यः स हि स्फुटाभ्यः प्रभवति यत्किञ्चिदतिमात्रम्।।

**(585)**

विभजन्ति सम्प्रदाया नानाभेदेषु मानवं प्रायः।

एकत्वमानयन्तः केचिदितस्तेषु मन्तव्याः।।

**(586)**

नेष्यामो निजदिवसान् वयमेते स्वासु पर्णशालासु।

कुशलि स्यात् सिंहासनमिह ते छत्रञ्च कुशलि स्यात्।।

**(587)**

सच्छत्रं सिंहासनमित एकेऽध्यासते स्वसौभाग्यात्।

आतपतप्तायां भुवि केचिद् धावन्ति दौर्भाग्यात्।।

**(588)**

कस्मैचिदपि न दत्तं पिपासवे हन्त सलिलमातृप्तेः।

न बुभुक्षवेऽपि दत्ता मयेह कस्मैचिदन्नकणाः।।

**(589)**

कथमिव मह्यमिदानीं शास्त्राणीमानि भारभूतानि।

अपि शास्त्रं नामैतन्मत्कृत एवास्ति कान्तारम्।।

**(590)**

विधिनेह धर्मसत्यं केनानीयेत लोकदृष्टिपथम्।

व्याख्यानेषु न किञ्चिद् वेदादेरेकवाक्यत्वम्।।

**(591)**

जातं मद्व्यथितमिदं प्रविलीनं रेतसीव मय्येव।

मन्मुखगतेन भाव्यं स्मितेन तत एव जनितेन।।

**(592)**

'कार्यमिदं कर्तास्मि प्राप्तेऽवसरे' मयेति निर्णीतम्।

प्राप्तोऽवसरः, कार्यं नैव तदारब्धमपि किञ्चित्।।

**(593)**

द्वन्द्वे प्रवर्तमाने मध्य इदानीं विचार-भावनयोः।

सीदति कवितोभाभ्यां स्वं स्वं प्रति कृष्यमाणेव।।

**(594)**

किं वक्तव्यं मनसो विषये स्वस्येह जाड्यकलितस्य।

यस्मिन्नातनुते न प्रभावमेषोऽपि मधुमासः।।

**(595)**

कस्य पिपासा शमिता कथय कवितया गता बुभुक्षा वा।

अपि लोकस्य समस्यां कविरर्हति रे समाधातुम्।।

**(596)**

स्वस्यायुषः प्रदत्ता यस्मै संवत्सरा मया नैके।

उत्सहते न स मह्यं क्षणमुपहर्तुं स्वमेकमपि।।

**(597)**

आतनुतः संवादं स्वभागमधिकृत्य गृध्रगोमायू।

हृदयं प्रकम्पमानं निकटे बद्धस्य हरिणस्य।।

**(598)**

कालं कियन्तमस्यां मरुभुवि भाव्यं भ्रमद्भिरस्माभिः।

निकटे सलिलस्रोतोऽस्तीति कियद्वञ्चिताः स्याम।।

**(599)**

कालं कियन्तमेषा स्थास्यति तप्ताऽस्मदक्षिमरुभूमिः।

अपि वर्षिष्यत्यस्यां कोऽपि श्यामो घनीभूतः।।

**(600)**

आस्वादः परिवृत्तिं सचेतसां हन्त साम्प्रतं प्राप्तः।

न जगन्नाथ! यदेतान् क्वचित् कवित्वं तव स्पृशति।।

**(601)**

त्वत्सन्देशहरोऽहं जाने भवितुं न पात्रमेषोऽस्मि।

कञ्चित् प्रहिणु त्वाम्प्रति मत्सन्देशानिमान् नेतुम्।।

**(602)**

प्रतिभाति प्रतिरूपं प्रत्येकं रूपमेव तस्येह।

तस्यैव व्याकीर्णं स्मयमानस्य स्मितं परितः।।

**(603)**

स जगन्नाथः किं त्वं गोष्ठ्यामामन्त्रितो य एतस्याम्।

पूर्वं परिचयपत्रं दर्शय तदनन्तरं प्रविश।।

**(604)**

छायामपि ये पूर्वं तव न स्प्रष्टुं समुत्सहन्ते स्म।

आयान्ति त्वां द्रष्टुं तेऽद्य जगन्नाथ! किं जातम्।।

**(605)**

अन्योन्यमाम्रपाल्या बुद्धस्य च सङ्गते यदा नेत्रे।

वाग्व्यवहारविरहितो वाग्व्यवहारस्तदाऽघटत।।

**(606)**

न श्रूयते पदध्वनिरपि न श्रुतिमेति नूपुरक्वणितम्।

अन्तस्तथापि किञ्चिन्नृत्यदिवाभाति मे सततम्।।11।।

**(607)**

इह रुदितं सीताभिः पाञ्चालीभिश्च पीडया रुदितम्।

अद्यापि नारि! नितरां त्वदञ्चलं क्लिन्नमेवास्ति।।

**(608)**

किमपि महाभारतमिव सम्पन्नं दृष्टमेव सद्य इह।

शृणुमः प्रवर्तमानं संवादं गृध्रगोमाय्वोः।।

**(609)**

कलकलभरितमरण्यं जातं कालाद् बहोः शृगालानाम्।

कण्ठीरवस्य स रवो नैव श्रुतिगोचरो भवति।।

**(610)**

अवगणितो येन मया नभसोऽपि पुरा विशाल आयामः।
सम्प्रति नयामि दिवसान् शयान इह नीडके सोऽहम्।।

**(611)**

एतादृशोऽपि दृश इह याः पश्यन्त्योऽपि नैव पश्यन्ति।
एतादृगपि दृगेका सर्वं पश्यत्यपश्यन्ती।।

**(612)**

नग्नीभूय तमोभिर्यन्नर्तितमत्र तन्न खेदाय।
खिन्नोऽस्मि किन्तु दृष्ट्वा नृत्यन्तीर्दीधितीर्नग्नाः।।

**(613)**

शीघ्रमुपैमीत्युक्त्वा सायमगाद् गोषु दुह्यमानासु।
गोषु स नाप्तः प्रातः पीतप्रतिबद्धवत्सासु।।

**(614)**

कस्माद् दैवायतनात् पवित्रतायां वदेह तन्न्यूनम्।
यद् द्वारमाम्रपाल्या गौतमपदधूलिधूसरितम्।।

**(615)**

एरण्डेषु सगर्वं सत्सु समन्ताद् द्रुमायमाणेषु।
मुखमाच्छाद्य रसालः कुतः स्वदिवसानि यापयतु।।

**(616)**

किं जातं किमकस्माद् दुर्वृत्तो वा प्रविष्ट उद्यानम्।
जाताः स्तब्धा वृक्षा विहगानां कूजितं स्तब्धम्।।

**(617)**

हर्म्ये सुखं शयाना: श्व: सर्वे प्रातरेव उत्थाय।

कर्कशभूशयितानां वक्तार: कष्टमधिकृत्य।।9।।

**(618)**

देहै: केवलमिह ये मनांसि येषां सदा विदेशेषु।

भारतवास्तव्यास्ते परं न खलु भारतीयास्ते।।

**(619)**

स्रोत: शुष्कं मरुभूरातपतप्ता च गम्यमतिदूरे।

मृत्योरस्तित्वस्य च मध्ये कोऽप्येष सङ्घर्ष:।।

**(620)**

वसनविहीनत्वेनाव्यभिचरितं किमपि नेह नग्नत्वम्।

बहवो जगति सवसना अपि नग्ना: सम्प्रतीयन्ते।।

**(621)**

कष्टं श्रुतं सुमनसां सूचीवेधादलं विषण्णानाम्।

पददलितानां तासां चीत्कारो न श्रुतस्तावत्।।

**(622)**

त्वामुपलब्धं निकटे कामयमानं कथं नु मम चेत:।

क इव क्षण: स यस्मिन् प्रत्यासन्नो न मे भवसि।।

**(623)**

काकानामधिकार: कियदवधि: स्याद् रसालवनभूमौ।

कोकिलकेभ्यो देय: सम्प्रति सामाजिको न्याय:।।

**(624)**

खर्जूरे यं गृध्रं स्थितमद्राक्षं निदाघमध्याह्ने।

हन्त तमेव रसालद्रुमेऽद्य पश्यामि कृतनीडम्।।

**(625)**

पृच्छ मृदितमृदितस्य व्यथां प्रसूनस्य माऽथवा पृच्छ।

मा मैव पृच्छ किन्तु च्छलितच्छलितस्य सुजनस्य।।

**(626)**

प्रावर्तत येन पथा गतागतं श्रीमतां गजेन्द्राणाम्।

आहिण्डन्त इदानीं मुखरा गोमायवस्तस्मिन्।।

**(627)**

विततायां मरुभूमौ क्वचन विलीनं नु जीवनस्रोतः।

सर्वेषामिह तिष्ठति रसनास्वेषा पिपासैका।।

**(628)**

चलतो मेऽध्वनि नाभूत् यद्यपि कश्चित् कुतश्चिदवरोधः।

शान्तानुकूल पवनः शिवश्च नासीत् तथाप्यध्वा।।

**(629)**

मातः सम्प्रति यातः पथि मम पातः पदे पदे भवति।

अस्मद्विघ्नविघातस्तव नु कृपातः कदा भविता।।

**(630)**

प्रतिकूल इहाभवद् दिनातप एवं न हि तेन खिद्यते।

मम खेद इयांस्तु चन्द्रिकाऽप्यधुना मत्प्रतिकूलतां गता।।

**(631)**

परितो दशाननेषु स्वस्वावसरं प्रतीक्षमाणेषु।

सीतां रक्षितुमेका लक्ष्मणरेखा कियत् प्रभवेत्।।

**(632)**

परिचय इतो मदीयो महासमुद्रेण यावता घटितः।

द्रुह्यन्ति तावतैव क्षुद्रा मह्यं समे कूपाः।।

**(633)**

कोकिल इव सूचयिता कदाचिदासं वसन्तकालस्य।

वैतालिकोऽहमधुना ग्रीष्मस्य द्वारि तिष्ठामि।।

**(634)**

यत्कृत्यं तन्न कृतं यदकृत्यं हन्त तत्तदाचरितम्।

उभयोः प्रायश्चित्तं शिव तव नामाक्षरद्वन्द्वम्।।

**(635)**

रङ्गात् प्रायः सर्वे मम निष्क्रान्ता समानधर्माणः।

कालं मया कियन्तं श्रान्तेनैकेन नटनीयम्।।

**(636)**

वाग्देवताकुतुकिनी स्वप्रासादोपरिस्थिता मन्ये।

सुकवेश्चित्ताकाशे शब्दकपोतान् निपातयति।।

**(637)**

प्रविशन्तं विनिवारय न जगन्नाथं कदाचिदुद्यानम्।

स्निग्धासु च्छायासु क्षणमिच्छत्येष निद्रातुम्।।

**(638)**

निःस्वानामिह रुदितं जनयेत् केषाञ्चिदेव हृत्कम्पम्।

निःस्वानां हसितं तु प्रायो जनयेद् भुवः कम्पम्।।

**(639)**

येषां हृदयक्षेत्रं कण्टकिनीभिर्लताभिराक्रान्तम्।

अपि शुश्रूषुस्तेभ्यो वसन्तसन्देशकाव्यमसि।।

**(640)**

प्रज्वाल्य कमपि दीपं प्रस्थातव्यं मया न जगतोऽस्मात्।

केचिदवश्यं तमसि प्रक्षेप्तव्याः स्फुलिङ्गकणाः।।

**(641)**

यासां सुमहानब्धिर्विधिना निर्धारितं सुगन्तव्यम्।

ताः खलु नद्योऽद्यत्वे शुष्यन्ति स्वासु सिकतासु।।

**(642)**

व्यथितस्य कस्य कस्य त्वामिह विनिवेदयामि निजकस्य।

यदलं विनिवेदयितुं मदधरलसितानि हसितानि।।

**(643)**

नग्नीभूय प्रायो नृत्यन्त्येते नटा विटाश्चेह।

एषा कलेति विवशैः प्रतिपत्तव्यं किलास्माभिः।।

**(644)**

आदर्शत्वं येषु प्रतिष्ठितं संशयेन रहितं तान्।

उपचारैः ोडशभिस्त्वर्चामः चित्रशेषास्ते।।

**(645)**

गङ्गा वहति स्मात्र प्रवहत्यत्र स्म नर्मदाऽतीते।

नूनं कल्पयितार: कदाचिदितिहासमर्मज्ञा:।।

**(646)**

पूर्वं ननर्त लक्ष्मीर्दृक्सङ्केतैरियं सरस्वत्या:।

दृक्सङ्केता: सम्प्रति सरस्वतीं नर्तयन्त्यस्या:।।

**(647)**

य उपहृत: श्रीहरिणा हृदयाख्य: कोऽपि दर्पणस्तुभ्यम्।

मलिनीकृत: स हन्त त्वया जगन्नाथ! मूढेन।।

**(648)**

गङ्गेव देववाणी यान्ती प्रतिभाति हन्त शुष्कत्वम्।

न सरस्वतीव लुप्ता स्यादिति सञ्चिन्त्यमस्माभि:।।

**(649)**

विदधति जनान् प्रणम्यान् य इह गुणास्ते परेषु निक्षेप्या:।

प्रणतो येन जन: स्यात् स एव देयो गुणोऽस्मभ्यम्।।

**(650)**

वर्धितवती पयोभिर्यानिह वत्सानुपस्तुता भूमे!

क्लिश्यसि तैरेव बलात्सम्प्रति दुग्धा च पीता च।।

**(651)**

अन्तर्मानससरसी साम्प्रतमस्माकमस्ति शुष्केव।

रुदिमस्तथापि न दृशौ भवतोऽस्माकं किमप्यार्द्रे।

**(652)**

कविसमवाया येषां शून्या इव भान्ति हन्त विरहात् ते।

स्मृतिषु सदा सन्धार्यास्त्रिपाठिनो भास्कराचार्याः।।

**(653)**

सन्धारयन्तु केचित् काममुपेक्षां तथापि लोकेऽस्मिन्।

न कथञ्चिदपि सुमनसां पददलितत्वं मनागुचितम्।।

**(654)**

सत्यपि भेदे प्रकटे स्वादविदामनुभवानुसारेण।

माधुर्येणाभिन्नं केचन लावण्यमित्याहुः।।

**(655)**

स्वस्मिन्नहमन्वभवं यदैव यत्किञ्चिदेष दातृत्वम्।

रिक्तं तदैव लक्षितमात्मन एतन्मयाऽस्तित्वम्।।

**(656)**

त्वामहमेकमनेकेष्वेषु दिदृक्षुर्भ्रमामि दृश्येषु।

क्वासि कदाचित् सकृदपि मम गोचरतां दृशोर्गच्छ।।

**(657)**

वासन्तिकं समीरं प्रतीक्षमाणः स्थितोऽहमुद्याने।

कोऽयमुदीतोऽकस्माज्झञ्झावातः सुदुर्धर्षः।।

**(658)**

संवादेषु कलायां साहित्ये साम्प्रतञ्च विरतेषु।

श्रूयत एषु दिनेषु तु संवादो गृध्र-गोमाय्वोः।।

**(659)**

विद्वेषकण्टकानामुद्याने यत्र नित्यमुत्कर्षः

क्व नु सद्भावसुमनसां कृतेऽवकाशो भवत् तत्र।।

**(660)**

वाग्देव्या वीणायाः ध्वनितं मन्ये स कालिदास इह।

कर्णामृतमिह मन्ये भवभूतिर्नूपुरक्वणितम्।।

**(661)**

येन स्थितं कराग्रे सद्गुरुगोविन्दसिंहदेवस्य।

को वर्णयितुं शक्तस्तस्य श्येनस्य सौभाग्यम्।।

**(662)**

संवर्धने प्रयासो येषां लोके सदाऽन्धतमसस्य।

हन्त त एवाश्वासनमालोकस्याधुना ददति।।

**(663)**

न मनुष्यत्वस्येतः सिद्ध्यै किञ्चित् प्रमाणमाकारः।

हन्त मनुष्याकृतयः क्रूराः पशवोऽपि दृश्यन्ते।।

**(664)**

गङ्गैव नाम मलिना न च मलिना हन्त केवलं यमुना।

पश्य सरस्वत्यपि सा बिभर्ति मालिन्यमेतर्हि।।

**(665)**

वाल्मीकेर्व्यासस्य स्मरति न वा कोऽपि कालिदासस्य।

संवेदनरहिते वयमुत्पन्नाः स्मो युगे कस्मिन्।।

**(666)**

हसितेनावृणुते स्वं रुदितेन कदाचन स्वमावृणुते।

अधुना मनुजो नैकैरावरणैरावृतो भाति।।

**(667)**

अन्वेष्टव्यो मिलितैः कश्चिदुपायो विवेकिभिस्तावत्।

धर्मक्षेत्रं यावन्न स्याद् भूयः कुरुक्षेत्रम्।।

**(668)**

लुप्ता सरस्वतीति श्रूयत एतर्हि तावदस्माभिः।

अस्माकं सन्ततयो गङ्गां श्रोष्यन्ति लुप्तेति।।

**(669)**

भणितानि भान्ति यद्यपि न ते जगन्नाथ हन्त कवितेति।

हृदि कवितेव तथापि प्रभावमाविश्य जनयन्ति।।

**(670)**

स्वादु न तत्सङ्गीतं न च तत् काव्यं पदे पदे स्वादु।

सम्प्रति सचेतसामपि चेतांसि स्वादुविमुखानि।।

**(671)**

मत्करगताऽपि तिष्ठति मूकीभूतेव मामकी वीणा।

सम्प्रति मन्ये जाता मम भारो दुर्वहः कश्चित्।।14।।

**(672)**

क्वचिदुड्डीय गतो मे हंसः प्रियवाहनौ मयूरश्च।

शुद्धस्फटिक–सुकलिता मम मालाऽपि क्वचिद्भ्रष्टा।।15।।

**(673)**

नहि गङ्गैवेदानीं प्रदूषिता हन्त नैव यमुनैव।

जाता सम्प्रत्यहमपि सरस्वती काकपेयेव।।

**(674)**

आहिण्डमान एतल्लोकेऽन्वभवं वदामि सत्यमहम्।

घृणया भरिताः प्रेम प्रदर्शयन्तीह सुहृद इव।।

**(675)**

सततं निकटेऽधितिष्ठता यद्दृश्येन जनेन केनचित्।

मम संल्लपितं रहः किमप्यथ तत् केऽपि कवित्वमूचिरे।।

**(676)**

प्रणयाख्यसुगन्धसम्भृतं मधुमत् संल्लपितं यदावयोः।

कवितेति पठन्ति हन्त तद् बहवः पण्डितमानिनो जनाः।।

**(677)**

कविता, रसभावपेशलानां तरलस्नेहनिषेकशीतलानाम्।

सहजोन्मिषितत्रपानतानामुपहारः खलु कोऽपि लोचनानाम्।।

**(678)**

कविता, निजमातृकोमलाङ्के शयितानां पिबतां पयः कदुष्णम्।

मुखपद्मगतः शुभः शिशूनां मधुरो निश्छलनिश्छलो नु हासः।।

**(679)**

कविता खगशावकस्य मन्ये क्षणमालम्ब्य मुदा गवाक्षमध्ये।

उषसि स्फुटकूजितं नभोऽग्रेऽरुणरागे स्फुटति प्रभिन्नवर्णे।।

**(680)**

प्रणयः क्वचिदेति गीततामपि संगीतकतामुपैति च।

क्वचन स्मितभावमेति च क्वचिदाप्नोति कवित्वरूपताम्।।

**(681)**

कुसुमावलिषु व्यथामहं नहि मृद्वीषु कदापि कामये।

परमत्र नु किं विधीयतामिह जन्मन्यपि कण्टकोऽभवम्।।

**(682)**

यदा काचिद् दिव्या स्मृतिरुदयते यद् हृदि शुभे।

त्वदीया निर्भिद्यत्कमलसदृशास्ये क्षणमपि।।

तदा वंशीनादः क्वचिदपि सुदूरे समुदितः

सुधासोदर्यो मां विचलितमिवालं प्रकुरुते।।

**(683)**

प्राकृतजनगुणगानैर्ये खलु मां पीडयन्त इह सन्ति।

तेषां विषये नाहं बिभर्मि लोके शुभां दृष्टिम्।।

**(684)**

विमला तनुस्त्वदीया विमलं रे तावकं मनोराज्यम्।

किमपि मुनेरिव मन्ये मराल! विमलं तवास्तित्वम्।।

**(685)**

स्वजनाः सर्वेऽपि मता आर्जवमवलम्बितं त्वयाऽजस्त्रम्।

आसीर्मराल मन्ये कश्चिदये बोधिसत्त्वस्त्वम्।।

**(686)**

त्वमजातशत्रुरासीस्तथापि तव शत्रवोऽभवन् बहवः।

आगस्तव यदकार्षीस्तीर्थध्वांक्षेषु विश्वासम्।।

**(687)**

कस्मिन्नीडे शेषे क्रीडसि कस्मिंश्च साम्बुजे सरसि।

कोऽपि न सुबहोः कालात् सन्देशहरस्तव प्राप्तः।।

**(688)**

प्रकटीभवसि कदाचित् त्वमिह श्रीरामकृष्णरूपः सन्।

श्रीरमणाख्यमहर्षिः संश्च कदाचित् स्फुटीभवसि।।

**(689)**

धावल्यस्य पृथिव्यामसि त्वमेकः किमप्युदाहरणम्।

शशिनः पूर्णस्य त्वं साम्यं बिभ्रत् क्वचिच्चरसि।।

**(690)**

स्वपदं यत्र न्यस्येस्तत्रोत्पद्येत तीर्थमिति मन्ये।

धर्मो मेघो वर्षेत् प्रवहेदपि पुण्यसलिला च।।

**(691)**

उद्घातिन्यां भूमौ सम्भाव्यन्ते पदे पदे पाताः।

एतावता न तस्यां केनचिदपि नैव गन्तव्यम्!।।

**(692)**

विच्छित्तिभिरपरिचितो विविधाभिः कल्पनाभिरस्पृष्टः।

केनचिदविवेकवता कविरित्युक्तो जगन्नाथः।।

**(693)**

रुदितेषु व्यथितं ते यावद्व्यक्तं नु तत्तु सत्यमभूत्।

हन्त न सह्यमिदानीं यन्मौने व्यज्यमानमिव।।

**(694)**

त्वद्वीक्षणसंवलितः क्षणः स जीवन्निवानुभूत इह।

इयमन्यथा क्षणायां काऽपि मृतानां सरिद् वहति।।

**(695)**

रसगङ्गोद्धरिता यैः सुकवितया विलसितञ्च भामिन्या।

रमणीयार्थैः शब्दैरिदं जगन्नाथितं तैर्नु।।

**(696)**

अपि मन्मनसि भ्राष्ट्रे कदाचिदेकोऽपि शब्दपरमाणुः।

तापाद्विखण्डितः सन् कुर्याद् विस्फोटमत्युग्रम्।।

**(697)**

प्रत्येकं त्वामणुशु व्याप्तं जडमूर्तिषु प्रतिष्ठाप्य।

यन्नास्तिकैर्न विहितं तदास्तिकैरहितमाचरितम्।।

**(698)**

मोहग्रस्तत्वस्य च दृग्-रहितत्वस्य किञ्च पर्यायः।

अद्यत्वेऽपि समन्ताद् धृतराष्ट्रत्वं परिस्फुरति।।

**(699)**

कामं न काश्चिदास्तामस्माकं जगति सौखशायनिकः।

स्कन्धेऽजातकिणा वयमिह सम्मान्याः सुखं स्वपिमः।।

**(700)**

अस्य न कस्यचिदास्ते गरुत्मतो यदपि सत्कुले जन्म।

मानवनामा प्रथितः कोऽपि गरुत्मांस्तदप्येषः।।

**(701)**

मन्यामह एतावत् पर्याप्तं जगति परिचयोऽस्माकम्।

श्रीचरणयोर्वयं स्मो धूलय इति, कालिदासस्य।।

**(702)**

न कृते केवलमासीद् यक्षप्रहितस्य मेघदूतस्य।

आस्ते नु मादृशामपि वक्रः पन्थास्तवोज्जयिनि।।

**(703)**

अपि गोपालानामिह कुले क्वचित् तक्रविक्रयः क्रियते।

इयमुज्जयिनी, वच्मि त्वां कविताश्रावणाद् विरम।।

**(704)**

प्रायोऽतृप्ता जाता द्वित्रान् वा पञ्चषान् विहायास्मान्।

कियदिह रे नर्तिष्यसि कियच्च कर्ताऽसि नाट्यमिह।।

**(705)**

गोमायोर्गृध्रस्य च मध्येऽस्ति ग्रन्थिबन्ध एतर्हि।

स्वस्वस्यार्थस्य कृते कदाचिदासीन्नु मतभेदः।।1

**(706)**

योगिव्यापारः स्यात् परकायेषु प्रवेश इह कश्चित्।

परहृत्प्रवेशनामा व्यापारोऽस्माकमिह मान्यः।।

**(707)**

वर्त्मन्यसत्यनाम्नि स्थित्वा सत्यं समीहमानेषु।

कश्चिदसत्ये निष्ठेत्यारोपोऽस्मासु न न्याय्य:।।

**( 708 )**

उन्नीयन्ते प्रश्ना: कवित्वमभिलक्ष्य तेऽत्र येऽस्माभि:।

तव मौनमेव तेषां वस्तुत एकं समाधानम्।।

**(709)**

न स्यात् कश्चिद् द्रष्टा न स्यात् कश्चिद् गुणग्रहीता च।

वनकुसुमानां सिद्धं निरर्थकं जन्म नैतेन।।

**(710)**

वाल्मीकेर्मुखमण्डलादभिनवा सद्य: प्रसूताऽभवद्

या संवर्धनमाप दर्भकवलैर्व्यासाश्रमे वाङ्मृगी!

तामागत्य च कालिदासहरिण: संस्पर्शसम्मीलिता-

मेकान्तेषु यदा कदाचन मुहु: शृङ्गैरकण्डूयत।।

# परिशिष्टम्

जगन्नाथसुभाषित-पद्यानाम् अकारादिक्रमसूची

## परिशिष्टम्

# जगन्नाथसुभाषितपद्यानाम्

# अकारादिक्रमसूची

**(जगन्नाथसुभाषितपद्यानाम् अस्यामनुक्रमणिकायां पद्यांशस्याग्रे प्रथमं पृष्ठसंख्या तदनु च पद्यसंख्या द्रष्टव्या)**


| | | | |
|---|---|---|---|
| अक्षम्यानपराधान् | 272/1100 | अत्यन्ताभाव: किं | 346/1548 |
| अक्षयमात्मानमलं | 299/1265 | अत्र मठाधीशत्वं | 153/385 |
| अक्षुण्णानामासं | 272/1101 | अद्यत्वेऽप्यादिकवेर्महीयसी | 3/4 |
| अग्निपरीक्षेह स्याद् | 473/187 | अद्यापि ता विभूतय | 254/996 |
| अग्रे गन्तुमकार्ष | 466/140 | अद्यापि न सौहार्द | 500/376 |
| अग्रे जीवनचक्रं | 245/941 | अद्यापि यत्र तत्र | 229/845 |
| अग्रे हिमालयञ्च | 13/46 | अद्याप्यार्जवनामा गुणो | 188/599 |
| अग्रेसरतस्तस्य तु | 75/17 | अद्यावधि तल्लिखितं | 457/72 |
| अङ्गीकुर्वन्त्वेते न | 422/2001 | अद्यावधि नास्माकं | 90/9 |
| अज्ञातेनागत्य प्रदूषितं | 295/1238 | अद्यावधि साधितमिह | 143/327 |
| अणुरपि दयोदय: | 413/1947 | अद्येदं सुदिनमहो | 41/1 |
| अतिदूरस्थं काङ्क्षे | 454/50 | अद्राक्षो यां | 10/17 |
| अतिदूरात् सम्प्राप्तै.... | 320/1390 | अधरे कोऽप्यनुराग: | 204/696 |
| अतिरिच्योदरपूर्तिं किं | 197/654 | अधिकारक्षेत्रं नहि | 400/1872 |
| अतिवादिभिरिह कैश्चिद् | 182/563 | अधिकार: प्राणिभ्यो | 57/23 |
| अतिशयकरुणार्द्रहृदो न | 233/867 | अधिदेवालयशिखरं | 505/413 |

अधिरोहति यः 212/744
अधिसद्वदनमृषीणां 53/10
अध्यापका नियुक्तः 276/1126
अध्यापयामि तमहं 333/1469
अध्यास्ते प्रत्येकं 265/1062
अध्यास्ते प्रत्येकं 352/1585
अध्युज्जयिनि 12/33
अध्येतव्या गीता 215/760
अनपेक्षणीयमग्रे दर्श 245/942
अनपेक्ष्य जातिमथवा 421/1999
अनभिमतः सम्पर्को 351/1577
अनिवार्य धर्मस्य 246/947
अनुकनखलं 13/45
अनुकार्यस्यानुकृतिं 205/702
अनुकूलस्त्वां 39/8
अनुगन्तुं त्वामिच्छति 120/188
अनुगन्तुं न च नापि 522/531
अनुगन्तुं न समर्था 492/318
अनुदारेऽस्मिंल्लोके भ्रामं 226/828
अनुदिनमुद्घाट्यन्तेऽस्मभ्यं 459/90
अनुदिनमेव निशाता 64/15
अनुपस्थितमितिहासे 327/1433
अनुपस्थितेन गोष्ठ्यां 300/1269
अनुभावस्य कृतेऽत्र 468/153
अनुभूतोऽनुक्षणमिह 199/663
अनुभूयत इव 104/96
अनुभूयतेऽनुभावोऽनुस्यूतः 324/1413
अनुमीयतेऽनुभावः 458/80
अनुशीलयन्ति सुधियो 134/274
अनुसन्धानं प्रथमं 338/1501
अनुसन्धेया वेदा 383/1768
अन्तक आगत्यान्तं 276/1128
अन्तरिव प्रत्येकं 373/1708
अन्तर्गृहेऽश्रुवर्षं गृहाद्बहि.... 519/511
अन्तर्मानससरसी 539/651
अन्तर्यत् सङ्गीतं 147/350
अन्तर्हितं रहस्यं 347/1553
अन्तस्तवविरहिता 340/1510
अन्तः कोऽपि समुदय..... 367/1675
अन्तः प्रविश्य 499/365
अन्तःसङ्गीतमिव 99/63
अन्तःप्रविश्य 372/1701
अन्तःप्रविश्य कोऽपि 92/22
अन्तःस्नेहस्रोतः 126/227
अन्तिकगतामपि त्वां 228/839
अन्धतमसमन्यादृशमेतद् 302/1281
अन्धतमसमिह लोके 107/112
अन्धश्रद्धं प्रायः 361/1634
अन्धः केवलमासीके..... 121/193
अन्धा भवन्ति मन्ये 389/1805
अन्धो नायं लोको 306/1306
अन्नं ददति प्रायो 475/198

अन्यत् किं वद्नव्यं 70/20
अन्या दृगेव काचन 245/938
अन्यादृशीति मन्ये 252/984
अन्यायात् सम्प्राप्तां 262/1045
अन्यैव काचिदेषा 317/1374
अन्योन्यं क्षेत्रेऽस्मिन् 308/1317
अन्योन्यं भ्रातृत्वं 318/1379
अन्योन्यं विद्वेषः सञ्जातः 171/495
अन्योन्यं सङ्घटो 428/2041
अन्योन्यमाम्रपाल्या 533/605
अन्विष्ट उन्मदेषु य 172/503
अन्विष्यता त्वया 521/522
अन्विष्यथ 5/22
अन्विष्यन्ति स्वगुणज्ञातन् 462/111
अन्वेषितानि न 392/1826
अन्वेष्टव्यो मिलितैः 542/667
अपहृतमिव लुण्ठितमिव 108/118
अपि कलिकालस्यास्य 352/1583
अपि कलिकालः 507/424
अपि गजनिमीलिकेयं 376/1726
अपि गोपालानामिह 547/703
अपि जगतीह 383/1770
अपि जगतीह प्रभवो 384/1775
अपि तव 23/91
अपि दारिद्र्ये 17/33
अपि मन्मनसि भ्राष्ट्रे 546/696
अप्पयदीक्षितसदृशा 23/90
अप्यवतरिष्यति क्षण 267/1072
अप्युपयोगित्वं ते 478/218
अप्येषु रे 37/11
अप्राप्तजीविकानां 266/1067
अबलाः सुरक्षिताः 453/46
अभिधाने तव 25/114
अभिधेयं यदिहासीत् 302/1280
अभिनीयन्ते केवलमितो 174/512
अभिनेतारो न वयं 92/24
अभिनेतारो लोके बहवो 190/610
अभिनेतृभिरेतर्हि 117/171
अभिभूता ये सद्यो 166/466
अभिलक्ष्य पश्चिमामनु 345/1539
अभिलक्ष्येश्वरमधुना 363/1646
अभिलाषः क्वचिदपि 208/716
अभिशप्तोऽहं स्वप्ने 477/214
अभ्यस्ता वयमेते 84/11
अभ्यस्तो राजपथे 429/2044
अमृतस्य कामनाया... 487/286
अयथार्थस्यास्य स्यान्ने.... 266/1066
अयथार्थाऽपि मदीया 236/888
अयमपि कोऽप्युपकारः 453/49
अयमुड्डयेत नभसः 398/1857
अयमेव जगति 290/1208

अरमत काव्योद्याने 19/54
अर्केण साकमुदयं 100/72
अर्जितमतीव दाक्ष्यं 243/925
अर्थकरीषु प्रथमं 160/432
अर्थोऽभिनवोऽग्राम्या 24/100
अर्हति कर्तुमभिनयं 494/332
अर्हति को निर्भीक: 197/653
अर्हन्ति स्थातुमितो 195/637
अल्पीयांसं मह्यं 526/555
अवगणितो येन 534/610
अवगतमिह स्वमूल्यं 115/161
अवगुण्ठनानि 40/9
अवचेतुमद्य गतवान् 112/141
अवतरितान्याकाशाद् 514/475
अवतारयन्ति सुधिय: 331/1458
अवभासत एवार्थो 216/763
अवरङ्गजीव ! 133/268
अवरोद्धुमस्य चरणौ 347/1554
अवरोधस्त्वां परित: 249/965
अवलम्बन्ते प्राय: 498/358
अवलम्बितस्तृतीयो 338/1498
अवलम्ब्य केऽपि 402/1883
अवलोक्य सूरदासं 244/932
अवलोक्यतां नित्यं 144/336
अवशिष्ट एक 294/1233
अवशिष्टं न किमपि 424/2016
अवसरमस्मै देहि 452/39
अवसररूपेण त्वं 231/855
अवसादस्य न पात्रं 336/1485
अवसानमस्य कीदृग् 458/84
अविचार्य पूर्वमेषा 171/497
अश्रुतमस्माभिस्त्वं 309/1324
अश्वत्थाम्न: कस्मै 239/903
अष्टाध्यायी क्रन्दति 71/3
असकृत् पराजयेन 101/73
असकृत् प्रदर्श्य रूपं 439/2103
असकृत्त्वां विस्मर्तुं 457/73
असकृन्मञ्चगतेन 288/1200
असकृावानुभाव: 18/41
असत: सदिह गमयितुं 208/718
असता त्वया न 269/1085
असहाय: सञ्जातो 92/23
असहिष्णुत्वमिदानीं 94/36
असुरक्षा नगरेषु 199/666
अस्तित्वं कविता 21/74
अस्तित्वं न बिभर्ति 160/428
अस्तित्वमन्धतमसाद..... 488/288
अस्तित्वमेतदधुना 96/48
अस्तित्वमेव जातं 64/18
अस्तित्वमेव मामकमतीव 47/14
अस्तित्वमेव साम्प्रत...... 142/323

| | | | |
|---|---|---|---|
| अस्तित्वस्य स्वस्य | 407/1912 | अस्मिन् श्मशानवृक्षे | 97/53 |
| अस्तित्वाख्यं मन्ये | 177/534 | अस्य कदाचित् | 399/1865 |
| अस्तित्वेन न | 364/1655 | अस्य जगन्नाथस्य | 503/399 |
| अस्तीदं सुरभि....... | 42/9 | अस्य न कस्यचिदास्ते | 547/700 |
| अस्तीश्वर इति | 473/186 | अस्या भुव आर्याणां | 3/6 |
| अस्त्येव पक्षपातः | 291/1214 | अस्यां यदपि | 77/2 |
| अस्त्येवालौकिकमिति | 324/1415 | अस्यास्त्यस्तित्वस्य | 217/773 |
| अस्पृश्यानां यैव | 55/1 | अस्याः कः | 217/770 |
| अस्मद्भीता रिपवः | 451/29 | अहमनुभवन् स्मृतीनां | 213/746 |
| अस्मद्वचांसि यद्यपि | 250/971 | अहमप्यनया सार्धं | 82/22 |
| अस्मांस्त्वमुद्धरिष्य...... | 267/1074 | अहमरिभिर्विरहित | 370/1689 |
| अस्माकं न कदाचित् | 212/740 | अहमहमिकया कामं | 383/1767 |
| अस्माकं हृद्देशो | 457/76 | अहमहमिकया ग्रस्तं | 101/76 |
| अस्माकमेव मन्ये | 247/952 | अहमहमिकया ग्रस्ते | 168/475 |
| अस्माज्जगतो जाने | 213/748 | अहमहमिकासु जगति | 424/2017 |
| अस्मानग्रे चलिता..... | 85/21 | अहमहमिकेति गृध्रा | 382/1761 |
| अस्माननु नाह्वानं | 338/1499 | अहमहमिकेति सैषा | 275/1123 |
| अस्मानुच्छेत्तुमना | 57/25 | अहमिह गतानुगतिको | 519/509 |
| अस्मान् सदा विपद्.... | 421/1997 | अहमेवं नगरेऽस्मिक...... | 333/1470 |
| अस्माभिरेव मन्ये | 134/276 | आ जन्मनोऽनुभूतं | 204/692 |
| अस्माभिर्द्रष्टव्यं | 468/154 | आकर्षकेण सम्यक् | 370/1691 |
| अस्माभिः प्रतिषिद्धः | 296/1247 | आकर्षणमन्योन्यं | 310/1328 |
| अस्माभिः स्वातन्त्र्यं | 260/1029 | आकर्षणाय मन्ये | 94/31 |
| अस्मास्वनुकम्पेत | 265/1061 | आकलिता | 23/96 |
| अस्मास्वेव द्वित्रा | 249/967 | आकारयति सुदूरात् | 169/485 |
| अस्मिन् भारतराष्ट्रे | 395/1842 | आकाशाख्यमहासरोवरगतं | 66/4 |

आकाशाजिरमध्ये न 181/557
आकाशान्तं यावत् 221/798
आक्रन्दतीव सम्प्रति 440/2109
आखण्डलस्य 10/13
आख्यानानि त्वत्तः 113/147
आगच्छागच्छेति 437/2091
आगच्छाम्यहमग्रे 175/518
आगत्येहास्माभिर्नैके 235/882
आगन्तास्याकाशे गर्जस्तर्जन् 172/499
आग्नेयी सरिदेका 281/1156
आङ्गलैर्भारतराष्ट्रे 447/5
आचक्षते हृदन्तर्गतं 90/12
आचरितं नास्माभिर्यदि 291/1219
आजन्मन आमृत्यो...... 84/13
आजन्मन आमृत्यो... 247/951
आजन्मन आमृत्योर्जन्तोः 150/368
आजन्मनः 295/1239
आजन्मनः सुमनसां 410/1932
आजन्मनो द्रुमान् 105/102
आजन्मनो मया 108/119
आजन्मनो मयेदं 110/128
आजन्मनोऽनुभूतो 137/294
आजीगर्तिर्नासीदेकः 196/643
आतङ्कवादनामा 352/1582
आतङ्कवादनामा 196/646
आतनुतः संवादं 532/597
आतनुते न विवादं 517/492
आतप एव समन्ताद् 148/356
आतप.चन्द्रिकयोरिव 152/383
आतपतप्तेभ्य इतश्छाया..... 183/567
आतप-तापानुभवं 515/477
आत्मन एव व्यथया 217/771
आत्मानं नित्यमहं 49/3
आत्मानं परितो मे 167/469
आत्मानं पूर्णत्वं 401/1880
आदर्शत्वं येषु 538/644
आदर्शस्य महत्त्वं 262/1044
आदर्शानामेते विक्रेतारो 93/29
आदाय सागराणां 68/7
आदिकवित्वं 21/68
आदिकविर्वाल्मीकि 4/10
आदिकवे! पश्य 203/686
आदिकवे! पश्येमां 78/17
आदिकवेर्वाल्मीकेरनुसन्धानं 3/5
आद्यमुपादेयमिदं शरीर.... 252/980
आधत्स्व विनयमात्मनि 455/60
आधुनिका न वदन्ति 221/795
आधुनिकाः शब्दस्य 414/1955
आनतवदनः 316/1366
आनन्दकाननेऽस्मिन् 457/71
आनन्दोल्लासे त्वं 70/22
आनीयानीय त्वं 64/9

| | |
|---|---|
| आप्ता इति मन्यन्ते | 309/1325 |
| आप्ता यथार्थवादिन | 304/1293 |
| आप्ता: प्रमाणमासन् | 250/973 |
| आभ्यन्तरस्य मन्ये | 499/367 |
| आमन्त्रणं पिकेभ्यो | 161/437 |
| आमन्त्रणस्य पत्रं | 325/1421 |
| आमृत्योरनुभूत: | 324/1414 |
| आमृत्योर्द्रारिद्यं | 84/17 |
| आम्रफलेष्वधिकार: | 433/2067 |
| आम्रोद्याने स्पृष्टे | 480/236 |
| आयात: स नु | 110/131 |
| आयातेयं प्रावृट् न | 173/505 |
| आयान्ति भाग्यवन्तो | 435/2082 |
| आयास्यति गर्जन्ती | 238/897 |
| आयास्यति वार्धक्यं | 514/472 |
| आयाहि स्वयमथवा | 403/1890 |
| आयोज्यन्ते प्राय: | 503/393 |
| आरब्धं तमसामपि | 303/1290 |
| आरम्भश्चान्तश्च | 483/254 |
| आरामेश्वरतीर्था | 285/1183 |
| आरार्तिक्यैर्नैव स्तुतिगानैर्नैव | 131/257 |
| आरुह्य प्रासादं | 355/1599 |
| आरोपयन्ति दंशान् | 178/540 |
| आरोपयन्तु कामं | 314/1353 |
| आरोपित इह | 470/168 |
| आरोपितानि यानि | 266/1065 |
| आर्जवमस्ति कदाचित् | 198/656 |
| आर्तस्वरे मदीये | 466/135 |
| आर्तस्वरो मदीयस्त्वां | 465/133 |
| आर्ता मीरगता | 46/8 |
| आर्द्रकलशुनादीनां | 462/110 |
| 'आर्याणां' निर्माणे | 425/2022 |
| आर्याणामेतेन | 24/102 |
| आर्येतरा यदि त्वां | 158/420 |
| आलङ्कारिकगोष्ठ्यां | 15/10 |
| आलयमिह भागवतं | 521/520 |
| आलापेषु सुहृद्भिर्मूढ | 148/358 |
| आलोकस्य कणोऽपि | 264/1053 |
| आवर्यन्ते प्रेम्ण: | 485/268 |
| आविर्भावात् पूर्वं | 481/242 |
| आशा नाम नदी | 431/2055 |
| आशाबन्धो यो | 417/1972 |
| आशावानथ योऽहं | 498/361 |
| आशीभि: सुगुरूणा...... | 90/8 |
| आशैशवात् पदाति: | 255/1002 |
| आशैशवादधीतं | 376/1727 |
| आश्रयणीयं मौनं | 145/339 |
| आश्रितमिदमुद्यानं | 294/1232 |
| आश्रित्यैनां मानव | 256/1008 |
| आश्रित्यैव प्राणा: | 324/1412 |
| आश्रीयते न तर्क: | 204/691 |

| | | | |
|---|---|---|---|
| आश्वस्तोऽस्मि | 110/130 | आस्वादवद्भिरेतैः | 27/18 |
| आषाढमासि शुक्ले | 189/602 | आस्वादः परिवृत्तिं | 532/600 |
| आषाढस्य | 36/2 | आहतमुपेक्ष्य मामिह | 372/1702 |
| आषाढस्य प्रथमे | 9/3 | आहिण्डन्ते निर्भयमने.... | 279/1145 |
| आषाढस्य प्रथमो | 127/230 | आहिण्डमान एतल्लोके... | 543/674 |
| आसंस्तेऽपि कठोराः | 271/1099 | आहिमभूधर-शिखरात् | 46/3 |
| आसनबन्धं कृत्वा | 50/12 | आहु'र्जङ्गलराजं' | 126/225 |
| आसन् शिरःसु येषां | 199/661 | इच्छेर्यद्यवगन्तुं | 314/1355 |
| आसन्नितः कियत्यः | 461/105 | इत आम्रपालिषु | 137/292 |
| आसीत् कदाचिदस्मिन् | 124/216 | इत आयान्ती वात्या | 250/972 |
| आसीत् परिहर्तव्यो | 253/989 | इत आयाहि न | 122/201 |
| आसीत् पुष्पोद्यानं | 239/904 | इतिहासज्ञाः कामं | 298/1260 |
| आसीत् पूर्वं दृष्टिः | 237/892 | इतिहासस्यामूलात्पुनर्विचारं | 362/1642 |
| आसीत् पूर्वमहिंसा | 489/295 | इतिहासेषु पुराणेष्वाग..... | 53/9 |
| आसीत् स कृतेऽस्माकं | 247/955 | इत्वर इवैष दिवसांश्चरन् | 498/363 |
| आसीत् स तुल्यनिन्दा..... | 75/12 | इदमित्थमिति न | 218/775 |
| आसीदस्ति न भविता | 168/477 | इष्टो न यद्यपीतो | 265/1060 |
| आसीदेकं मुक्तिविद्यायाः | 105/100 | इस्लामस्यैकत्वं | 29/6 |
| आसीदेषा वसुधा | 409/1926 | इह कस्यचित् | 518/500 |
| आसीद् यन्मतव्यं | 273/1110 | इह काठिन्यं कठिनि! | 144/333 |
| आसीद् यो वाचालो | 127/229 | इह कालिदासचेतः | 4/12 |
| आसीन्मयि यत्किञ्चित् | 46/7 | इह कृत्रिमेषु नाना | 503/395 |
| आसीर्बुभुक्षितो वा | 268/1078 | इह जगति प्रतिभाति | 305/1298 |
| आसीस्त्वां मिश्रो | 21/76 | इह जगति राजनीतिः | 178/539 |
| आसीः प्रतीक्षमाणस्त्वं | 93/30 | इह जनतायै | 316/1367 |
| आस्तिक्यबुद्धिरेषा.... | 323/1411 | इह तादृशेन मान्यं | 106/103 |

इह दशवदना: 135/278
इह नीति: शृङ्गारो 409/1928
इह पश्यतोहराणां 330/1449
इह पश्यतोहरैस्त्वं 114/154
इह मोहन: स गान्धी 480/234
इह राजनीतिरेषा 301/1278
इह राजनीतिसरसि 140/309
इह राजनीत्याख्यं 157/413
इह रुदितं सीताभि: 533/607
इह विन्यासविशेषं 117/169
इह संयोग-वियोगौ 307/1312
ईप्सिततमेह लोके 501/380
ईप्सितमिह स्वमास्याद् 464/125
ईश्वर आस्तां कश्चित् 182/562
ईश्वर इति गॉड 397/1856
ईश्वर इत्यस्माकं 396/1849
ईश्वरविषया मन्ये 183/569
ईश्वरसन्देशहरे 30/11
ईहन्ते त्वां द्रष्टुं 68/5
उच्चैर्नीचैरिति यो 201/673
उच्चै: पदं समधिका 241/918
उच्चै: स्वरेण 205/699
उच्छिन्नानि वनानि 420/1989
उच्छिन्नेषु पृथिव्या: 173/506
उच्छेदाय न तस्या: 339/1502
उज्जयिनीं 11/28
उज्जयिनीं न 12/37
उज्जयिनीवास्त......... 8/20
उडुपेनानेनाहं 527/566
उड्डयमानं गगने 385/1783
उड्डयमाना गगने 438/2102
उड्डयमाना नैके 420/1993
उड्डयमाने दूरं 183/565
उड्डयमानेन मदादवधूता 192/623
उड्डयितुं निर्द्वन्द्वं 464/120
उड्डयितुं मन 113/145
उड्डीय क्व गता 66/1
उत्तिष्ठ सिंह! निद्रां 439/2105
उत्तिष्ठति निपतति च 230/847
उत्तुङ्गो गान्धित्वं 273/1109
उत्पतनस्य विहायसि 412/1945
उत्पतितमात्मसदृशं 31/25
उत्पद्यन्ते प्रायो नित्यं 502/388
उत्पश्याम्याकाशं 204/695
उत्पश्याम्यात्मानं 518/503
उत्पादयति न विघ्नं 371/1695
उत्पादयति प्रतिपदमिह 494/330
उत्पादयति विधाता... 487/285
उत्पादयेन्मदं यद् 154/394
उत्पादितस्त्वयाऽहं 529/580
उत्प्रेक्षितुमिह कश्चित् 200/668
उत्सवसम्मिलितानां 319/1383

| | | | |
|---|---|---|---|
| उत्साहस्याभावो | 434/2073 | उद्यानस्य सुमनसां | 285/1181 |
| उदपद्यत हृद्देशे | 397/1855 | उद्यानस्यास्तित्वं | 406/1905 |
| उदयति सूर्ये केचित् | 522/530 | उद्यानात् तव नाहं | 360/1630 |
| उदयन्तं त्वामन्तर्दावाग्नौ | 253/991 | उद्यानादुड्डीय स्वं | 312/1340 |
| उदयन्तमेव सूर्य | 118/176 | उद्यानानि वनानि | 95/38 |
| उदयन्तीव स्मृतय... | 303/1286 | उद्यानानि सरांसि च | 225/817 |
| उदरं पूरयितुमितो | 232/859 | उद्याने कृतवसतिषु | 186/588 |
| उदरम्भरयः केवलमथवा | 491/311 | उद्याने खर्जूराः पदे | 179/542 |
| उदरम्भरयो ग्रस्ता | 297/1254 | उद्याने वाग्देव्या | 287/1193 |
| उदरस्य येन | 73/23 | उद्याने विषवृक्षा यैरिह | 179/541 |
| उदिता चराचराणा...... | 179/543 | उद्यानेषु समन्ताद् | 280/1150 |
| उद्घाटितमिव | 27/16 | उद्यानेष्वस्माकं | 354/1594 |
| उद्घाटितया कामं | 202/683 | उन्नीयन्ते प्रश्नाः | 548/708 |
| उद्घाटिता गवाक्षास्त्वयि | 218/779 | उपकृतये न परस्य | 412/1942 |
| उद्घाटिता न | 317/1372 | उपगन्तुं प्रेयांसं | 355/1602 |
| उद्घातिनी न | 121/198 | उपजनयन्ति प्रायस्तव | 486/276 |
| उद्घातिनी प्रदन्ता मह्यं | 224/813 | उपदिश्य 'मोहनो' | 189/604 |
| उद्घातिन्यां भूमौ | 545/691 | उपदिश्येरन् कियदपि | 508/430 |
| उद्धारायास्माकं | 85/20 | उपदिष्टं यत्पशुनाऽन्तरं | 434/2076 |
| उद्यच्छिराः प्रतीयत | 294/1236 | उपदिष्टः केनास्मै | 507/423 |
| उद्यन्तं नापश्यं | 364/1652 | उपदेशकत्वमधुना प्रायो | 246/944 |
| उद्यानं किमपि | 42/10 | उपदेशकत्वमस्ति | 515/479 |
| उद्यानं मां भूयः | 323/1406 | उपदेशकत्वमात्मानि | 480/233 |
| उद्यानं यैरधिकृत.... | 375/1721 | उपदेशकाः सहस्यं | 110/127 |
| उद्यानं स्याद् विधिना | 412/1946 | उपदेशदानरूपं | 247/954 |
| उद्यानस्य न वार्ताः | 269/1087 | उपदेशस्त्वद्वदनात् सुबहोः | 225/820 |

| | |
|---|---|
| उपदेशा धर्मविदां | 79/21 |
| उपदेशेषु सतामपि | 330/1448 |
| उपनिषदोऽनूदितवान् | 31/20 |
| उपयुक्ता प्रत्यक्षं | 365/1660 |
| उपरि प्रासादानां | 175/519 |
| उपर्युपरि मृन्मयी | 61/14 |
| उपलभ्यन्ते रसिका | 320/1388 |
| उपवनभवाः सुमनसो | 316/1364 |
| उपसञ्चरन् | 40/10 |
| उपसेवितमिदमासीत् | 101/75 |
| उपहर्तु सर्वस्वं | 176/525 |
| उपहसनीयं यदिदं | 513/465 |
| उल्लासाः पूर्वमिव | 145/338 |
| ऊनं सत्त्वेष्वधिको | 286/1187 |
| ऊनान् सत्त्वेष्वधिका | 285/1180 |
| एकं त्वमेव मन्ये | 421/1996 |
| एकत उत्तुङ्गतमो | 3/3 |
| एकत उदयादुषसः | 127/234 |
| एकत एते ग्रन्था | 484/265 |
| एकत एषा भाषा | 368/1680 |
| एकत्राकर्षति मां | 376/1725 |
| एकस्मिन् दिवसे | 112/143 |
| एकस्मिन् नगरे | 97/50 |
| एकस्याङ्गीकुरुते | 509/439 |
| एकः कदाचिदासीद् | 493/323 |
| एकः कोऽपि सुपर्णः | 509/440 |
| एका कुतोऽप्यकस्मात् | 530/582 |
| एकां रात्रिमुषित्वा | 138/297 |
| एकाकिनमिह पुरुषं | 476/209 |
| एकाकिनः कुतश्चित्पथि | 136/284 |
| एकाऽऽकृतिः स्मृतौ | 227/829 |
| एकाधिकार आस्ते | 29/1 |
| एकान्त एव गीतं | 283/1170 |
